ताजिक नीलकण्ठी of नीलकण्ठ दैवज्ञ with the commentary of विश्वनाथ दैवज्ञ - Ed. & pub. by पं. रघुनन्दन प्रसाद शुक्ल at जगदीश्वर प्रेस.

Mumbai, 1907.

35

1364

Bill No. 3/07-08

78

2008-0232

उपोद्घात.

विदितमेवैतत् सारासारविवेकनिपुणानां विदुषां, यच्छ्रुति-स्मृति-ज्योति-रिति-
हास-पुराण-व्याकरण-न्याय-तर्क-योग-मीमांसा-सांख्य-वेदान्तादीनि निदर्शनानि
मर्त्यानामिहामुत्र च सुखदुःखप्रदकर्मप्रबोधकानि सन्ति, तन्मध्ये ज्योतिःशा-
स्त्रमेव इदानींन्तने काले सर्वोपयुक्ततया सर्वतो वरीवर्तीति । तत्तु गणितविषयं ग्र-
हनक्षत्रादिसंक्रमग-मौहूर्तिक-भूतभविष्यद्वर्तमान-जनुःसमुदितशुभाशुभफलज्ञानभेदात्
त्रिविधम् । तत्राप्याद्यं सूर्यसिद्धांतग्रहलाघवादिषु, द्वितीयं तत्त्वमार्तण्डादिषु,
तृतीयं च पाराशर्यादिग्रन्थेषु द्रष्टव्यम् । तत्रापि चरमं द्विविधं जातकताजकभेदात् ।
जातकं नाम यदाऽसौ मर्त्यः प्राग्भवार्जितकर्मफलपरिपाकेन दिष्टरूपेणोत्पद्यते त-
त्कालं अधिकृत्य तत्कालीनजन्मर्क्ष-जन्मराशिगत-तत्तत्स्थानस्थितग्रहजनितशुभा-
शुभनिरूपकं तदुपजीव्यगणितप्रतिपादकाकृतिरूपं शास्त्रम् । अपरं च जन्मकाली-
नमर्कमधिकृत्य वर्षप्रवेशसमयादारभ्य वर्षांतरागमावधि तत्तदब्दान्तरगतं यद्ग्रहयोग-
समुत्थितं फलं भवति तत्ताजिकनाम्ना व्यवह्रियते । जातकग्रंथास्तु बृहत्पाराशर्या-
भरणालंकारादयः सर्वतो (मुद्रितामुद्रिताः) बहुलतरा दृग्गोचरा भवंति, न त[illegible]
ताजिकाः ।

अतएव गर्गकुलावतंसस्य अनन्तगुणमंडितपंडिताग्र्यस्य अनन्ताख्यदैवज्ञस्य
तनूजेन गणितागमज्ञधौरिणा श्रीनीलकंठज्योतिर्विदा लोकसंग्रहाय संज्ञा वर्ष-
प्रश्नाख्यतंत्रत्रयात्मकोऽयं ताजिकनीलकंठ्याह्वो ग्रंथो व्यरचि । सोऽयं विश्वनाथ-
दैवज्ञविरचितया व्याख्योदाहृत्या समलंकृतो ग्रंथोऽस्माभिः सांप्रतं शास्त्रिभिः
विशदया सुव्यवस्थया विमलीकृत्वा स्थूलमध्यमनोहराक्षरैः पुष्टचिक्कणपत्रेष्वंकयि-
त्वा ज्योतिर्विज्जनपरितोषाय प्रकाशमनायि ।

यावद्बुद्धि सम्यक्परिशोधितेऽप्यस्मिन् ग्रंथे क्वचिदज्ञानादृष्टिदोषाद्वा विषमं
स्थितं स्यात्तद्दोषज्ञैर्मनीषिभिः समीकृत्य संशोधनीयम्—इति शं सर्वतः ।

प्रकाशकः

पुस्तक मिलनेका ठिकाना.—
पं० हरिप्रसाद भगीरथजीका पुस्तकालय
कालकादेवीरोड रामवाडी मुंबई.
पं० रघुनंदन प्रसाद शुक्ल बुकसेलर,
कचौरी गली, बनारस सिटी.

Indira Gandhi National Centre for the Arts

ज्योतिःशास्त्रान्तर्गता

ताजिकनीलकंठी

तंत्रत्रयात्मका

ज्योतिर्विद्श्रीनीलकंठदैवज्ञ

विरचिता

श्रीयुतविश्वनाथदैवज्ञविरचितया व्याख्योदाहृत्या

संवलिता ।

साच

पं. रघुनंदनप्रसादशुक्लेन

मोहमय्यां

जगदीश्वरमुद्रायंत्रालये मुद्रिता प्रकाशिता च ।

शकाब्दाः १८२९ ख्रिस्त्यब्दाः १९०७ सं. १९६४

1364

Indira Gandhi National Centre for the Arts

श्रीः ।

KALANIDHI
Rare Book Collection
Acc. No. 232
IGNCA Date: 25-3-88

श्रीताजिकनीलकण्ठी.

श्रीगणेशायनमः ॥ श्रीसरस्वत्यैनमः ॥ श्रीगुरुचरणारविंदाभ्यांनमः ॥ चंडी कुंडलमाकलय्यकुतुकाद्दंडाभशुंडाग्रगंकृत्वातांडवडंबरेपशुपतेःखेलन्खलूच्छ्रंख लम् ॥ चंडांशोरिवमंडलंतदपरंसंदर्शयन्नंबरेहेरंबोजगदंबिकांविहसयन्वःश्रेयसे गर्जताम् ॥ १ ॥ दिवाकरोनामबभूवविद्वान्दिवाकराभोगणितेषुमन्ये ॥ स्व कल्पितैर्येनविवृद्धवृंदैर्बद्धंजगदर्शितविश्वरूपम् ॥ २ ॥ तस्यात्मजाःपंचसमा बभूवुःपंचेंद्रकल्पागणितागमेषु ॥ पंचाननावादिगजेंद्रभेदेपंचाग्निकल्पाद्विजक र्मणाच ॥ ३ ॥ अजनिष्टकृष्णनामाज्येष्ठस्तेषांकनिष्ठानाम् ॥ विद्यानवद्यवा चांवेत्ताजगतःसदाचारी ॥ ४ ॥ तस्माज्जातःकनिष्ठोविबुधबुधगणश्रेष्ठतांप्राप जाग्रज्ज्योतिःशास्त्रेणशश्वत्प्रकटितविभवायस्याशिष्यप्रशिष्याः ॥ विष्णुर्ज्योतिर्वि दुर्वीपतिविदितगुणोभूमिदर्वीकरेंद्रोग्रंथव्याख्यानखर्वीकृतविबुधगुरुर्गर्वहागर्वभा जाम् ॥ ५ ॥ आसीदासिंधुदासीकृतगणकगणग्रामणीगर्वभेत्तावेत्ताग्रंथांतराणाम तिगुरुरनुजस्तस्यकस्याप्यजेयः ॥ मल्लारिर्वारिवृंदप्रशमनविधयेकोपिमल्लारिना माव्यक्ताव्यक्तप्रवक्ताजगतिविशदयत्सर्वसिद्धांतवेत्ता ॥ ६ ॥ तस्यानुजःकेश वनामधेयोज्योतिर्विदानंदसमुद्रचंद्रः ॥ वाणीप्रवीणावचनामृतेनसंजीवयामास कलाविलासी ॥ ७ ॥ तस्यानुजःसंप्रतिविश्वनाथोविष्णुप्रसादाद्गुणमात्रजिष्णुः ॥ सर्वज्ञदैवज्ञविलासविज्ज्ञोनृसिंहकःसाधितसर्वविद्यः ॥ ८ ॥ आसीद्वेदांत वेत्तास्मृतिनिगमपटुर्ग्रामणीगर्वभेत्ताकर्ताग्रंथांतराणांफणिपतिनिगमस्यापिवेत्ताधि काशी ॥ वक्ताश्रीनीलकंठात्मजभजनपटुर्नीलकंठःसचक्रेसंज्ञातंत्रंदुरूहंसकल शुभदशादुर्दशादर्शभूतम् ॥ ९ ॥ गोदातीरस्थगोलाभिधपुरवसतिःपार्थदेशैकभू पोसंज्ञातंत्रस्यटीकांव्यदधदभिनवांगद्यपद्यानवद्याम् ॥ शश्वद्विश्वोपकृत्यैविशद तरतयादैवविद्विश्वनाथोग्रंथोग्रग्रंथिभेत्ताग्रहगणितविदामग्रगण्योऽप्यगर्वः ॥ १० ॥

प्रणम्यहेरंबमथोदिवाकरंगुरोरनंतस्यतथापदांबुजम् ॥ श्रीनील कंठोविविनक्तिसूक्तिभिस्तत्ताजिकंसूरिमनःप्रसादकृत्॥१॥ ॥ अथ द्वादशराशिस्वरूपमाह । तत्रादौमेषस्य । पुमांश्चरोऽग्निःसुदृढ श्चतुष्पाद्रक्तोष्णपित्तोऽतिरवोऽद्रिरुग्रः ॥ पीतोदिनंप्राग्विषमोद योऽल्पसंगप्रजोरूक्षनृपःसमोऽजः ॥ २ ॥ ॥ अथवृषराशिस्वरूप माह। वृषःस्थिरःस्त्रीक्षितिशीतरूक्षोयाम्येट्सुभूर्वायुनिशाचतुष्पा त् ॥ श्वेतोऽतिशब्दोविषमोदयश्चमध्यप्रजासंगशुभोऽपिवैश्यः॥३॥

निर्विघ्नग्रंथसमाप्त्यर्थंमंगलमाचरन्चिकीर्षितंप्रतिजानीते । श्रीनीलकंठः तत्ताजिकंतत्पूर्वाचार्योक्तंताजिकंसूक्तिभिःसदुक्तिभिःनानाछंदोभिर्वाविविनक्तिप्र कटीकरोति । कथंभूतंताजिकंसूरिमनःप्रसादकृत् सूरयःपंडितास्तेषांमनःअं तःकरणंतस्यप्रसादकृत् एतद्ग्रंथावलोकनेनपंडितमनःप्रसन्नंभवतीत्यर्थः । किं कृत्वा हेरंबंगणपतिंप्रणम्य । पुनःकिंकृत्वा दिवाकरंसूर्यंप्रणम्य पुनःकिंकृत्वा अनंतदैवज्ञाख्यगुरोःपदांबुजंप्रणम्य ॥ १ ॥ पुमान्पुरुषराशिः चरश्चरसंज्ञकः अग्निरग्निराशिः सुदृढःदृढांगः चतुष्पाच्चतुश्चरणः रक्तःआरक्तवर्णः उष्णःउष्ण स्वभावः अतिरवोमहाशब्दः अद्रिःपर्वतचारी उग्रःक्रूरः पीतःपीतवर्णः दिनंदि वाबली प्राक्पूर्वदिक्स्वामी विषमोदयः अल्पसंगप्रजःअल्पस्त्रीसंगोऽल्पप्रजश्च रूक्षःकांतिरहितः नृपःक्षत्रियवर्णः समःसमांगः अजोमेषःएवंगुणविशिष्टोज्ञेयः। अयंराशिर्द्विवर्णः आरक्तवर्णःपीतवर्णश्च मेषसिंहधन्विनामेववर्णद्वयमुक्तम् कुतःसमरसिंहेनोक्तत्वात् ॥ २ ॥ वृषःस्थिरःस्थिरसंज्ञकः स्त्रीस्त्रीराशिः क्षितिर्भूमिराशिः शीतःशीतलस्वभावः रूक्षःकांतिरहितः याम्येट्दक्षिणदि क्स्वामी सुभूःसुष्टुभूमिचारी वायुःवायुप्रकृतिः निशारात्रिबली चतुष्पाच्चतु श्चरणः श्वेतःशुभ्रवर्णः अतिशब्दोमहाशब्दः विषमोदयः मध्यमप्रजासंगः मध्यमप्रजःमध्यमस्त्रीसंगश्च शुभःसौम्यः वैश्यःवैश्यवर्णः । अयंश्लथांगः मेषसिंहधन्विनाभेवदृढांगत्वमुक्तम् अर्थादितरेश्लथांगाबोध्याः ॥ ३ ॥

अथमिथुनराशिस्वरूपमाह । प्रत्यक्समीरःशुकभाद्विपान्नाद्वंद्वंद्वि मूर्तिर्विषमोदयोष्णः ॥ मध्यप्रजासंगवनस्थशूद्रोदीर्घस्वनःस्निग्ध दिनेट्तथोग्रः ॥४॥ ॥ अथकर्कराशिस्वरूपमाह । बहुप्रजासंगपदः कुलीरश्चरोंऽगनापाटलहीनशब्दः ॥ शुभःकफीस्निग्धजलांबुचारी समोदयीविप्रनिशोत्तरेशः ॥ ५ ॥ ॥ अथसिंहराशिस्वरूपमाह । पुमान्स्थिरोऽग्निर्दिनपीतरूक्षःपित्तोष्णपूर्वेशदृढश्चतुष्पात् ॥ स-मोदयोदीर्घरवोऽल्पसंगप्रजोहरिःशैलनृपोग्रधूम्रः ॥ ६ ॥

द्वंद्वंमिथुनराशिरेतादृशोज्ञेयः यथाप्रत्यक्पश्चिमदिक्स्वामी समीरोवायुराशिः शुकभाःशुककांतिः हरितवर्णइत्यर्थः । द्विपात्द्विचरणः नापुरुषराशिः द्विमूर्ति-र्द्विस्वभावः चरस्थिरस्वभावात्मकइत्यर्थः । तत्रापिपूर्वार्धेस्थिरमुत्तरार्धेचरमितिवि-शेषोज्ञेयः उक्तंचभट्टोत्पलेन " चरराशौविपरीतंमिश्रंवाच्यंद्विमूर्त्युदये ॥ स्थिर-वत्प्रथमेर्धेस्यादपरेचरराशिवत्सर्वम् " इति । विषमोदयः उष्णउष्णस्वभावः मध्यप्रजासंगः मध्यमस्त्रीसंगश्च वनस्थोवनचारी शूद्रःशूद्रवर्णः दीर्घस्वनः महाशब्दः स्निग्धःचिक्कणः दिनेट्दिवाबली तथाशब्दःपादपूरणे उग्रःक्रूरः । अयंश्लथांगः ॥ ४ ॥ कुलीरःकर्कराशिःएतादृशोज्ञेयः यथा बहुप्रजासंगपदः बहुप्रजोबहुस्त्रीसंगोबहुचरणश्च चरश्चरसंज्ञकः अंगनास्त्रीराशिः पाटलःश्वेतरक्त-वर्णः हीनशब्दोनिःशब्दः शुभःसौम्यः कफीकफप्रकृतिः स्निग्धःचिक्कणः जलं जलराशिः अंबुचारीजलचरः समोदयी विप्रोब्राह्मणवर्णः निशारात्रिबली उत्त-रेशःउत्तरदिक्स्वामीः । अयंश्लथांगः ॥ ५ ॥ हरिःसिंहः सएतादृशोज्ञेयः पुमान् पुरुषः स्थिरःस्थिरसंज्ञकः अग्निरग्निराशिः दिनंदिवाबली पीतःपीतवर्णः रूक्षः कांतिरहितः पित्तःपित्तप्रकृतिः उष्णःउष्णस्वभावः पूर्वेशःपूर्वदिक्स्वामी दृढो दृढांगः चतुष्पाच्चतुश्चरणः समोदयः दीर्घरवोमहाशब्दः अल्पसंगप्रजःअल्प-स्त्रीसंगोऽल्पप्रजश्च शैलःपर्वतचारी नृपःक्षत्रियवर्णः उग्रःक्रूरः धूम्रोधूम्रवर्णः । अयंराशिर्द्विवर्णः पीतोधूम्रश्च ॥ ६ ॥

Indira Gandhi National Centre for the Arts

अथकन्याराशिस्वरूपमाह ॥ पांडुर्द्विपात्स्त्रीद्वितनुर्यमाशानिशा मरुच्छीतसमोदयाक्ष्मा ॥ कन्यार्धशब्दाशुभभूमिवैश्यारूक्षाऽल्प संगप्रसवाशुभाच ॥ ७ ॥ ॥ अथतुलाराशिस्वरूपमाह । पुमांश्च रश्चित्रसमोदयोष्णःप्रत्यङ्मरुत्स्निग्धरवोनवन्यः ॥ स्वल्पप्रजासं गमशूद्रउग्रस्तुलोद्युवीर्योद्विपदःसमानः ॥८॥ ॥अथवृश्चिकराशि स्वरूपमाह । स्थिरःसितःस्त्रीजलमुत्तरेशनिशारवोनोबहुपाःक फीच ॥ समोदयोवारिचरोऽतिसंगप्रजःशुभःस्निग्धतनुर्द्विजोऽलिः ॥ ९ ॥ ॥ अथधनूराशिस्वरूपमाह । नास्वर्णभाःशैलसमोदयो ऽतिशब्दोदिनंप्राग्दृढरूक्षपीतः ॥राजोष्णपित्तोधनुरल्पसूतिसंगो द्विमूर्तिर्द्विपदोऽग्निरुग्रः ॥ १० ॥

कन्यास्वरूपमेतादृशम् पांडुःपिंगलवर्णः द्विपात्द्विचरणः स्त्रीस्त्रीराशिः द्वित नुर्द्विस्वभावाचरस्थिरद्विस्वभाविका यमाशादक्षिणदिक्स्वामी निशारात्रिबली म रुद्वायुप्रकृतिः शीताशीतस्वभावा समोदया क्ष्माभूमिराशिः अर्धशब्दाखंड शब्दा शुभभूमिःशुभभूमिचारी वैश्यावैश्यवर्णा रूक्षाकांतिरहिता अल्पसंगप्रस वाअल्पसंगाअल्पप्रसवाच; शुभाशुभसौम्यराशिः । चकारःसमुच्चयार्थः ॥ ७ ॥ पुमान्पुरुषराशिः चरश्चरसंज्ञकः चित्रोनानाविधवर्णः समोदयः उष्णः प्रत्य क्पश्चिमदिक्स्वामी मरुद्वायुराशिः स्निग्धःचिक्कणः रवोनोनिःशब्दः वन्यः वनचारी स्वल्पप्रजासंगमःस्वल्पप्रजःस्वल्पस्त्रीसंगश्च शूद्रःशूद्रवर्णः उग्रःक्रूरः द्युवीर्योदिवाबली द्विपदःद्विचरणः समानःसमांगः । अयंश्लथांगः तुलाराशिरे तादृशोज्ञेयः ॥ ८ ॥ स्थिरःस्थिरसंज्ञकः सितःशुभ्रवर्णः स्त्रीस्त्रीराशिः जलं जलराशिः उत्तरेशः उत्तरदिक्स्वामी निशारात्रिबली रवोनोनिःशब्दः बहु पाद्बहुचरणः कफीकफप्रकृतिः समोदयः वारिचरःजलचरः अतिसंगप्रजःबहु स्त्रीसंगोबहुप्रजश्च शुभःसौम्यः स्निग्धतनुःचिक्कणतनुः द्विजःब्राह्मणवर्णः अलिर्वृश्चिकराशिरेतादृशोज्ञेयः । अयंश्लथांगः ॥ ९ ॥ नापुरुषराशिः स्वर्णभाः स्वर्णकांतिः शैलःपर्वतचारी समोदयोऽतिशब्दःमहाशब्दश्च दिनंदिवाबली

अथमकरराशिस्वरूपमाह । मृगश्चरःक्ष्मार्धरवोयमाशास्त्रीपिंग रूक्षःशुभभूमिशीतः ॥ स्वल्पप्रजासंगसमीररात्रिरादौचतुष्पाद्वि षमोदयोविट्॥११॥ ॥ अथकुंभराशिस्वरूपमाह॥ कुंभोऽपदोना दिनमध्यसंगप्रसूःस्थिरःकर्बुरवन्यवायुः ॥ स्निग्धोष्णखंडस्वर तुल्यधातुःशूद्रःप्रतीचीविषमोदयोग्रः ॥ १२ ॥ ॥अथमीनराशि स्वरूपमाह । मीनोऽपदःस्त्रीकफवारिरात्रिर्निःशब्दबभ्रुर्द्वितनुर्ज लस्थः ॥ स्निग्धोऽतिसंगप्रसवोऽपिविप्रशुभोत्तराशेड्विषमोद यश्च ॥ १३ ॥

प्राक्पूर्वदिक्स्वामी दृढःदृढांगः रूक्षःकांतिरहितः पीतःपीतवर्णः राजाक्षत्रिय वर्णः उष्णः पित्तःपित्तप्रकृतिः अल्पसूतिसंगःअल्पप्रजोऽल्पस्त्रीसंगश्चोच्यते द्वि मूर्तिश्चरस्थिरस्वभावात्मकः द्विपदःद्विचरणः तत्रापिपूर्वार्धेद्विपदत्वम् उत्त रार्धेचतुष्पदत्वंज्ञेयं स्वयमेवाग्रेवक्ष्यति अग्निरग्निराशिः उग्रःक्रूरः। अयंराशिर्द्वि वर्णः सुवर्णवर्णःपीतवर्णश्च धनुराशिरेतादृशोज्ञेयः ॥ १० ॥ मृगोमकरराशि रेतादृशोज्ञेयः चरःचरसंज्ञकः क्ष्माभूमिराशिः अर्धरवोऽर्धशब्दः यमाशादक्षि णदिक्स्वामी स्त्रीस्त्रीराशिः पिंगःपिंगलवर्णः रूक्षःकांतिरहितः शुभः सौम्यः भूमिःभूमिचारी शीतःशीतलस्वभावः स्वल्पप्रजासंगःस्वल्पप्रजःस्वल्पस्त्रीसंग श्च समीरोवातप्रकृतिः रात्रिःरात्रिबली आदौचतुष्पात् राशिपूर्वार्धेचतुष्पदत्वं ज्ञेयम् उत्तरार्धेजलचरत्वंज्ञेयम् उत्तरार्धजलचरत्वमित्यग्रेवक्ष्यति विषमोदयः विट्वैश्यवर्णः । अयंश्लथांगः ॥ ११ ॥ कुंभराशिरेतादृशोज्ञेयः अपदःचरण हीनः नापूरुषराशिः दिनंदिवाबली मध्यसंगप्रसूः मध्यमस्त्रीसंगोमध्यमप्रसव श्च स्थिरःस्थिरराशिः कर्बुरश्चित्रवर्णः वन्योवनचारी वायुर्वायुराशिः स्निग्धः चिक्कणः उष्णः खंडस्वरोऽर्धस्वरः तुल्यधातुः समवातपित्तकफप्रकृतिः शूद्रः शूद्रवर्णः प्रतीचीपश्चिमदिक्स्वामी विषमोदयः उग्रःक्रूरः। अयंश्लथांगः॥१२॥ मीनराशिरेतादृशोज्ञेयः अपदश्चरणहीनः स्त्रीस्त्रीराशिः कफःकफप्रकृतिः वारि जलराशिः रात्रिःरात्रिबली निःशब्दःशब्दरहितः बभ्रुःपिंगलवर्णः द्वितनुश्चर

एवंराशिस्वरूपमुक्त्वेदानींराशीनांमित्रामित्रविभागमाह । धरां बुनोरग्निसमीरयोश्ववर्गेसुहृत्त्वंपरतोऽरिभावः ॥ चापांत्यभागस्य चतुष्पदत्वंज्ञेयंमृगांत्यस्यजलेचरत्वम् ॥१४॥ ॥ अथोक्तराशीस्व रूपस्यफलकथनार्थंसंक्षेपेणकिंचित्स्वरूपमाह । पित्तानिलौधातु समःकफश्चत्रिर्मेषतःसूरिभिरूहनीयाः ॥ राजन्यविट्शूद्रधरासुरा श्वसर्वैफलंराश्यनुसारतःस्यात् ॥ १५ ॥

स्थिरस्वभावात्मकः जलस्थःजलराशिः स्निग्धःचिक्कणः अतिसंगप्रसवः अत्यंत स्त्रीसंगोऽत्यंतप्रसवश्च अपिशब्दःसमुच्चये विप्रोब्राह्मणवर्णः शुभःसौम्यः उत्त राशेटूउत्तरादिक्स्वामी विषमोदयः । अयंश्लथांगः ॥१३॥ धरांबुनोःपृथ्वीराशि जलराश्योर्वर्गेसुहृत्त्वंमित्रत्वं एवं अग्निसमीरयोः अग्निराशिवायुराश्योर्वर्गेऽपि मित्रत्वंज्ञेयम् । परतः एतद्वैपरीत्ये अरिभावःशत्रुभावः । एतदुक्तंभवति पि तापुत्रयोः स्त्रीपुरुषयोर्वा स्वामिसेवकयोर्वाऽन्ययोर्वायस्यकस्यापिमैत्रीविचारे पृ थ्वीराशिजलराशिसंबंधेमित्रत्वंवक्तव्यम् एवमग्निराशिवायुराशिसंबंधेमित्रत्वंवा च्यम् अन्यथाशत्रुत्वम् यथाभूम्यग्न्योर्भूम्यनलयोरंब्वग्न्योरंबुवाय्वोर्वर्गेशत्रुत्व म् । यद्वाद्वयोरेकएवपृथिव्यादिवर्गःस्यात् तदाद्वयोःपरस्परमतिप्रीतिरित्यर्थतः सिद्धम् । अथराशिस्वरूपकथनावसरेधनुर्मकरयोरनुक्तेकिंचित्स्वरूपविशेषेसिं हावलोकनन्यायेनाह चापेति । चापस्यधनुषःअंत्यभागेउत्तरार्धेचतुष्पदत्वं ज्ञेयम् मृगस्यमकरस्यांत्यभागेउत्तरार्धेजलचरत्वंज्ञेयम् ॥ १४ ॥ पित्तानिला विति । मेषःपित्तं वृषोऽनिलोवायुः मिथुनःधातुसमोवातपित्तकफात्मकः कर्कःकफी तथासिंहःपित्तं कन्याऽनिलः तुलाधातुसमः वृश्चिकःकफी एवंधनुः पित्तं मकरोऽनिलः कुंभोधातुसमः मीनःकफीति । मेषतःमेषमारभ्यमीनपर्यंतं चतुष्कंचतुष्कंकृत्वा त्रिस्त्रिरावृत्तंभवति एतेराशयःसूरिभिःपंडितैरूहनीयाःज्ञा तव्याः । अथराजन्यविट्शूद्रधरासुराणांद्वादशराशिषुत्रिरावृत्तिर्ज्ञातव्या तद्यथा मेषोराजन्यःक्षत्रियवर्णः वृषःविट्वैश्यवर्णः मिथुनःशूद्रवर्णः कर्कोधरासुरोब्रा ह्मणवर्णः तथासिंहःक्षत्रियवर्णः कन्यावैश्यवर्णा तुलाशूद्रवर्णा वृश्चिकोब्राह्मण

Indira Gandhi National Centre for the Arts

अथवर्षफलसाधनार्थंवर्षप्रवृत्तिसमयमाह । गताःसमाःपादयुताः प्रकृतिघ्नसमागणात् ॥ खवेदा४०प्तघटीयुक्ताजन्मवारादिसंयुताः॥ अब्दप्रवेशेवारादिसप्ततष्टेऽत्रनिर्दिशेत् ॥ १६ ॥ अथतिथि साधनमाह । शिवघ्नोऽब्दःस्वखाद्रींदुलवाढ्यःखाग्निशेषितः ॥ जन्मतिथ्यन्वितस्तत्रतिथावब्दप्रवेशनम् ॥ १७ ॥

वर्णः। एवंधनुःक्षत्रियवर्णः मकरोवैश्यवर्णः कुंभःशूद्रवर्णः मीनोब्राह्मणवर्णः एतेषांसर्वफलंराश्यनुसारतोराशिस्वरूपसदृशंफलंस्यादित्यर्थः ॥ १५ ॥ **अथगणितंवक्ष्यति** तत्रादौग्रहाणांचालनंवक्ष्यति तत्रचालनेवर्षप्रवृत्तिरपेक्षिता साच ग्रंथकर्त्राऽत्रनोक्ता कुतःवर्षतंत्रेउक्तत्वात् सातुअस्माभिरत्रोपयुक्तत्वात्प्रदर्श्यते अन्यच्चवर्षेशनिर्णयदशांतर्दशामासप्रवेशदिनप्रवेशादिकंअत्रोपयुक्तम् तत्तुवर्ष तंत्रेप्रदर्शितमितिनात्रप्रदर्शितम् अत्रतु अस्माभिःयस्ययत्रउपयोगः तत्रतत् प्रदर्श्यते । गताःसमाःगतवर्षाणि तद्यथाजन्मकालिकःशकोवर्तमानशकात् शोध्यः शेषंगतसमाः ताःपादयुताःस्वचतुर्थांशेनयुताःकार्याः प्रकृतिरेकविंश तिस्तद्घ्नःतेनगुणितोयःसमागणोवर्षगणःतस्मात् खवेदा ४० प्तघटीयुक्ताश्चत्वा रिंशताभक्तात्घट्यादियल्लब्धंतेनचतुर्थांशयुक्तसमायुताःकार्याः ततःजन्मवारा दिजन्मकालिकवारइष्टघटीपलैःसंयुताःकार्याः तदनंतरंऊर्ध्वांकेसप्ततष्टेसप्तभिर्भ क्तेयच्छेषंतत् अत्रअस्मिन्ग्रंथे अब्दप्रवेशेवर्षप्रवेशेवारादिवारघटीपलात्मकंनि र्दिशेत्वदेत् अत्रवर्तमानोवारोज्ञेयः ॥ १६ ॥ अब्दःगतवर्षगणः शिवघ्नःए कादशभिर्गुण्यः स्वखाद्रींदुलवाढ्यः स्वकीयोयःसप्तत्यधिकशतभागस्तेनाढ्यः युक्तःकार्यःजन्मतिथ्यन्वितः शुक्लप्रतिपदमारभ्यजन्मकालीनवर्तमानतिथिभिर न्वितःयुक्तंःकार्यः खाग्निशेषितःत्रिंशताभक्तः तत्रतिथौतस्मिन्शेषेऽपितिथौअ ब्दप्रवेशनंवर्षप्रवेशोभवति अस्यांतिथौवर्षप्रवेशोभवतीतिनियमोनास्ति कदा चित्पूर्वतिथौअग्रिमातिथौचभवति अत्रवारस्यैवप्रामाण्यं तिथित्रयस्यमध्येयस्मि स्तिथौपूर्वानीतवारोभवतिसएववर्षप्रवेशोतिथिर्ज्ञातव्यः यत्रकुत्रापिशेषितस्तष्टः

Indira Gandhi National Centre for the Arts

एवमब्दआयातितत्रलब्धस्यत्यागः शेषस्यग्रहणमितिज्ञैर्ज्ञेयम्॥**अथोदाहरणक्रमोलिख्यते** तत्रादौकस्यचिज्जन्मसमयोलिख्यते संवत् १६४८ शके १५१३ माघशुक्लप्रतिपदाबुधे घटी ३६ श्रवणनक्षत्रे घटी ५४ वज्रयोगे घटी ६ अस्मिन्शुभदिने श्रीसूर्योदयादिष्टघटी ३७ पलेषु ५३ तथारात्रिगतघटी १२ पलानि ३१ जन्मअक्षभा ७।३० देशांतरयोजनानिधनानि ३० सूर्यः ९।७। ३०।६ जन्मलग्नम् ५।१०।५३।५० **अथवर्षप्रवेशस्योदाहरणम्**॥तत्रजन्मकालीनः शकः १५१३ वर्तमानशकात् १५५० शोधितः शेषांकप्रमितोजातोगतवर्षगणः ३७ अयंस्वचतुर्थांशेनयुक्तः ९।१५।० गतवर्षगणः ४६ गतवर्षगणः ३७ एकविंशतिभिर्गुणितःजातोऽयमंकः ७७७ अयंचत्वारिंशताभक्तः लब्धंघटीपलात्मकम् १९।२५।३० एतच्चतुर्थांशयुक्तसमागणे ४६।१५। ५० घटीषुयुतं जातं ४६।२४।२५।३० एतज्जन्मवारादिना ४।३७।५२ युतंजातोऽयमंकः ५१।१२।१८।३० ऊर्ध्वांकेसप्ततष्टेशेषंवर्षप्रवेशेवारादि २। १२।१८।३०॥ **अथप्रकारांतरेण वर्षप्रवेशानयनमाह** ॥वर्षध्रुवांकः३६५। १५।३१।३० अयंगतवर्षेण ३७ गुणितः १३५१४।३४।२५।३० एतज्जन्मवारादि ४।३७।५३ युतोजातोऽयमंकः १३५१९।१२।१८।३० ऊर्ध्वांकेसप्ततष्टे शेषंवर्षप्रवेशेवारादि २।१२।१८।३०॥**अथतिथ्यानयनम्**॥ गतवर्षगणः३७ एकादशभिर्गुणितः ४०७ अयंस्वकीयसप्तत्यधिकशत १७० भागेन २ युक्तः ४०९ अयंजन्मकालीनशुक्लप्रतिपदमारभ्यवर्तमान २ तिथिभिर्युक्तः ४११ त्रिंशतातष्टः शेषप्रमिता २१ जातावर्षप्रवेशेकृष्णपक्षेषष्ठी अस्यां तिथौपूर्वानीतवारोनास्ति अग्रिमतिथौवर्तते इतिकारणात् अस्यांतिथौ २१ एकः १ युक्तः २२ जाताकृष्णपक्षसप्तमी अत्रयस्मिन्मासेजन्मभवति तस्मिन्मासेवर्षप्रवेशोभवति कदाचिज्जन्ममासात्पूर्वस्मिन्मासेऽथवाऽग्रिममासेचभवतितत्रप्रमाणंवक्ष्यते जन्मकालीनरविणासहतुल्योरविर्यस्मिन्मासेभवातिसएववर्षप्रवेशोमासोज्ञेयः संवत् १७८५ शके १६५० माघकृष्णसप्तमी सोमेघटी ३७ पलानि ३९ हस्तनक्षत्रघटी १७ प० २८ सुकर्मायोगघटी २७ पलानि २८ अस्मि

Indira Gandhi National Centre for the Arts

ञ्छुभदिनेसूर्योदयाद्गतघटीषु १२ पला० १८ विप० ३० वर्ष ३८ प्रवेशः। अथैतद्वर्षप्रवेशसमयेप्रमाणमाह वर्षप्रवेशकालोऽर्कः "तत्कालेऽर्कोजन्मकालरविणास्याद्यतःसमः ॥ सएवमासोविज्ञेयोवर्षावेशेबुधैर्ध्रुवम् ॥" यतःयस्मात्कारणात् तत्कालेवर्षप्रवेशसमयेकरणोक्तरीत्यासाधितः सूर्योजन्मकालीनरविणासमस्तुल्योराश्यंशकलाविकलात्मकोभवति इदमेववर्षप्रवेशसमयेप्रमाणम्। अस्योदाहरणमग्रेप्रदर्श्यते। गणेशदैवज्ञैःस्वकृतताजिकभूषणे जन्मकालीनसूर्येण सहवर्षप्रवेशकालीनोऽर्कःकलासुतुल्योनायातीतिज्ञात्वा वर्षप्रवेशसमयेभ्रांत्या अन्यसंस्कारोऽप्युक्तः। यद्वाक्यंच-शाकेजन्मशकोनितेभवतियच्छेषंगताब्दव्रजोऽधोऽधःसंगुणितः शरैश्च ५ युगुलेनांगै २।६ र्युगै ४ र्भाजितः॥ लब्धं तज्जननोत्थ १० वारघटिकाब्देनान्वितंसप्तभिः पूर्वाकेविहितेऽत्रशेषकमितौवर्षप्रवेशोध्रुवः॥ १ ॥ वर्षप्रवेशोत्थघटीपलाद्येकालेकिलस्पष्टतरःसनूनम् ॥ भानुर्जनुर्भानुसमानएषःसिद्धांतरीत्यापरिसाधनीयः ॥ २ ॥ जन्मकालनलिनीविलासिनानैवजातुतुलतांकलासुचेत् ॥ वर्षकालनलिनीपतिस्तयोरंतरंगतिहृतंयुतोनितम् ॥ ३ ॥ कार्यवर्षध्रुवेतस्मादसौस्पष्टःप्रजायते ॥ तत्कालसंभवैर्भावैःखेटैश्चफलनिर्णयः ॥ ४ ॥ अथगणेशदैवज्ञभ्रांतिदूरीकरणार्थमुदाहरणंप्रदर्श्यते। जन्मसमयेसिद्धांतरहस्याहर्गणः २१२८ चक्रं ६ सूर्योदयेमध्यमोऽर्कः ९।६।७।४३ देशांतरविकलाभि २२ र्युतः ९।६।८।५ इष्टघटीभिः ३७।५३ चालितः जातस्तात्कालिकोऽर्कः ९।६।४५।२५ मंदकेंद्रं ५।११।१४।३५ मंदफलंधनम् ०।४२।२३ संस्कृतोऽर्कः ९।७।३७।४८ अयनांशाः १७।४९ चरखंडानि ७५।६०।२५ चरंधनम् १३८ संस्कृतोजातो जन्मसमयेस्पष्टोऽर्कः ९।७।३०।६ अथवर्षप्रवेशसमये सिद्धांतरहस्याहर्गणः ३५९५ चक्रं९ सूर्योदयेमध्यमोऽर्कः ९।६।३२।५८ देशांतरविकलाभिर्युक्तः ९।६।३३।२० इष्टघटीभिः १२।१८।३० चालितः जातस्तात्कालिकोऽर्कः ९।६।४५।२७ मंदकेंद्रं ५।११।१४।३३ मंदफलंधनं०।४२।२३ संस्कृतोऽर्कः ९।७।२७। ५० अयनांशाः १८।२६ चरखंडानि ७५।६०।२५ चरंधनम् १३६ संस्कृ

अथवर्षेशसमयेस्पष्टाग्रहाःसाध्याः ॥ ॥ तत्रापिसुखार्थंपंचाग स्थितग्रहेषुचालनमाह ॥ गतैष्यदिवसाद्येनगतिर्निघ्नीखषड् ६० हृता ॥ लब्धमंशादिकंशोध्यंयोज्यंस्पष्टोभवेद्ग्रहः ॥ १८ ॥

तोजातोवर्षप्रवेशसमयेस्पष्टोऽर्कः९।७।३०।६ अयंवर्षकालीनःसूर्यःपूर्वानीत जन्मकालीनसूर्येणसहतुल्योजातइति एतेनगणेशदैवज्ञमतंनिरस्तं अनयारीत्या द्वयोस्तुल्यताभवतीतिगणेशदैवज्ञैर्नविलोकितमितिज्ञायते तैस्तुवर्षप्रवेशंस्पष्टघ टीभिःपंचांगास्थितसूर्यस्यचालनंदत्वाजन्मकालीनसूर्येणसहकलासुतुल्यतानाया तीतिदृष्ट्वावर्षप्रवेशघटीषुअन्यःसंस्कारोप्युक्तइतिचेदुच्युतेतत्रापिहेतुरुच्यते इद मेवांतरंपततीतिसत्यंअत्रापिहेतुस्तैर्नबुद्धः अस्माभिःप्रदर्श्यतेसौरब्रह्मवर्याइत्यादि पक्षाणांपरस्परमंतरेसतिजन्मकालीनसूर्यपंचांगास्थितसूर्ययोरंतरंपतातिएकपक्षमंगी कृत्यउभयोःसाधनंचेत्क्रियतेतदाअंतरंनपताति ननुसौरपक्षाज्जन्मकालीनसूर्यः साधितः सौरपक्षात्पंचांगस्थसूर्योऽपिवर्तते तत्राप्यंतरंपततीतिचेदुच्यतेहेतुः येनयस्यकस्यापिजन्मसमयेग्रहसाधनांक्रियतेतेनयस्यकस्मिन्ग्रामेजन्मतद्ग्रामस्य चरदेशांतरसंस्कारःक्रियतेयेनयद्ग्रामस्यपंचांगंक्रियते तेनतद्ग्रामस्यचरदेशांतरसं स्कारोग्रहेषुक्रियते ग्रामेग्रामेचरदेशांतरेभिन्नंभिन्नंइतिकारणादंतरंपतति उभये रेकदेशस्थसंस्कारश्चेत्क्रियतेतदांतरंसर्वथानपतति यस्माद्ग्रंथात्साधितःसूर्यो जन्मकालीनोयावद्भिःसंस्कारैःसंस्कृतोभवतितावद्भिःसंस्कारैःसंस्कृतः तस्माद्ग्रं थाद्वर्षप्रवेशसमयेसाधितः सूर्यःविकलात्मकस्तुल्योभवतीतिनिश्चितम् अत्रार्थे पूर्वमेवोदाहरणंप्रदर्शितम् अनयारीत्याद्वयोस्तुल्यताभवतातिज्ञात्वादैवज्ञचक्र चूडामणिभिःश्रीकेशवदैवज्ञैराचार्यैर्नान्यःसंस्कारोवर्षप्रवेशसमयेऽप्युक्तः गणेश दैवज्ञैर्यदुक्तंतदसत् ॥ १७ ॥ अथवर्षप्रवेशसमयेस्पष्टाग्रहाःसाध्याः ।

रव्यादयःस्पष्टाःस्युः								
सू	चं	मं	बु	गु	शु	श	रा	के
१	५	९	९	९	७	६	२	९
७	२२	२२	१२	१९	१४	२२	२२	२२
३०	९	३६	१६	३४	३१	२४	२४	२४
६	४७	०	९	१३	४८	३६	२६	२६
६१	८१५	४४	५९	१३	७०	३	३	३
१७	२४	१	२३	५०	७	११	११	११

तत्रापि सुखार्थं पंचांगस्थितग्रहेषु चालनमाह गतैष्यदिवसैः कृत्वा ग्रहस्य कलादिकाग तिर्गुण्या खषड्भिः षष्ट्याभाज्यालब्धमंशा दिकं अंशकलाविकलात्मकं पंचांगस्थितग्र हेशोध्यं योज्यंवा यदागतमंतरं तदाशोध्यं यदात्वेष्यमंतरंस्यात्तदायोज्यम् सतात्कालि

अथपंचांगस्थनक्षत्राच्चंद्रानयनमाह ॥ खषट् ६० घ्नंभयातंभभोगो द्धृतंतत्खतर्कघ्नधिष्ण्येषुयुक्तं द्विनिघ्नम् ॥ नवाप्तंशशीभागपूर्वस्तुभु क्तिःखखाभ्राष्टवेदा ४८००० भभोगेनभक्ताः ॥ १९ ॥ ॥ अथ भावसाधनमाह ॥ ॥ दिवानिशोरिष्टघटीषुशुद्धंद्युरात्रिखंडंत्वपरं नतंस्यात् ॥ २० ॥

कःस्पष्टोग्रहोभवेत् वक्रगतिग्रहस्यराहुकेत्वोश्चचालनंमार्गग्रहापेक्षयाविपरीतंज्ञेयम् । **उदाहरणम्** ॥ वर्षप्रवेशवारादिकमध्ये २।१२।१८ अवधिस्थ वारादिना६ १३।५६ शोधितेजाताश्चालनाकाः २।५८।२२ अनेनसर्वेग्रहाश्चालिताः ॥ १८ ॥ वर्षप्रवेशसमयेयन्नक्षत्रंभवतितस्यनक्षत्रस्यइष्टकालावधिभुक्तघटिकाः कार्याःताःषष्ट्यागुण्याःभभोगोद्धृतंनक्षत्रस्यगतैष्ययोगेनभाज्यात्यल्लब्धंतत्षष्टिगुणिताश्विन्यादिगतनक्षत्रेषुयुक्तंद्विनिघ्नं ताअश्विन्यादिनक्षत्रादिष्टघटीपर्यंतंघटिकाभवंति तानवभिर्भाज्यालब्धमंशाःशेषंषष्ट्यागुण्यंनवभिर्भाज्यंलब्धंकलाःपुनः शेषंषष्ट्यागुण्यंनवभिर्भाज्यंलब्धंविकलाः एवंशशीभागपूर्वांशादिकस्तात्कालिकःस्यात् । **अथतिथिसाधनम्** ॥ खखाभ्राष्टवेदा ४८००० भभोगेननक्षत्रगतैष्ययोगेनभक्ताःचंद्रस्यकलादिकास्पष्टागतिःस्यात् ॥ **उदाहरणम्** ॥ वर्षप्रवेशसमये हस्तनक्षत्रंतस्यपूर्वदिनेभुक्तघटिकाः ४१।२४ एताइष्टघटीभिः १२।१८ युक्ता इष्टघटीपर्यंतंहस्तनक्षत्रस्यभुक्तघटिकाःजाताः ५३।४२ एताःषष्ट्यागुणिताः ३२।२२ नक्षत्रस्यगतैष्ययोगेन५८।५२ भक्ताःस्ववर्णितौभाज्य १९।३३।२० भाजकौ ३५।३२ भाजनाल्लब्धं ५४।४४।१ अश्विन्यादिगतनक्षत्रपर्यंतंसंख्या १२ षष्ट्यागुणिताः ७२० पूर्वलब्ध्या ५४।४४।१ युक्ताः७७।६।४४।१ द्विगुणिताः १५।४९।२८।२ नवभिर्भक्ताःलब्धंअंशादिकं १७२।९।४७ अंशा स्त्रिंशता ३० भक्ताः जातस्तात्कालिकोराश्यादिचंद्रः ५।२२।९।४७ अथगत्यानयनम् । खखाभ्राष्टवेदानक्षत्रस्यगतैष्ययोगेन ५८।५२ भक्तालब्धाकलादिकाचंद्रस्यस्पष्टागतिः ८१५।२४ उक्तरीत्यासाधितास्तात्कालिकस्पष्टाग्रहाः ॥ १९ ॥ **अथसप्तभिःश्लोकैर्भावसंधिसाधनमाह** । तत्रलग्नसाधनमिष्टकाला

Indira Gandhi National Centre for the Arts

तत्कालेसायनार्कस्यभुक्तभोग्यांशसंगुणात् ॥ स्वोदयात्खाग्नि३०
लब्धंयद्भुक्तंभोग्यंरवेस्त्यजेत् ॥ २१ ॥ इष्टनाडीपलेभ्यश्चगतग
म्यान्निजोदयात् ॥ शेषंखत्र्या ३० हतंभुक्तमशुद्धेनलवादिकम्
॥ २२ ॥ अशुद्धशुद्धभेहीनयुक्तनुर्व्ययनांशकम् ॥ एवंलंकोदयैर्भु
क्तंभोग्यंशोध्यंपलीकृतात् ॥ २३ ॥ पूर्वपश्चान्नतादन्यत्प्राग्वत्तद
शमंभवेत् ॥ सषड्भेलग्नखेजायातुर्यौलग्नोनतुर्यतः ॥ २४ ॥

दिसाधनंदशमलग्नसाधनम् ततोन्नतसाधनम् तत्रादौनतोन्नतसाधनज्ञानमाह। दिनार्धपूर्वमिष्टकालेसतिदिनखंडंदिनार्धदिनगतघटीभिःहीनंकार्यम् तदादिन पूर्वनतंस्यात् रात्रौरात्र्यर्धपूर्वमिष्टकालेसतिरात्रिखण्डंरात्र्यर्धरात्रिगतघटीभिःही नंकार्यं तदारात्रिपूर्वनतंस्यात् अथतल्लक्षणं यदादिनार्धादुपरिष्टकालस्तदासूर्यो दयादिष्टघटीषुशुद्धंशोध्यम् द्युखंडंदिनार्धादिवसेअपरंनतंपश्चिमनतंस्यात् तथा रात्र्यर्धादुपरीष्टकालेसतिसूर्यास्तादिष्टघटीषुशोध्यम् रात्र्यर्धरात्रौपाश्चिमनतंस्या त्। तात्कालिकोऽर्कःअयनांशैर्युक्तःकार्यःतस्यभुक्तभोग्यांशसंगुणादिति य दायदाऋणलग्नंसाध्यतेतदाभुक्तांशाःग्राह्याः यदाधनलग्नसाधनंक्रियतेतदाभो ग्यांशाःग्राह्याः तैस्तैःस्वोदयोगुणनीयःत्रिंशद्भक्तःरवेर्भुक्तमथवाभोग्यंयल्लब्धंत त्इष्टघटीपलेभ्यस्त्यजेत्शोधयेत् तदनंतरंशेषात्गतगम्यानिजोदयात्त्यजेत् त द्यथा यदाभुक्तकालः साध्यतेतदागुणितोदयात्पृष्ठोदयाःशोध्याः यदाभोग्य कालःसाध्यतेतदागुणितोदयात्अग्रिमोदयाःशोध्याः शोधितेयच्छेषंतत्खाग्न्या ३० हतं अशुद्धेनयःशोधितोनशुद्ध्यतिसः अशुद्धोदयः तेनभक्तंफलं अंशादिकं। तत् अशुद्धभेहीनंकार्यम् शुद्धभेयुक्तंकार्यम्। तद्यथा ऋणलग्नसाधनेधनलग्नसाधनेचमेषाद्गणनयायद्राशिसंख्यांकःअशुद्धोदयोभवति तद्राशिसंख्यामध्येलवादिकंहीनंयोज्यं तदनंतरंव्ययनांशकंअयनांशकैरहितं कार्यम् तनुःलग्नंस्यात्। एवमनयारीत्यालंकोदयैःकृत्वारवेर्भुक्तंभोग्यंसाध्य म तत्पलीकृतात्पूर्वपश्चिमनताच्छोध्यं अन्यदवशिष्टंयत्कर्मतत्प्राग्वत्पूर्वरी त्यासाध्यंतद्दशमंभवेत्। तद्यथा यदापूर्वनतंभवतितदापूर्वनतमिष्टकालंप्र

अग्रेत्रयःषडेवंतेभार्धमुक्ताःपरेऽपिषट् ॥ खेटेभावसमंपूर्णंफलसंधिसमेतुखम् ॥ २५ ॥ षष्ठांऽशयुक्तनुःसंधिरग्रेषष्ठांशयोजनात् ॥ त्रयःससंधयोभावाःषष्ठांशोनैकयुक्सुखात् ॥ २६ ॥ भुक्तंभोग्यंस्वेष्टकालान्नशुद्ध्येत्रिंश ३० न्निघ्नात्स्वोदयात्तंलवाद्यम् ॥ हीनंयुक्तंभास्करेतत्तनुःस्याद्रात्रौलग्नंभार्धयुक्ताद्रवेस्तु ॥ २७॥

कल्प्यलंकोदयैःकृत्वारवेर्भुक्तंशोध्यम् अन्याक्रियाऋणलग्नवत् यदापश्चिमनतंभवतितदापाश्चिमनतमिष्टकालंप्रकल्प्यलंकोदयैःकृत्वारवेर्भोग्यंशोध्यम् अन्यक्रिया धनलग्नवत्कार्या तद्दशमंभवेत् अथलग्नदशमभावावुक्तावन्यभावसाधनमाह सषड्भेइति । लग्नंराशिषट्कयुतंजायासप्तमभावोभवति एवंसषड्भेतुर्यश्चतुर्थभावोभवतिएवंभाव चतुष्टयंजातम् । अथलग्नोनतुर्यतःलग्नंचतुर्थभावाच्छोध्यम् शेषस्यषष्ठांवोराश्यादिस्तेनयुक्तंतनुर्लग्नंकार्यम् सलग्नद्वितीयभावयोःसंधिःस्यात् लग्नस्यविरामसंधिःस्यात् धनभावस्यारंभसंधिरितिसर्वत्रज्ञेयम् अग्रेषष्ठांशयोजनादिति सएवागतसंधिःतेनषष्ठांशेनयुक्तोऽग्रेद्वितीयभावःस्यात् द्वितीयभावःषष्ठांशयुक्तः द्वितीयतृतीयभावयोःसंधिःस्यात् अयंषष्ठांशयुक्तः तृतीयभावःस्यात् अयंषष्ठांशयुक्तःतृतीयचतुर्थभावयोःसंधिःस्यात् एवंत्रयःससंधयोभावाजाताःतदनंतरंअग्रेत्रयःससंधयोभावाःसाध्याः तद्यथा पूर्वानीतषष्ठांशंरूपमध्येसंशोध्य अनेनराश्यादिनासुखभावोयुक्तश्चतुर्थपंचमभावयोःसंधिःस्यात् अयमेवसंधिःपुनस्तेनयुक्तःपंचमभावःस्यात् अनेनयुक्तःपंचमषष्ठभावयोःसंधिःस्यात् अयंतेनयुक्तःषष्ठभावोभवति अयंतेनयुक्तःषष्ठसप्तमभावयोःसंधिःस्यात् एवंषट्ससंधयोभावाजाताः एतेभार्धयुक्ताभार्धषड्राशयःतैर्युक्ताःसंतःअवशिष्टषड्भावाःससंधयःस्युः । एवंभावसंधिनिष्पत्तिप्रयोजनमाह खेटइति । योग्रहोयद्भावस्थोभवतिनचेद्भावस्यराश्यंशकलाविकलाभिस्तुल्यःस्यात् तदासग्रहः तद्भावस्थंशुभमशुभंवाफलंपूर्णंविंशतिविश्वात्मकंददाति संधितुल्येग्रहेशून्यंफलंभवति ॥२० ॥ २१ ॥ ॥ २२ ॥ २३ ॥ २४ ॥ २५ ॥ २६ ॥ अथसूर्यस्यभुक्तमथवाभोग्यं उक्तरीत्याचानीतंयद्यदिष्टकालघटीपलेभ्योनशुद्ध्येत् त

दाकेनोपायेनलग्नसाधनंकर्तव्यमित्यतआह भुक्तमिति भुक्तंभोग्यंयदेष्टकालनाडी पलेभ्योनशुद्ध्येत् तदाइष्टनाडीपलानित्रिंशद्गुणितानिकार्याणिसायनसूर्यस्यरा श्युदयेनभाज्यानि एवंलब्धांशंग्राह्यम् तत्हीनंयुक्तंभास्करेकार्यं तद्यथायदारवे र्भुक्तमानीतंभवति तदालब्धांशफलंसूर्यमध्येहीनंकार्यम् यदाभोग्यमानीतंभव तितदालब्धांशफलंसूर्यमध्येयुक्तंकार्यम् तत्तनुःलग्नंस्यात् । रात्रौलग्नसाधनंचेत् क्रियतेतदाराशिषट्कयुक्ताद्रवेःसकाशाल्लग्नंसाध्यम् रात्रौदशमलग्नसाधनेऽपिराशि षट्कयुक्ताद्रवेःसकाशाद्भुक्तभोग्यंसाध्यम् **अत्रोदाहरणम्** अस्यजन्मभूमावुदयाः

जन्मभूम्युदयचक्रं			
	मे.	२०३	मी.
	वृ.	२३९	कुं.
	मि.	२९८	म.
	क.	३४८	ध.
	सिं	३५९	वृ.
	क.	३५३	तु.

तात्कालिकोऽर्कः ९।७।३०।६ अयनांशैः १८।२६ युक्तः ९।२५।५६।६ अस्यभोग्यांशैः ४।३।५४ मकरराशेरुदयो २९८ गुणितः १२११।२२।१२ अयंत्रिंश ३० हृतः जातोभोग्यकालः ४०।२२। ५४ अयमिष्टनाडी १२।१८।३० पलेभ्यः ७३८।३० शोधितः शेषं ६९७। १६ मकरादग्रेकुंभोदयः २३९ शेषाच्छोधितेशेषम् ४५८।३७।१६ कुंभादग्रे मीनोदयः २०३ शेषाच्छोधितेशेषम् २५५।३७।१६ मीनादग्रेमेषोदयः२०३

लंकोदयचक्रम्			
	मे.	२७८	मी.
	वृ.	२९९	कुं.
	मि.	३२३	म.
	क	३२३	ध.
	सिं.	२९९	वृ.
	क.	२७८	तु.

शेषाच्छोधितेशेषम् ५२।३७।१६ मेषादग्रेवृषभो दयः २३९ अयंशेषात् ५२।३७।१६ नशुद्ध्य ति अतःशेषम् ५२।३७।१६ खत्र्या ३० हतं १५७८।३८ अशुद्धोदयेन २३९ भक्तंलब्धं अं शादिकम् ६।३६।१८ इदमशुद्धात्पूर्वंमेषाद्गणनयाएकोराशिस्तेनयुक्तं १।६। ३६।१६इदंअयनांशैः१८।२६ हीनंजातंलग्नं०।१८।१०।१६राशिषट्कयुतंजा तंजायाभवनम् ६।१८।१०।१६॥ अथदशमलग्नस्योदाहरणम् तत्रलंकोदयाः । दिनार्धम् १२।४४ दिनगतघटीभिः १२।१८।३० हीनंजातंपूर्वनतं ०।२५। ३० अयमिष्टकालःलंकोदयैः कृत्वासायनांशसूर्यस्यभुक्तभागागुणनीयाःउपरि तनांकःत्रिंशद्धृतः लब्धंभुक्तकालः जातोभुक्तकालः २७९।१४।० अयंघटीप लेभ्यः २५।३० नशुद्ध्यति अतःशेषं २५।३० त्रिंशद्गुणितं ७६५ स्वोदये

Indira Gandhi National Centre for the Arts

अथ लग्नकुण्डली

अथ भावकुण्डली

खेटेसंधिद्वयांतस्थे फलंत द्भावजंभवेत् ॥ हीनेऽधिके द्विसंधिभ्यांभावेपूर्वापरेफल म् ॥ २८ ॥

न ३२३ भुक्तंफलंलवादिकं ४।२२।६ इदंराश्यादिसूर्यमध्ये ९।७।३०।६ हीनंजातं ९।५।८।० इदंराशिषट्कयुतं जातंसुखभवनं ३।५।८।० लग्नहीनच तुर्थभावस्यशेषं २।१६।५४।४४ इदंषड्भक्तंलब्धंराश्यादि ०।१२।४९।३७ अनेनयुक्तंलग्नंजातोलग्नस्यविरामसंधिः १।०।५९।५३ अयंषष्ठांशेनयुतोजातो द्वितीयभावः १।१३।४९।३० अयंषष्ठांशेनयुतोद्वितीयभावस्यसंधिः १।२६। ३९।७ अयंषष्ठांशेनयुतोजातस्तृतियभावः २।९।२८।४४अयंषष्ठांशेनयुतोजा तस्तृतीयभावस्यसंधिः २।२२।१८।२१ प्रागानीतषष्ठांशः ०।१२।४९।३७ अयंरूपाच्छोधितः शेषं ०।१७।१०।२३ अनेनसुखभावोयुक्तः जातःसुखभाव स्यसंधिः ३।२२।१८।२३ अयंतेनयुक्तःजातःपंचमभावः४।९।२८।४६ अयं तेनयुक्तःजातःपंचमभावस्यसंधिः ४।२४।३९।९ अयंतेनयुक्तःजातःषष्ठभावः ५।१३।४९।३२ अयंतेनयुक्तःजातोरिपुभावस्यसंधिः ६।०।५९।५५ एतेरा शिषट्कयुक्ताःअवशिष्टाःससंधयोभावाजाताःसर्वेंएकत्रलिख्यंते ॥ २७ ॥

तन्वादिद्वादशभावाः ससंधयः स्युः

त.	ध.	स.	सु.	सु.	रि.	जा.	मृ.	ध.	क.	आ.	व्य.
०	१	२	३	४	५	६	७	८	९	१०	११
१८	१३	९	५	९	१३	१८	१३	९	५	९	१३
१०	४९	२८	८	२८	४९	१०	४९	२८	८	२८	४९
१६.	३०	४४	०	४६	३२	१६	३०	४४	०	४६	३२
सं	सं.	सं.	सं.	सं.	सं.	सं.	सं.	सं.	सं.	सं.	सं.
१	१	२	३	४	६	७	७	८	९	१०	०
०	२६	२२	२२	२६	०	०	२६	२२	२२	२६	०
५९	३९	१८	१८	३९	५९	५९	३९	१८	१८	३९	५९
५३	७	२१	२३	९	५५	५३	७	२११	२३	९	५५

अथभावस्थग्रहफलम् खेटेसंधिद्वयांतस्थेइति । तद्यथा ग्रहे आरंभसंधेःस

ग्रहसंध्यंतरंकार्यंविंशत्या २० गुणितंभजेत् ॥ भावसंध्यंतरेणाप्तंफलं विंशोपकाःस्मृताः ॥ २९ ॥ भौमोशनःसौम्यशशीनवित्सितारे ज्यार्किमंदांगिरसोग्रहेश्वराः ॥ आद्याःकुजाद्यारवितोऽपिमध्य माःसितात्तृतीयाःक्रियतोदृकाणपाः ॥ ३० ॥

काशात् अधिकेसतिविरामसंधेःसकाशात् न्यूनेसतितद्ग्रहोयस्मिन्भावेवर्ततेत द्भावजंफलंभवेत् द्विसंधिभ्यांहीनेऽधिकेग्रहेसतिपूर्वापरभावेफलंभवेत् तद्यथा आरंभसंधेःसकाशात्ग्रहेहीनेसति यद्भावोवर्ततेतद्भावात्पूर्वभावस्यफलंददाति यदाविरामसंधेःसकाशाद्ग्रहोऽधिकोभवति तदाअग्रिमभावस्यफलंददाति॥२८॥ अथग्रहाणांविंशोपकात्मकभावफलमाह उदाहरणमेवव्याख्या सूर्यः९।७।३०।६

अथ द्रेक्काणचक्रंलिख्यते.

श्री	मे	वृ	मि	क	सिं	क	तु	वृ	ध	म	कुं	मी
१०	मं	शु	बु	चं	सू	बु	शु	मं	गु	श	श	गु
२०	सू	चं	मं	बु	गु	शु	श	सू	सो	मं	बु	गु
३०	शु	श	सू	सो	मं	बु	गु	शु	श	सू	सो	मं

अस्यसंधिः ९।२२।१८।२३ अनयोरंतरं १४।४८।१७ विंश त्या २०गुणितं २९।६।५।४०। भावः ९।५।८।०संधिः९।२२। १८।२३अनयोरंतरेण१७।२०।२३भजेत्अथसवर्णितोभाज्यः।१०६५९४० भाजकः ६१८२३ भाजकेनहृतेभाज्ये यदाप्तंफलंतदेवविंशोपकाःस्मृताः १७। १४ एवंचंद्रादीनाम् । इतिरव्यादीनांविंशोपकात्मकानिभावफलानि ॥ २९ ॥ अथग्रहाणांबलाबलंवक्ष्यति।तच्चग्रहबलमधिकारंविनान अतस्तद्बलसाधना यादौराशीशद्रेक्काणेशानाह भौमेति । मेषस्यभौमः वृषस्योशनाःशुक्रः मि थुनस्यसौम्योबुधः कर्कस्यशशीचंद्रः सिंहस्यइनःरविः कन्यायाःवित्बुधःतुला याःसितःशुक्रः वृश्चिकस्यारोभौमः धनुषःईज्योगुरुः मकरस्यार्किः शनिः कुंभ स्यमंदःशनिः मीनस्यांगिराःगुरुः एतेग्रहेश्वराद्वादशराशिस्वामिनोभवंति । अथद्रेक्काणस्वामिनउच्यंते आद्याइति । राशेस्तृतीयांशोदशांशात्मकोद्रेक्काण उच्यते । एकस्मिन्राशौत्रयोद्रेक्काणाः अतःएकस्मिन्राशौकियत्संख्याकोद्रेक्का णोस्तीतिविचार्यः प्रथमश्चेत्तर्हिभौमात् द्वितीयश्चेद्रवेः तृतीयश्चेच्छुक्रात् अन सारीत्याक्रियतःमेषादिद्वादशराशिषुद्रेक्काणस्वामिनोभवंति। इतिद्रेक्काणचक्रम् ३०

सूर्यादितुंगर्क्षमजोक्षनक्रकन्याकुलीरांत्यतुलालवैःस्युः ॥ दिग्भि गुणैरष्टयमैःशरैकैर्भूतैर्भसंख्यैर्नखसंमितैश्च ॥ ३१ ॥ तत्सप्तमंनीचम नेनहीनोग्रहोऽधिकश्चेद्रसभाद्विशोध्यः ॥ चक्रात्तदंकांशलवोबलं स्यात्क्रियेणतौलींदुभतोनवांशाः ॥ ३२ ॥ मेषेंगतर्काष्टशरेषुभा गाजीवास्फुजिज्ज्ञारशनैश्चराणाम् ॥ वृषेष्टषण्णागशराऽनलांशाः शुक्रज्ञजीवार्किकुजेशहद्दाः ॥ ३३ ॥

अथग्रहाणामुच्चनीचराशीन् भागांश्चाह सूर्यादीति । सूर्यादीनांग्रहाणांतुंगर्क्ष उच्चाराशयःस्युः । सूर्यस्यअजःमेषःउच्चंदिग्भिर्दशभिरंशैः चंद्रस्यउक्षावृषःउच्चं गुणैस्त्रिभिरंशैः भौमस्यनक्रोमकरःउच्चंअष्टयमैरष्टाविंशतिभिरंशैः बुधस्यकन्या उच्चंशरैकैःपंचदशभिरंशैः गुरोःकुलीरःकर्कःउच्चंभूतैःपंचभिरंशैः शुक्रस्यांत्यो

अथ ग्रहाणामुच्चनीचानि.							
सू	चं	मं	बु	गु	शु	श	ग्रहाः
० १०	१ ३	९ २८	५ १५	३ ५	११ २७	६ २०	उच्चानि ।
६ १०	७ ३	३ २८	११ १५	९ ५	५ २७	० २८	नीचानि ।

मीनःउच्चंभसंख्यैःसप्तविंशतिभिरंशैः शनेस्तु लाउच्चंनखसंमितैर्विंशतिभिरंशैः परमोच्चमिति सर्वत्रज्ञेयम् । इत्युच्चानि ॥ ३१ ॥ **अथग्रहाणांनीचस्थानम्** ॥ उच्चबलानयनंनवांशस्वामिन श्चाह—तदिति । तेषांसूर्याद्युच्चराशीनांसप्तमस्तुलादिकोराशिर्नीचम् । अंशाश्चतएव यथा सूर्यस्यतुलानीचंदशभिरंशैः परमंनीचमितिसर्वत्रपूर्ववत् एवं चंद्रादीनामपिज्ञेयम् । इतिनीचानि । **अथोच्चबलम्** । अनेननीचेनग्रहोहीनः कार्यःचेद्रसभादधिकःषडधिकः तदाचक्राद्द्वादशराशिभ्यःशोध्यः शेषस्यांशाःकार्याःनवभिर्भाज्याः लब्धंकलादिउच्चबलंस्यात् । इत्युच्चबलम् । **अथनवांशेशाउच्यंते** । क्रियोमेषः एणोमकरः तौलिस्तुला इंदुभंकर्कः एतेमेषादिराशीनांत्रिरावृत्त्या

अथाद्यचक्रम.			
मे	वृ	मि	क
सिं	क	तु	वृ
ध	म	कुं	मी

आद्याःभवंति तेयथा मेषसिंहधनूराशीनामाद्योमेषः वृषकन्यामकरराशीनामाद्योमकरः मिथुनतुलाकुंभराशीनामाद्यातुला कर्कवृश्चिकमीनराशीनामाद्यःकर्कः अत्रराशिस्वामिनएवनवांशस्वामिनइत्यर्थः । इत्याद्यचक्रम् ॥ ३२ ॥ अथषड्भिःश्लोकैर्मेषादिद्वादशराशिषुहद्देशानाह अंकस्थापनमेवव्याख्या । साय

युग्मेषडंगेषुनगांगभागाःसौम्यास्फुजिज्जीवकुजार्किहद्दाः ॥ कर्के द्रितर्कांगनगाब्धिभागाःकुजास्फुजिज्ज्ञेज्यशनैश्चराणाम् ॥ ३४ ॥ सिंहेंगभूताद्रिरसांगभागादेवेज्यशुक्रार्किबुधारहद्दाः ॥ स्त्रियोनगाशाब्धिनगाक्षिभागाःसौम्योशनोजीवकुजार्किनाथाः ॥ ३५ ॥ तुलेरसाष्टाद्रिनगाक्षिभागाःकोणज्ञजीवास्फुजिदारनाथाः ॥ कीटेनगाब्ध्यष्टशरांगभागाभौमास्फुजिज्ज्ञेज्यशनैश्चराणाम् ॥ ३६ ॥ चापेरवीष्वंबुधिपंचवेदाजीवास्फुजिज्ज्ञारशनैश्चराणाम् ॥ मृगेनगाब्ध्यष्टयुगश्रुतीनांसौम्येज्यशुक्रार्किकुजेशहद्दाः ॥ ३७ ॥ कुंभेनगांगाद्रिशरेषुभागाःशुक्रज्ञजीवारशनैश्चराणाम् ॥ मीनेऽर्कवेदाऽनलनंदपक्षाःसितेज्यसौम्यारशनैश्चराणाम् ॥ ३८ ॥ त्रिंशत्स्वभेविंशतिरात्मतुंगेहद्देक्षचंद्रादशकंद्दकाणे ॥ मुसल्लहेपंचलवाः प्रदिष्टाविंशोपकावेदलवैःप्रकल्प्याः ॥ ३९ ॥

था । मेषराशौप्रथमषडंशानांजीवोगुरुः ततःषडंशानामास्फुजिच्छुक्रः ततोऽष्टानामंशानांज्ञोबुधः ततःपंचांशानामारोभौमः ततःपंचांशानांशनैश्चरःस्वामीएवमेव वृषादिष्वपिज्ञेयम् ॥ इतिहद्देशाचक्रम् ॥ ३३ ॥ ३४ ॥ ३५ ॥ ३६ ॥ ३७ ॥ ३८ ॥

अथ मेषादिराशिविभागयुक्ता हद्देशाः

मे	वृ	मि	क	सिं	क	तु	वृ	ध	म	कुं	मी
गु ६	शु ८	बु ६	मं ७	गु ६	बु ७	श ६	मं ७	गु १२	बु ७	शु ७	शु १२
शु ६	बु ६	शु ६	शु ६	शु ५	शु १०	बु ८	शु ४	शु ५	गु ४	बु ६	गु ४
बु ८	गु ८	गु ५	बु ६	श ७	गु ४	गु ७	बु ८	बु ४	शु ८	गु ७	बु ३
मं ५	श ५	मं ७	गु ७	बु ६	मं ७	शु ७	गु ५	मं ५	श ४	मं ५	मं ९
श ५	मं ३	श ६	श ४	मं ६	श २	मं २	श ६	श ४	मं ४	श ५	श २

अथपंचवर्गीबलमाह त्रिंशत्स्वभइति । स्वभेस्वराशौग्रहे ३० त्रिंशल्लवाः बलम् स्वोच्चस्थे २० विंशतिर्बलम् । स्वहद्दास्थे १५ पंचदशबलम् । स्वद्दकाणस्थे १० दशबलम् । मुसल्लहेस्वनवांशे ५ पंचलवाःप्रदिष्टाउक्ताः । वेदलवैःबल-

Indira Gandhi National Centre for the Arts

स्वस्वाधिकारोक्तबलंसुहृद्भेपादोनमर्धंसमभेरिभेंत्रिः ॥ एवंसमा नीयबलंतदैक्येवेदोद्धृतेहीनबलःशरोनः ॥ ४० ॥

स्यचतुर्भांशोविंशोपकाःप्रकल्प्याः ॥३९॥ यदाग्रहःस्वगृहस्वोच्चस्वहद्दास्वद्रेक्का णनवांशेषुपंचस्वधिकारेषुकुत्रापिनास्तितदाबलमाह स्वस्वाधिकारेइति । स्वस्वा धिकारोक्तबलस्यविभागः।सुहृद्भेमित्रगृहेपादोनंचतुर्थांशोनंबलंग्राह्यम् समभेसम स्यगृहेअर्धम् अरिभेशत्रुगृहेत्रिश्चतुर्थांशोबलंस्यात् । तद्यथा ग्रहस्यस्वगृहेत्रिं शल्लवाःबलंस्यात् मित्रगृहेपादोनंसार्धद्वाविंशतिः २२।३० जाताः समभेऽर्धे पंचदश १५ जाताः शत्रुगृहेचतुर्थांशःसार्धाःसप्त ७।३० जाताः । तथास्वहद्दा यांपंचदश १५ लवाबलम् मित्रहद्दायांसपादाःएकादश ११।१५ जाताः समहद्दायांसार्धाःसप्त ७।३० शत्रुहद्दायांपादोनाश्चत्वारः ३।४५ । तथास्वद्रे क्काणेदश १० लवाबलम् मित्रद्रेक्काणेसार्धाःसप्त ७।३० समद्रेक्काणेपंच ५ । शत्रुद्रेक्काणेसार्धद्वयं २।३० । एवंस्वनवांशेपंच ५ लवाबलम् मित्रनवा शेपादोनाश्चत्वारः ३।४५ समनवांशेसार्धद्वयं २।३० शत्रुनवांशेसपादमे कम् १।१५ बलंस्यात् । एवंपंचवर्गीबलंसमानीयतदैक्येपंचानांयोगेवेदोद्धृ तेचतुर्भिर्भक्तेयल्लब्धंतद्विंशोपकात्मकंग्रहाणांबलंभवति शरोनःपंचभ्योन्यूनः हीनबलोग्रहोज्ञेयः । उक्तंच-पंचाल्पोहीनवीर्यःस्यादधिकोमध्यउच्यते ॥ दशाधिकोबलीप्रोक्तःपंचवर्गीबलादिदम् ॥ अथक्रमप्राप्तमुदाहरणप्रदर्शनार्थं वक्ष्यमाणमित्रसमशत्रवोलिख्यंते । **उदाहरणम्**-सूर्यः ९।७।३०।६ अस्य मकरराशौस्थितत्वात्गृहेशःशनिः अयंसूर्यस्यशत्रुः अतःकारणात्गृहेप्राप्तंबलं सार्धाःसप्त ७।३० **अथोच्चबलम्**-सूर्यस्यनीचम् ६ । १० अनेनहीनोरविः २।२७।३०।६ अस्यांशाः ८७।३०।६ नवभिर्भक्ताः जातंसूर्योच्चबलम् । ९।४३ ॥ **अथहद्देशबलं**-मकरराशौसूर्यस्यसप्तांशाःत्रिंशत्कलाःविद्यंते मकर- राशौहद्दायांआदौसप्तांशाः अयंसप्ताधिकोऽग्रिमसप्तमध्येवर्ततेइतिकारणात् जातोहद्देशोगुरुः अयंसूर्यस्यसमोभवति समहद्दायांप्राप्तंबलम् ७।३० ॥

क्षेत्रंहोरात्र्यब्धिपंचांगसप्तवस्वंकांशेशार्कभागाःसुधीभिः ॥ विज्ञातव्यालग्नसंस्थाःशुभानांवर्गाःश्रेष्ठाःपापवर्गास्त्वनिष्टाः ॥ ४१ ॥ ओजेरवींद्वोःसमइंदुरव्योर्होरेगृहार्धप्रमितेविचिंत्ये ॥ द्रेक्काणपाः स्वेषुनवर्क्षनाथास्तुर्यांशपाःस्वर्क्षजकेंद्रनाथाः ॥ ४२ ॥

अथत्रैराशिकबलम् मकरराशौप्रथमदशकमध्येवर्ततेतदीशोगुरुः अस्यसमत्वात्प्राप्तं त्रैराशिकंबलम् ५।१० **अथमुसल्लहबलम्** । नवांशगणनयाजातोमुसल्लहेशोगुरुः अस्यसमत्वात्प्राप्तंनवांशकबलम् २।३० पंचानांयोगः ३२।१३ चतुर्भिर्भक्तः जातंसूर्यस्यविश्वात्मकंबलम् ८।३ एवमेवचंद्रादीनामपिज्ञेयम् ॥ ॥ ४० ॥ **अथद्वादशवर्गीचक्रमाह** क्षेत्रमिति । क्षेत्रंगृहम् होरा त्रिलवः

अथ पंचवर्गीचक्रं					
ग्र	धी	स्व	मि	स	श
मि	गृ	३० ०	२२ ३०	१५ ०	७ ३०
स	ह	१५ ०	११ १५	७ ३०	३ ४५
श	त्रै	१० ०	७ ३०	५ ०	२ ३०
नवांशः	मु	५ ०	३ ४५	२ ३०	१ १५

अथ द्वादशवर्गीचक्रं						
सू	चं	मं	बु	गु	शु	श
चं	सू शु	श	श	श	चं सू	मं बु गु
मं बु गु	श	सू शु	सू शु	सू बु बु	मं बु गु शु	चं शु
श	मं बु गु	चं बु गु	चं मं गु	च मं शु	०	सू

चतुर्लवः पंचलवः षड्लवः सप्तलवः अष्टलवः अंकलवः दशलवः एकादशलवः द्वादशलवः एतेद्वादशभागाः लग्नसंस्था लग्नसमयेविद्यमानग्रहाणां सुधीभिः विज्ञातव्याः । शुभानांशुभग्रहाणांवर्गाःश्रेष्ठाःशुभफलदाज्ञेयाः पापग्रहाणांवर्गाश्चेत्स्युः तदाअनिष्टाः दुष्टफलदाज्ञेयाः ॥ ४१ ॥ **अथहोराद्रेक्काणतुर्यांशानामधीशानाह** तत्रादौहोरेशानाह ओजेइति । ओजेविषमराशौगृहार्धंपंचदशभागाःतत्प्रमितेतत्प्रमाणे रवींद्वोर्होरेविचिंत्येज्ञेये । तद्यथा । प्रथमपंचदशभागमध्येसूर्यस्यतदनंतरंचंद्रस्य । तथासमेसमराशौ चंद्ररव्योर्विचिंत्ये[1] ॥ **अथद्रेक्काणेशाउच्यंते** । राशेस्त्रिभागोदशांशपरिमितो द्रेक्काणोज्ञेयः यस्यद्रेक्काणविचारःक्रियते सचेत्प्रथमविभागमध्येतदासयस्मिन्

---

१ विषमराशौ पूर्वपरार्धभागस्य होरयोरीशौ रवींदू तथा समराशौ पूर्वपरार्धभागस्य होरयोरीशौ इंदुरवी इति ज्ञेयम् ।

ओजर्क्षेपंचमांशेशाःकुजार्कीज्यज्ञभार्गवाः ॥ समभेव्यत्ययाज्ज्ञेया द्वादशांशाःस्वभात्स्मृताः ॥ ४३ ॥ लवीकृतोव्योमचरोंगशैलव स्वंकदिग्रुद्रगुणाःखराभैः ॥ भक्तोगतास्तर्कनगाष्टनंददिग्रुद्रभागाः कुयुताःक्रियात्स्युः ॥ ४४ ॥

राशौतिष्ठति तद्राशिस्वामिनएवद्रेक्काणाधीशत्वम् । द्वितीयद्रेक्काणश्चेत्तदा स्वराशितःपंचमोयोराशिस्तत्स्वामिनएवद्रेक्काणेशत्वम् । तथा तृतीयद्रेक्काण श्चेत्तदास्वराशेःसकाशान्नवमोयोराशिः तत्स्वामिनएवद्रेक्काणाधीशत्वम् ॥ **अथ तुर्यांशस्वामिनउच्यंते**—स्वर्क्षजकेंद्रनाथाइति ॥ स्वर्क्षग्रहाधिष्ठितोयोराशि स्तस्माज्जातानि[1]केंद्राणितन्नाथाःचतुर्थांशस्वामिनः । तद्यथा । राशेस्त्रिंशदं शास्तस्यचतुर्थांशः सार्धाःसप्त ७।३० तत्रप्रथमविभागमध्ये ७।३० स्वर्क्ष स्वराशिस्वामिनएवाधिपत्यं । द्वितीयविभागमध्ये १५।० केंद्रनाथः स्वरा शेःसकाशात् स्वचतुर्थोयोराशिः तत्स्वामिनएवाधिपत्यम् । तृतीयविभागमध्ये २२।३० स्वराशेःसकाशात्सप्तमोयोराशिः तत्स्वामिनएवाधिपत्यम् । चतुर्थवि भागमध्ये ३० स्वराशेःसकाशाद्दशमोयोराशिः तत्स्वामिनएवाधिपत्यम् ॥ ४२ ॥ **अथपंचमांशेशद्वादशांशेशानाह** ओजर्क्षेइति । पंचमांशप्रमाणं षडंशाः ६ एवंराशौपंचभवंति तत्रौजर्क्षेविषमराशौ प्रथमपंचमांशस्वामीकुजःद्वि तीयपंचमांशस्वामीआर्किःशनिः तृतीयपंचमांशस्वामीईज्योगुरुः चतुर्थपंचम स्वामीज्ञोबुधः पंचमपंचमांशस्वामीभार्गवःशुक्रः । समभेसमराशौव्यत्यया द्विपरीताज्ञेयाः । तद्यथा । समराशौप्रथमपंचांशस्वामीशुक्रः द्वितीयपंचां शस्वामीबुधः तृतीयपंचांशस्वामीगुरुः चतुर्थपंचांशस्वामीशनिः पंचमपंचां शस्वामीभौमः । **अथद्वादशांशस्वामिनउच्यंते**—द्वादशांशाः स्वभात्स्वराशेः सकाशात्स्मृताः तद्यथा—द्वादशांशप्रमाणंसार्धमंशद्वयं २।३० एवंराशौद्वादशभ वंति तेयथा। एतत्प्रमाणेनयत्संख्येंशेग्रहस्तिष्ठति स्वराशितस्तत्संख्यराशेर्द्वादशां शेशोज्ञेयः ॥ ४३ ॥ अथषट्सप्ताष्टनवदशैकादशांशेशानयनमाह । लवीकृत

---

[1] प्रथमचतुर्थसप्तमदशमानिइति

इति। व्योमचरोग्रहोलवीकृतःयथाराशयस्त्रिंशद्गुणिताःअधःस्थितांशयुताः एवं ग्रहोंऽशात्मकःकार्यः षट्स्थानेस्थाप्यः क्रमेण अंग ६ शैल ७ वसु ८ अंक ९ दिक् १० रुद्र ११ गुणाः सतत्रखरामैः ३० त्रिंशताभक्तोयल्लब्धंतेगता स्तर्कनगाष्टनंददिग्रुद्रभागाभवंति एतेकुयुताःएकयुक्ताःसंतः क्रियान्मेषमारभ्यग णनायांयत्रविश्रांतिः तद्राशिस्वामीतद्वर्गस्यज्ञेयः एकयुक्तलब्धंयदिद्वादशाधि कंभवतितदाद्वादशभिः १२ तष्टंकार्यम् **उदाहरणम्** सूर्यः ९।७।३०।६ एतस्य मकरराशौस्थितत्वात्गृहेशः शनिः॥ अथहोरामकरराशौप्रथमपंचदशभाग मध्येऽस्ति अतोहोरेशःचंद्रः। अत्रत्रिलवःसूर्यः प्रथमभागमध्येऽस्ति अतोद्रे ष्काणाधीशः शनिः। अथचतुर्लवः सूर्योद्वितीयचतुर्थांशमध्येवर्तते अतःकार णात् मकरराशेःसकाशात्चतुर्थोराशिर्मेषः तत्स्वामीभौमः एवंचतुर्लवस्वामी भौमः। अथपंचमांशःसूर्यः समराशौद्वितीयविभागमध्येवर्ततेअतः पंचमांशः स्वामीबुधः। अथषडंशः सूर्यस्यांशाः २७७।३०।६ षड्गुणिताः जाताः १६६५०।३६ त्रिंशद्भक्ताः लब्धं ५५ कु १ युक्तं ५६ द्वादशभि १२ स्तष्टं शेषं ८ मेषाद्गणनयाजातोवृश्चिकराशिः तत्स्वामीभौमः एवंजातःषडंशः स्वामी भौमः। अथसप्तांशः अंशाः २७७।३०।६ सप्तभिर्गुणिताः १९४२।३०।४२ त्रिंशद्भक्ताः लब्धं ६४ कुयुक्तं ६५ द्वादशभि १२ स्तष्टंशेषं ५ मेषा द्गणनयाजातः सिंहराशिः तत्स्वामीसूर्यः एवंजातःसप्तांशःस्वामीसूर्यः। अ थाष्टांशः अंशाः२७७।३०।६ अष्टभिर्गुणिताः २२२०।०।४८ त्रिंशद्भक्ताः लब्धं ७४ कुयुतं ७५ द्वादशभि १२ स्तष्टं शेषं ३ मेषाद्गणनयाजातो मिथुनराशिः तत्स्वामीबुधः एवमष्टमांशः स्वामी बुधः। अथनवांशः अंशाः २७७।३०।६ नवभिर्गुणिताः २४९७।३०।५४ त्रिंशद्भक्ताः लब्धं ८३ कुयुतं ८४ द्वादशभि १२ स्तष्टं शेषं० मेषाद्गणनयाजातोमीनराशिः तत्स्वामीगुरुः एवंजातोनवांशः स्वामीगुरुः। अथदशांशः अंशाः२७७।३०।६ नवभिर्गुणिताः २७७५।१।० त्रिंशद्भक्ताः लब्धं ९२ कुयुतं ९३ द्वादशभि १२ स्तष्टं शेषं९

एवंद्वादशवर्गीस्याद्ग्रहाणांबलसिद्धये ॥ स्वोच्चमित्रशुभाःश्रेष्ठानी चारिक्रूरतोऽशुभाः ॥ ४५ ॥ एवंग्रहाणांशुभपापवर्गपंक्तिद्वयंवी क्ष्यशुभाधिकत्वे ॥ दशाफलंभावफलंचवाच्यंशुभंत्वनिष्टंत्वशुभा धिकत्वे ॥ ४६ ॥

मेषाद्गणनयाजातोधनूराशिः तत्स्वामीगुरुः एवंजातोदशांशस्वामीगुरुः । अथै-कादशांशः २७७।३०।६ इमेएकादशभिर्गुणिताः ३०५२।३१।६ त्रिंशद्भक्ताः लब्धं १०१ कुयुतं १०२ द्वादशभि १८ स्तष्टं शेषं ६ मेषाद्गणनयाजातः कन्याराशिः तत्स्वामीबुधः एवंजातः एकादशस्वामीबुधः अथद्वादशांशः २ एवंद्वादशांशविभागगणनयाचतुर्थविभागमध्येवर्ततेअतःकारणात्मकराद्गणनया

एतत्पंचवर्गीचक्रंलिख्यते.

ग्रहाः	सूर्यः	चंद्रः	भौमः	बुधः	गुरुः	शुक्रः	शनिः	ग्रहाः
गृ०	७ ३०	७ ३०	७ ३०	७ ३०	३० ०	१५ ०	१५ ०	गृ०
उ०	९ ४३	४ ३२	१५ १०	१० १८	० ३६	६ २३	१८ ३२	उ०
हृ०	७ ३०	४ ४५	७ ३०	७ ३०	१५ ०	७ ३०	१५ ०	हृ०
त्रै०	५ ०	२ ३०	२ ३०	२ ३०	७ ३०	१० ०	५ ०	त्रै०
मु०	२ ३०	५ ०	२ ३०	१ १५	५ ०	२ ३०	३ ४५	मु०
यो०	३२ १३	२३ १७	३५ १०	२९ ३	५८ ६	४१ २३	५७ १७	यो०
वि०	८ ३	५ ४९	८ ४७	७ १५	१५ ३१	१० २०	१४ १९	वि०

जातश्चतुर्थोमेषराशिः तत्स्वामीभौमः एवं जातोद्वादशांशस्वामी भौमःएवंचंद्रादीनाम पिज्ञेयम् ॥ ४४ ॥ अथ द्वादशवर्ग्युपसं हारंतत्फलंचाह। एव मिति । एवंग्रहाणांब लसिद्धयेद्वादशवर्गी स्यात् साद्वादशवर्गी स्वोच्चमित्रशुभाःश्रेष्ठानीचारिक्रूरतोअशुभाश्च । तद्यथा । यस्यग्रहस्यद्वाद शवर्गी क्रियतेसचेत्स्वगृहादिषु अथवास्वोच्चवर्गे अथवा शुभग्रहस्यवर्गेतिष्ठति तदाश्रेष्ठाशुभफलदात्री तथा सग्रहोयदिनीचवर्गे अथवाशत्रुवर्गे अथवापापग्र हस्यवर्गेवातिष्ठतितदाअशुभादुष्टफलदात्री ॥ ४५ ॥ अथद्वादशवर्ग्याशुभपा पग्रहवर्गफलनिर्णयःकथंस्यादित्यतआह एवमिति। एवंग्रहाणांशुभपापवर्गपंक्ति

Indira Gandhi National Centre for the Arts

क्रूरोऽपिसौम्योधिकवर्गशालीशुभोतिसौम्यःशुभखेचरश्चेत् ॥ सौम्योऽपिपापाधिकवर्गयोगान्नेष्टोऽतिनिंद्यःखलुपापखेटः ॥ ४७ ॥

इयंवीक्ष्य तद्यथा पूर्वोक्तप्रकारेणग्रहाणांद्वादशवर्गीकार्या तत्रग्रहहोरादिद्वादशस्थानेषुकियंतःशुभग्रहवर्गाः पापवर्गाश्चकियंतइतिविचार्य शुभग्रहसंख्याभिन्नालेख्यापापग्रहसंख्याभिन्नालेख्या पंक्तिद्वयस्यांतरंकार्यम् इति । यदिअशुभाधिकत्वंशुभग्रहस्यशेषमवशिष्टंतदातद्ग्रहस्यदशाफलं भावफलंचशुभमेववाच्यम्

एतत्द्वादशवर्गीचक्रम्.							
र	चं	मं	बु	गु	शु	श	ग्रहाः
श	बु	गु	गु	गु	मं	सू	प्रथ.
चं	सू	सू	सू	चं	सू	सू	द्वि.
श	शु	शु	मं	शु	चं	शु	तृ.
मं	गु	गु	गु	बु	सू	शु	चतु.
बु	श	गु	गु	शु	मं	शु	पंच
मं	श	बु	शु	बु	श	शु	षडं.
सू	शु	गु	श	बु	शु	मं	सप्त.
बु	श	शु	मं	शु	बु	शु	अष्ट.
गु	चं	सू	चं	शु	श	गु	नव.
शु	श	सू	मं	बु	श	गु	दश.
बु	चं	श	गु	बु	शु	गु	एका.
मं	शु	शु	मं	मं	सू	गु	द्वाद.

द्वादशांशचक्रम्.											
१	२	३	४	५	६	७	८	९	१०	११	१२
२	५	७	१०	१२	१५	१७	२०	२२	२५	२७	३०
३०	०	३०	०	३०	०	३०	०	३०	०	३०	[illegible]

यदिअशुभाधिकत्वं अशुभग्रहस्यशेषमवशिष्टंतदातद्ग्रहस्यदशाफलंभावफलंचाशुभमेववाच्यम् ॥ ४६ ॥ अथग्रहभेदेनसौम्यपापवर्गभेदेनचफलतारतम्यमाह । क्रूरोपीति । यस्यग्रहस्यद्वादशवर्गिकाक्रियतेसचेत्क्रूरोपि यदिपापग्रहोपि भवति द्वादशवर्ग्यांसौम्यग्रहाधिकवर्गेण शालतेयुक्तोभवतितदाशुभःशुभफलदः । शुभखेचरश्चेत् तद्यथा यस्यग्रहस्यद्वादशवर्गिकाक्रियतेसयदिशुभग्रहोभवतिद्वादशवर्ग्यांशुभग्रहाधिकवर्गप्राप्तोभवति तदाऽतिसौम्यः अत्यंतशुभफलदाता । सौम्योऽपिपापाधिकवर्गयोगान्नेष्टः । तद्यथा यस्यद्वादशवर्गीकाक्रियद्ये सयदिशुभग्रहोभवति द्वादशवर्ग्यांपापग्रहाधिकवर्गप्राप्तोभवति तदानेष्टःअशुभफलदः । पापखेटः तद्यथा यस्यद्वादशवर्गिकाक्रियतेसयदिपापग्रहोभवतिद्वादशवर्ग्यांपापग्रहाधिकवर्गप्राप्तोभवति तदाअतिनिंद्यः

राशीशमित्रोच्चरिपुक्रमेणचिंत्यंतनोरप्यनयैवरीत्या ॥ भावेषुसर्वे ष्वपिवर्गचक्रंविलोक्यतत्तत्फलमूहनीयम् ॥ ४८ ॥ शरीरवर्णचि ह्नायुर्वयोमानंसुखासुखम् ॥ जातिःशीलंचमतिमाँल्लग्नात्सर्वंविचिं तयेत् ॥ ४९ ॥ सुवर्णरूप्यरत्नानिधातुर्द्रव्यंसखाधने ॥ विक्रमे भ्रातृभृत्याध्वपित्र्यस्खलनसाहसम् ॥ ५० ॥ पितृवित्तंनिधिक्षेत्रं गृहंभूमिश्चतुर्यतः॥पुत्रेमंत्रधनोपायगर्भविद्यात्मजेक्षणम् ॥ ५१ ॥

अत्यंतदुष्टफलदाता ॥ ४७ ॥ **अथद्वादशभावानांशुभाशुभफलमाह** राशीशेति । तनोर्लग्नस्याप्यनयैवरीत्याशुभग्रहाधिकवर्गशालित्वेनशुभाशुभफ लंचिंत्यंविचार्यम् । यथायदिलग्नंशुभग्रहाधिकवर्गशालिस्यादथवालग्नस्वामीशुभ ग्रहःसन्मित्रगृहेस्वगृहेस्वोच्चेवा तदाशुभफलंज्ञेयम् । यदिलग्नस्वामीसम गृहेवर्तते तदाशुभाशुभफलाभावः । यदिलग्नंपापग्रहाधिकवर्गशालिस्यादथवा स्वामीपापग्रहःसन्शत्रुगृहेनीचेवा तदाशुभंफलंज्ञेयम् । एवंसर्वेष्वपिभावेषुल ग्नादिद्वादशभावेषुचवर्गचक्रंद्वादशवर्गिकाकार्या तांदृष्ट्वाभावस्यशुभाशुभफल मनयैवरीत्याऊहनीयंविचारणीयम् ॥ इतिद्वादशवर्गिका ॥ ४८ ॥ **अथलग्ने किंविचार्यमित्यतआह** शरीरेति । वर्षलग्नंप्रश्नलग्नंचांगीकृत्यशरीरादिसर्वं विचार्यम् । तद्यथा—स्वशरीरंकृशंपुष्टंच वर्णःरक्तःश्वेतःशुकतनुनिभइत्यादि चिह्नंमशकादि आयुर्जीवनंकियत् वयोमानंबाल्यंयौवनंवार्धकमिति सुखं असु खंदुःखं जातिःब्राह्मणादिः शीलमाचरणं एवं मतिमान्बुद्धिमान् लग्नात्सर्वंविचिंत येत्॥४९॥**अथधनभवनेकिंविचार्यमित्यतआह** सुवर्णेति। सुवर्णरूप्यरत्ना नि धातुःगैरिकादिः द्रव्यंकांस्यादि सखामैत्रीविचारः धनेधनभवने एतावद्विचार्यं **अथसहजभवनेकिंविचार्यमित्यतआह** विक्रमइति । विक्रमेसहजभवनेए तावद्विचार्यम् भ्रातासहजःभृत्यः सेवकः अध्वायानं पित्र्यंपितुःसंबंधि स्ख लनंकार्यभ्रंशः साहसंसाहसकर्म एतानिसहजभवनेविचार्याणि ॥ ५० ॥ **अथचतुर्थभवनेकिंविचार्यमित्यतआह** पितृवित्तमिति । पितृवित्तंपितुर्द्र व्यम् निधिःनिक्षिप्तवस्तु क्षेत्रंकृष्यादि गृहम् भूमिः तुर्यतःचतुर्थभवनेएतावद्विचा

IGNCA RAR
ACC No. 232

रिपौमातुलमांद्यारिचतुष्पाद्बंधभीर्व्रणान् ॥ द्यूनेकलत्रवाणिज्य नष्टविस्मृतिसंकथा ॥ हृताध्वकलिमार्गादिचिंत्यंद्यूनेग्रहोऽशुभः ॥ ५२ ॥ मृत्यौचिरंतनंद्रव्यंमृतवित्तंरणोरिपुः ॥ दुर्गस्थानंमृतिर्नष्टंपरीवारोमनोव्यथा ॥ ५३ ॥ धर्मेरतिस्तथापंथाधर्मोपायं विचिंतयेत् ॥ व्योम्निमुद्रांपरंपुण्यंराज्यंवृद्धिंचपैतृकम् ॥ ५४ ॥ आयेसर्वार्थधान्यार्घकन्यामित्रचतुष्पदाः ॥ राज्ञोवित्तंपरीवारो लाभोपायांश्चभूरिशः ॥ ५५ ॥

र्यम्।अथपंचमभवनेकिंविचार्यमित्यतआह पुत्रइति।पुत्रेपंचमभवनेएतावद्विचार्यम् । मंत्रः धनोपायः गर्भः विद्या आत्मजःपुत्रः एतेषांईक्षणमवलोकनंकार्यम् ॥ ५१ ॥ अथषष्ठभवनेकिंविचार्यमित्यतआह रिपाविति। रिपौषष्ठभवनएतावद्विचार्यम् मातुलः मांद्यंरोगः अरिःशत्रुः चतुष्पाद्गवादि बंधःपराश्रयः भीर्भयम् व्रणःक्षतम् इति । अथसप्तमभवनेकिंविचार्यमित्यतआह।द्यूनइति ।द्यूनेसप्तमभवनेएतावद्विचार्यम् कलत्रंजाया वाणिज्यंवाणिकर्म नष्टंनष्टवस्तु विस्मृतिःविस्मरणं एतेषांसंकथाकथनं हृतंहृतद्रव्यंतस्य अध्वामार्गविचारः कलिःकलहविचारः मार्गादियात्राविचारः द्यूनेसप्तमभवनेशुभःपापोवाविद्यमानोग्रहः अशुभःअनिष्टफलदः ॥ ५२ ॥ अथाष्टमभवनेकिंविचार्यमित्यतआह मृत्याविति। मृत्यौअष्टमस्थानेएतावद्विचार्यम् । चिरंतनं द्रव्यंप्राचनिद्रंव्यम्।मृतवित्तंमृतस्यवित्तम् रणःसंग्रामः रिपुःशत्रुः दुर्गस्थानं मृतिर्मरणम् नष्टंनष्टवस्तु परीवारःकुटुंबम् मनोव्यथामानसीव्यथा ॥५३॥ अथनवमभवनेकिंविचार्यमित्यतआह धर्मइति । धर्मेनवमस्थानेएतावद्विचार्यम् रतिःक्रीडा पंथाःयात्राविचारः धर्मोपायंधर्मसाधनम् विचिंतयेत् ।अथदशमभवनेकिंविचार्यमित्यतआह व्योम्नीति । व्योम्निदशमभावेएतावद्विचार्यम् । मुद्रांराजमुद्रां परंपुण्यंउत्कृष्टपुण्यं राज्यं वृद्धिंभागवृद्धिं पैतृकंपितुःसंबंधि ॥५४॥ अथैकादशभवनेकिंविचार्यमित्यतआह आयइति। आयेएकादशस्थानेएतावद्विचार्यम् सर्वार्थःसर्वद्रव्यप्रयोजनम् धान्यार्घःधान्यमौल्यम् कन्या मित्रंच

व्ययेवैरिनिरोधार्तिंव्ययादिपरिचिंतयेत् ॥ ५६ ॥ लग्नाबुद्यूनकर्माणिकेंद्रमुक्तंचकंटकम् ॥ चतुष्टयंचात्रखेटोबलीलग्नेविशेषतः ॥ ५७ ॥ लग्नकर्मास्ततुर्यायसुतांकस्थोबलीग्रहः ॥ यथाऽऽदिमं विशेषेणसत्रिवित्तेषुचंद्रमाः ॥ ५८ ॥ कुजःसत्रिषुपृच्छायांसूतौ चान्यत्रचिंतयेत् ॥ भावानवेत्थंशस्ताःस्यूरिःफाष्टरिपवोऽशुभाः ॥ दीप्तांशातिक्रमेशस्ताइमेऽपीतिविचिंतयेत् ॥ ५९ ॥

तुष्पदः गजाश्वादि राज्ञःवित्तंराजद्रव्यम् परीवारःकुटुंबविचारः भूरिशः भूयांसः लाभोपायाःप्राप्त्युपायाः ॥ ५५ ॥ अथव्ययभवनेकिंविचार्यमित्यतआह व्ययइति । व्ययेद्वादशभवनेएतावद्विचार्यम् वैरिनिरोधःशत्रुकृतावरोधः आर्तिः पीडा व्ययादि एतावद्विचिंतयेत् ॥५६॥अथबलिष्ठग्रहस्यलक्षणमाह लग्नेति। लग्नं अंबुचतुर्थम् द्यूनंसप्तमम् कर्मदशमं एतेषांस्थानानांकेंद्रंकंटकचतुष्टयंचेति संज्ञाकृता अत्रकेंद्रेस्थितःखेटोग्रहोबलीज्ञेयः तथापि चतुर्थसप्तमदशमस्थानापेक्षयालग्नस्थोग्रहोविशेषेणबलीज्ञेयः ॥ ५७ ॥ अथग्रहाणांशुभस्थानानिवदन्बलिष्ठयोगमाह लग्नेति । लग्नं कर्मदशमम् अस्तंसप्तमम् तुर्यंचतुर्थम् आयंएकादशं सुतंपंचमम् अंकंनवमम् एषुस्थानेषुग्रहोबली तत्र यथादिममादिमस्थानमनतिक्रम्य यथादिममादिमस्थानापेक्षया पूर्वपूर्वस्थोग्रहोविशेषेणबलिष्ठः तद्यथा आदौनवमस्थोग्रहोबलिष्ठस्तदपेक्षयापंचमस्थोबलिष्ठस्तदपेक्षयाएकादशस्तदपेक्षयाचतुर्थस्तदपेक्षयासप्तमस्तदपेक्षयादशमस्तदपेक्षयालग्नस्थोबलिष्ठइत्यर्थः। एतत्तुसर्वग्रहाणांसाधारणबलमुक्तम् । अथचंद्रमाः सत्रिवित्तेषुतृतीयद्वितीयसहितेषुपूर्वोक्तेषुस्थानेषुबलीज्ञेयः । तत्र द्वितीयेबलिष्ठश्चंद्रस्तदपेक्षयातृतीयेबलिष्ठस्तदपेक्षयानवमस्तदपेक्षयापंचमस्थस्ततःपूर्ववज्ज्ञेयः ॥ ५८ ॥ अथभौमः । कुंजइति । कुजोभौमः सत्रिषुतृतीयस्थानसहितेषुप्रागुक्तेषुस्थानेषुबलिष्ठोज्ञेयः तत्र भौमस्तृतीयेबलिष्ठस्तदपेक्षयानवमस्थस्ततःपूर्ववज्ज्ञेयः। एवमेतत् स्थानस्थंग्रहंपृच्छायांप्रश्नलग्नेसूतौजन्मनि अन्यत्रवर्षलग्नादौचचिंतयेत् । इत्थममुनाप्रकारेणनवसंख्याकाभावाःशस्ताःशुभफलदाःस्युःग्रहाधिष्ठिताद्वादशा

Indira Gandhi National Centre for the Arts

त्रिराशिपाःसूर्यसितार्किशुक्रादिनेनिशीज्यैंदुबुधक्षमाजाः ॥ मेषा च्चतुर्णांहरिभाद्विलोमंनित्यंपरेष्वार्किकुजेज्यचंद्राः ॥ ६० ॥ वर्षे शार्थंदिननिशाविभागोक्तास्त्रिराशिपाः ॥ पंचवर्गीबलाद्यर्थंद्रेक्का णेशान्विचिंतयेत् ॥ ६१ ॥ जन्मलग्नपतिरब्दलग्नपोमुंथहाधि पइतस्त्रिराशिपः ॥ सूर्यराशिपतिरह्निचंद्रभाधीश्वरोनिशिविमृश्य पंचकम् ॥ ६२ ॥

ष्टमषष्ठभावाअशुभाःस्युः इमेद्वादशाष्टमषष्ठभावाअधिष्ठितग्रहदीप्तांशान् अतिक्र म्यवर्तंते तदातेऽपिभावाःशस्ताःशुभफलदातारःस्युरितिचिंतयेत् तत्राप्यधिष्ठित ग्रहदीप्तांशमध्येइमेरिःफाष्टमरिपुभावायदिस्युस्तदैवानिष्टाइत्यर्थः ॥ ५९ ॥ अ थत्रैराशिकस्वामिनआह ।त्रिराशिपाइति । दिनेदिवावर्षप्रवेशेमेषाच्चतुर्णांराशीनां सूर्यसितार्किशुक्राःस्वामिनःस्युः तद्यथा दिवावर्षप्रवेशेमेषलग्नंतदासूर्यः वृषस्य शुक्रः मिथुनस्यार्किःशनिः कर्कस्यशुक्रः निशिःरात्रौवर्षप्रवेशेमेषादीनांचेतुर्णां

इदंत्रैराशिकस्वामियंत्रम्.

१	२	३	४	५	६	७	८	९	१०	११	१२	
सू	शु	श	शु	गु	चं	बु	मं	श	मं	गु	चं	दिवा.
गु	चं	बु	मं	र	शु	श	शु	श	मं	गु	चं	रात्रौ.

राशीनांईज्यैंदुबुधक्ष माजाःस्वामिनः तद्य था रात्रौमेषस्यस्वामी गुरुः वृषस्यचंद्रः मिथुनस्यबुधः कर्कस्यभौमः एते हरिभात्सिंहाच्चतुर्णांराशी नांविलोमंविपरीतंज्ञेयम् मेषादीनांयेदिनेशास्तेसिंहादीनांरात्रावीशाः येमेषादीनां रात्रीशास्तेसिंहादीनांदिनेशाइत्यर्थः । तद्यथादिनेसिंहलग्नस्यगुरुः कन्यायाश्चंद्रः तुलायाबुधः वृश्चिकस्यभौमः रात्रौसिंहस्यसूर्यः कन्यायाःशुक्रः तुलायाःशनिः वृश्चिकस्यशुक्रः।परेषुधनुरादिषुचतुर्षुराशिषु नित्यंसदा दिवारात्रौ वर्षप्रवेशे आ- र्किकुजेज्यचंद्राःस्वामिनः । तद्यथा धनुषःशनिः मकरस्यभौमः कुंभस्यगुरुः मीनस्यचंद्रः । दिवारात्रौवर्षप्रवेशेसतिधनुरादीनांदिनरात्रीशयोर्विपर्ययोनास्तीत्य र्थः ॥ ६० ॥ अथैतस्यप्रयोजनमाह वर्षेशार्थमिति । एतेवर्षेशार्थंवर्षेशानिर्णयार्थं दिननिशाविभागेनत्रिराशिपाउक्ताः पंचवर्गीबलाद्यर्थंपूर्वोक्तान्द्रेक्काणेशान्वीचिं तयेत् ॥ ६१ ॥ अथक्रमप्राप्तोदाहरणप्रदर्शनार्थंवर्षतंत्रोक्तंचतुर्भिःश्लोकैर्वर्षेश

Indira Gandhi National Centre for the Arts

बलीयएषांतनुमीक्षमाणःसवर्षपोलग्नमनीक्षमाणः ॥ नैवाब्दपोदृष्ट्यतिरेकतःस्याद्बलस्यसाम्येविदुरेवमाद्याः ॥ ६३ ॥ दृगादिसाम्येप्यथनिर्बलत्वेवर्षाधिपःस्यान्मुथहेश्वरस्तु ॥ पंचापिचेन्नोतनुमीक्षमाणावीर्याधिकोऽब्दस्यविभुर्विचिंत्यः ॥ ६४ ॥ बलादिसाम्येरविराशिपोऽह्निनिशींदुराशीडितिकेचिदाहुः ॥ येनेत्थशालोऽब्दविभुःशशीसवर्षाधिपश्चंद्रभपोऽन्यथात्वे ॥ ६५ ॥

निर्णयमाह। तत्रादौअधिकारिणश्चाह जन्मेति । जन्मलग्नपतिःजन्मलग्नस्वामी ।अब्दलग्नपोवर्षलग्नस्वामी मुंथहाधिपोमुंथहास्वामी त्रिराशिपःत्रैराशिकस्वामी सूर्यसितार्किशुक्राइत्यादिनात्रैराशिकेश्वरोज्ञेयः अह्निदिवावर्षप्रवेशेसूर्यराशिपतिर्दिनेशोज्ञेयः निशिरात्रौवर्षप्रवेशेसति चंद्रभाधीश्वरःचंद्राधिष्ठितराशीशोज्ञेयः सएवरात्रिस्वामीज्ञेयइत्यर्थः। अनयारीत्याग्रहपंचकंविमृश्यविचार्य ॥६२॥ एवं पंचाधिकारिणोज्ञात्वातेषांदृग्बलंपंचवर्गीबलंचज्ञात्वा**वर्षपतिनिर्णयमाह**। बलीयइति । एषांपंचानामधिकारिणांमध्येयोग्रहोबलीपंचवर्ग्यांबलाधिकस्तनुंलग्नं ईक्षमाणःपश्यति सवर्षपोवर्षस्वामीज्ञेयः । यदाबलिष्ठोऽपिग्रहोलग्नमनीक्षमाणः लग्नंनपश्यतितदावर्षाधिपोनैवस्यात्।यदाबलस्यसाम्येपंचवर्ग्यांसर्वेतुल्यबलास्तदादृष्ट्यतिरेकतःस्यात् । यथायोऽधिकदृष्ट्यालग्नंपश्यतिसवर्षाधीशइति एवमाद्याविदुःवदंति ॥ ६३ ॥ **दृष्टिसाम्येचाह** दृगिति । सर्वेषांदृक्साम्येदृष्टिसाम्ये आदिशब्दाद्बलसाम्येऽपि अथवानिर्बलत्वेवर्षाधिपोवर्षेश्वरःमुंथहेश्वरःस्यात् चेत्पंचाधिकारिणःसबलायद्यपितनुंलग्नंनेक्षमाणाःनपश्यंति तथापिवीर्याधिकः अंकतोयस्यैवंबलमधिकंसएवाब्दस्यवर्षस्यविभुःस्वामीविचिंत्यः ॥ ६४ ॥ अथकेनचिन्मतेनदृष्टिबलसाम्येवर्षाधिपतिनिर्णयमाह बलादिति। बलसाम्ये आदिशब्दादृष्टिसाम्येच।अह्निदिवावर्षप्रवेशेरविराशिपःरव्याक्रांतराशीश्वरोज्ञेयः। निशिरात्रौवर्षप्रवेशेइंदुराशीट्चंद्राक्रांतराशीश्वरोवर्षाधीश्वरोज्ञेयइतिकेचिदाहुः । अथोत्तरार्धेविशेषमाह येनेत्थशालइति । यउक्तप्रकारेणशशीचंद्रः अब्दविभुः वर्षस्वामीजातःसयदियेनपंचाधिकारिमध्यस्थितेनग्रहेणसहेत्थशालंकुरुते तदास

स्वजन्मलग्नात्प्रतिवर्षमेकैकराशिभोगान्मुथहाभ्रमेण ॥ स्वजन्म लग्नंरवितष्टयातंशरद्युतंसाभमुखेंथिहास्यात् ॥ ६६ ॥ प्रत्यहंशर लिप्ताभिर्वर्धतेसानुपाततः ॥ सार्धमंशद्वयंमासइत्याहुःकेपिसूरयः ॥ ६७ ॥ भोग्याराहोर्लवास्तस्यमुखंपृष्ठंगतालवाः ॥ ततःसप्तम भंपुच्छंविमृश्येतिफलंवदेत् ॥ ६८ ॥ श्रीगर्गान्वयभूषणंगणित विच्चिंतामणिस्तत्सुतोऽनंतोऽनंतमतिर्व्यधात्खलमतध्वस्त्यैजनुःप द्धतिम् ॥ तत्सूनुःखलुनीलकंठविबुधोविद्वच्छिवानुज्ञयासंतुष्ट्यै व्यदधाद्ग्रहप्रकरणंसंज्ञाविवेकेऽमलम् ॥ ६९ ॥

इतिसंज्ञातंत्रेग्रहाध्यायःप्रथमः ॥ १ ॥

एववर्षाधिपोवर्षस्वामीकल्प्यः। अन्यथात्वेइत्थशालयोगाभावेचंद्रभपश्चंद्राक्रांतराशीश्वरोवर्षाधिपोज्ञेयः॥६५॥ **अथमुंथानयनमाह** स्वेति। यदाजन्मजातंतस्मिन्समयेयल्लग्नंतदासैवमुथहा। सामुथहास्वजन्मलग्नात्प्रतिवर्षंएकैकराशिवृद्ध्याभ्रमति। तद्यथा जन्मलग्नंकन्याजन्मसमयेतत्रैवमुथह। द्वितीयवर्षेतुलायामित्यादिमुथहोत्पत्तिप्रकारइष्टवर्षेभवति। अथमुथहानयनम्। राश्यादिस्वजन्मलग्नंयातशरद्युतंजन्मकालाद्गतवर्षगणेनयुक्तं द्वादशभिस्तष्टंसाशेषप्रमिताभमुखाराश्यादिइंथिहामुथहास्यात्। **उदाहरणम्**—जन्मलग्नम्५।१०।५३।५० गतवर्षगणेनयुक्तम् ४२।१०।५३।५० द्वादशभिस्तष्टम्। शेषांकप्रमिताजाताराश्यादिर्मुथहा ६।१०।५३।५०॥६६॥स्पष्टमिदंपद्यम्॥६७॥**अथराहोर्मुखपृष्ठपुच्छानांलक्षणमाह**भोग्येति। यस्मिन्राशौराहुरस्तितेनवक्रगतिनायेभोग्याअंशास्तेमुखसंज्ञाः। येगतालवाःभुक्तलवाःतेपुच्छसंज्ञाः। ततःसप्तमंभवनंततोराहोःसप्तमेसप्तमराशिः पुच्छसंज्ञकइतिविमृश्यविचार्यमुथहायाःफलंवदेत्। अथोक्तप्रकारेणवर्षेशानिर्णयः। तत्रादौजन्मलग्नेबुधः। वर्षलग्नेशोभौमः मुंथहेशोभृगुः त्रैराशिकेशः सूर्यः दिनेशःशनिः पंचानांमध्येबलिष्ठःशनिःपूर्णदृष्ट्यालग्नंपश्यति अतोवर्षेशः शनिः ॥ ६८ ॥ ६९ ॥ ॥ इतिश्रीदिवाकरदैवज्ञात्मजविश्वनाथदैवज्ञविरचिते श्रीनीलकंठज्योतिर्वित्कृतसंज्ञातंत्रेग्रहाध्यायःप्रथमः ॥ १ ॥

Indira Gandhi National Centre for the Arts

सूर्योनृपोनाचतुरस्रमध्यंदिनेंद्रदिक्स्वर्णचतुष्पदोऽग्रः ॥ सत्वं स्थिरस्तिक्तपशुक्षितिस्तुपित्तंजरन्पाटलमूलवन्यः ॥ १ ॥ वैश्यः शशीस्त्रीजलभूस्तपस्वीगौरोपराह्णांबुगधातुसत्वम् ॥ वायव्य दिक्श्लेष्मभुजगंरूप्यस्थूलोयुवाक्षारशुभःसिताभः ॥ २ ॥ भौ मस्तमःपित्तयुवोग्रवन्योमध्याह्नधातुर्यमदिक्चतुष्पात् ॥ ना राट्चतुष्कोणसुवर्णकारोदग्धावनीव्यंगकटुश्वरक्तः ॥ ३ ॥

अथग्रहाणांस्वरूपम् ॥ तत्रादौसूर्यस्यस्वरूपमाह सूर्यइति । सूर्यएतादृशोज्ञेयः । नृपः क्षत्रियः । नापुरुषग्रहः चतुरस्रःचतुष्कोणाकृतिः। मध्यंदिनं मध्याह्नकालेप्रबलः । इंद्रदिक्पूर्वदिक्स्वामी । स्वर्णसुवर्णद्रव्य स्वामी । चतुष्पात्चतुष्पदामश्वगजादीनांप्रभुः । उग्रःक्रूरः । सत्वं सत्वप्रधानः । स्थिरःस्थिरस्वभावः । तिक्तःतिक्तरसप्रियः । पशुक्षितिःभूमि चारी । पित्तंपित्तप्रकृतिः । जरन्वृद्धः । पाटलःश्वेतरक्तमिश्रितवर्णः । मूलं मूलोत्पन्नस्यधान्यादेरधिष्ठाता । वन्योवनचारी । एवंगुणविशिष्टसूर्यः ॥ १ ॥ **अथचंद्रस्वरूपमाह** । शशीचंद्रः । वैश्यःवैश्यजातिः । स्त्रीस्त्रीग्रहः । जलभूरार्द्रभूमिचारी । तपस्वीतपोयुक्तः । गौरः गौरवर्णः । अपराह्णःअपराह्ण कालेप्रबलः । अंबुगोजलचारी । धातुर्गैरिकादिः। सत्वंसत्वप्रधानः वायव्यदिक् वायव्यदिक्स्वामी । श्लेष्माश्लेष्मप्रधानः। भुजंगःभुजंगस्वामी । रूप्यंरूप्यद्रव्य स्वामी । स्थूलोऽतिपुष्टः । युवातरुणः। क्षारःलवणरसप्रधानः। शुभःशुभग्रहः सिताभःशुभ्रवर्णः। एवंविधश्चंद्रोज्ञेयः ॥२॥ **अथभौमस्वरूपमाह** भौमइति । एतादृशोभौमोज्ञेयः । तमःतमोगुणप्रधानः । पित्तंपित्तप्रकृतिः । युवातरुणः। उग्रःक्रूरः । वन्योवनचारी । मध्याह्नःमध्याह्नकालेप्रबलः । धातुःगैरिकादिः। यमदिक् दक्षिणदिक्स्वामी । चतुष्पाच्चतुष्पदानामश्वादीनांप्रभुः । ना पुरुष ग्रहः । राट् राजा । चतुष्कोणः चतुष्कोणाकृतिः । सुवर्णकारः सुवर्णकारा णांस्वामी । दग्धावनी ज्वलितभूमिचारी । व्यंगःकिंचिदंगरहितः । कटुः

ग्राम्यःशुभोनीलसुवर्णवृत्तःशिश्विष्टकोच्चःसमधातुजीवः॥स्मशानयोषोत्तरदिक्प्रभातंशूद्रःखगःसर्वरसोरजोज्ञः ॥ ४ ॥ गुरुःप्रभातेनृशुभेशदिक्द्विजःपीतोद्विपाद्ग्राम्यसुवृत्तजीवः ॥ वाणिज्यमाधुर्यसुरालयेशोवृद्धःसुरत्नंसमधातुसत्वम् ॥ ५ ॥ शुक्रःशुभस्त्रीजलगोऽपराह्नःश्वेतःकफीरूप्यरजोऽम्लमूलम् ॥ विप्रोऽग्निदिङ्मध्यवयोरतीशोजलावनीस्निग्धरुचिर्द्विपाच्च॥ ६ ॥

कटुरसप्रियः रक्तस्ताम्रवर्णः वा रक्तवर्णद्रव्यस्वामी ॥ ३ ॥ **अथबुधस्वरूपमाह** ग्राम्यइति । ग्राम्यःग्रामचारी । शुभःसौम्यः । नीलःनीलवर्णः । सुवर्णः सुवर्णद्रव्यस्वामी । वृत्तोवर्तुलाकृतिः । शिशुर्बालकः । इष्टकोच्च इष्टकोच्चसंचारी । समधातुःवातपित्तकफात्मकः । जीवोमनुष्यादिः । स्मशानंयत्रशवदहनंभवतितत्स्थलचारी । योषास्त्रीग्रहः । उत्तरदिगुत्तरदिक्स्वामी । प्रभातंप्रातःकालेसबलः । शूद्रःशूद्रजातिः । सर्वरसः । खगःपक्षिजातिः ।कट्वादिसकलरसप्रधानः । रजो रजोगुणप्रधानः । ज्ञोबुधः एवंगुणविशिष्टोज्ञेयः ॥ ४ ॥ **अथगुरुस्वरूपमाह** गुरुरिति । एतादृशोगुरुः । प्रभाते प्रातःकालेप्रबलः । ना पुरुषग्रहः । शुभः सौम्यग्रहः । ईशदिगीशानदिक्स्वामी । द्विजोब्राह्मणः । पीतःपीतवर्णः । द्विपाद्द्विपदानांस्वामी । ग्राम्यः ग्रामचारी । सुवृत्तो वर्तुलाकृतिः । जीवो मनुष्यादिः । वाणिज्यं वणिक्कर्म कर्ता । माधुर्यं मधुररसप्रियः । सुरालयेशोदेवतागृहस्वामी । वृद्धःवृद्धग्रहः । सुरत्नं शोभनरत्नद्रव्यस्वामी।समधातुर्वातपित्तकफात्मकः।सत्वं सत्वगुणप्रधानः॥५ **अथशुक्रस्वरूपमाह** शुक्रइति । शुक्रएतादृशोज्ञेयः । शुभःशुभग्रहः । स्त्री स्त्रीग्रहः।जलगो जलचारी । अपराह्नः अपराह्नकालप्रबलः ।श्वेतः शुभ्रवर्णः । कफी कफप्रकृतिः । रूप्यं रूप्यद्रव्यस्वामी । रजः रजोगुणप्रधानः । अम्ल अम्लरसप्रियः । मूलं मूलोत्पन्नस्यधान्यादेःस्वामी । विप्रो ब्राह्मणः । अग्निदिगाग्नेयदिक्स्वामी । मध्यवयाः तरुणः । रतीशः क्रीडारसप्रधानः । जलावनी

शनिर्विहंगोऽनिलवन्यसंध्याशूद्रांगनाधातुसमःस्थिरश्च ॥ क्रूरः प्रतीचीतुवरोऽतिवृद्धोत्करक्षितीट्दीर्घसुनीललोहम् ॥ ७ ॥ राहुस्वरूपंशनिवन्निषादजातिर्भुजंगोऽस्थिपनैर्ऋतीशः ॥ केतुःशिखीतद्वदनेकरूपःखगस्वरूपात्फलमूह्यमित्थम् ॥ ८ ॥ दृष्टिःस्यान्नवपंचमेबलवतीप्रत्यक्षतःस्नेहदापादोनाऽखिलकार्यसाधनकरीमेलापकाख्योच्यते ॥ गुप्तस्नेहकरीतृतीयभवभेकार्यस्यसंसिद्धिदात्र्यंशोनाकथितातृतीयभवनेषड्भागदृष्टिर्भवे ॥ ९ ॥

जलभूमिचारी । स्निग्धरुचिः श्लक्ष्णकांतिः । द्विपाद्विपदानांमनुष्यादीनास्वामी ॥ ६ ॥ **अथशनिस्वरूपमाह** शनिरिति । शनिरेतादृशः । विहंगः पाक्षिजातिः । अनिलो वायुचारी । वन्यो वनचारी । संध्या संध्याकालेप्रबलः । शूद्रः शूद्रजातिः । अंगनास्त्रीग्रहः । धातुसमः वातपित्तकफात्मकः । स्थिरः स्थिरस्वभावः । क्रूरः पापग्रहः । प्रतीची पश्चिमदिक्स्वामी । तुवरः कषायरसप्रियः । अतिवृद्धःअत्यंतवृद्धग्रहः । उत्करक्षितीट् उत्करभूस्वामी । दीर्घःदीर्घाकृतिः । सुनीलः सुष्टुनीलवर्णः । लोहं लोहस्यस्वामी ॥ ७ ॥ **अथराहुस्वरूपमाह** शनिवत्तत्रकिंचिद्विशेषोऽस्तीत्याह राह्विति । निषादजातिश्चांडालविशेषः । भुजंगःसर्परूपः । अस्थिपोऽस्थिस्वामी । नैर्ऋःतीशःनैर्ऋतिदिक्पतिः । अथकेतुस्वरूपंशनिराहुवत् परंत्वेतावान्विशेषः॥ केतुः शिखी शिखावान् । अनेकरूपःनानाविधरूपः । इत्थममुनाप्रकारेणग्रहस्वरूपात्फलमूह्यंज्ञेयम् ॥ ८ ॥ **अथदृष्टिमाह** ॥ तत्रग्रहाणांचतुर्विधादृष्टिः । एकाप्रत्यक्षस्नेहा द्वितीयागुप्तवैरा चतुर्थीप्रत्यक्षवैरा । तत्रादौस्नेहदृष्टिमाह ॥ दृष्टिरिति । कुंडल्यांग्रहाः स्वाक्रांतस्थानान्नवपंचमेनवमस्थानस्थंग्रहं पंचमस्थानस्थंग्रहंच पश्यतिसादृष्टिर्बलवती प्रत्यक्षतःस्नेहदाप्रीतिदा पादोनासादृष्टिःचतुर्थांशन्यूनापंचचत्वारिंशत्कलात्मिका ४५ अखिलानांसमस्तानांकार्याणांसाधनंसंपत्तिंकरोति । मेलापकाख्यापरस्परप्रीतिकारिणी । इत्येकादृष्टिः । अथस्वाक्रांतस्थानाद्ग्रहस्तृ-

दृष्टिःपादमिताचतुर्थदशमेगुप्तारिभावास्मृताऽन्योन्यंसप्तमभेतथैक भवनेप्रत्यक्षवैराखिला ॥ दुष्टंदृक्त्रितयंक्षुधाह्वयमिदंकार्यस्यविध्वं सदंसंग्रामादिकलिप्रदंदृशइमाःस्युर्द्वादशांशांतरे ॥ १० ॥ अपा स्यपश्यंनिजदृश्यखेटादेकादिशेषेध्रुवलिप्तिकाःस्युः ॥ पूर्णखवेदा स्तिथयोऽक्षवेदाःखंषष्टिरभ्रंशरवेदसंख्या ॥ ११ ॥

तीयस्थानस्थंग्रहंएकादशस्थानस्थंग्रहंचयत्पश्यतिसादृष्टिर्गुप्तस्नेहकरीकार्यस्यसं सिद्धिदाभवति । सादृष्टिस्तृतीयभवनेत्र्यंशोनाचत्वारिंशत्कलात्मिका ४० क थिता । भवेएकादशस्थानेषड्भागःषडंशदशकलात्मिकादृष्टिःस्यात् ॥ ९ ॥

अथग्रहाणांशत्रुदृष्टिमाह । दृष्टिःपादमितेति ॥ स्वाक्रांतस्थानाद्ग्रहश्चतुर्थ स्थानस्थंगृहं दशमस्थगृहंचयत्पश्यतिसादृष्टिर्गुप्तारिभावाअप्रकाशितशत्रुभावा स्मृता । पादमिताचतुर्थांशमितापंचदशकलात्मिकादृष्टिः । तथाऽन्योन्यंपरस्प रंसप्तमभेसप्तमराशौतथैकभवनेएकराशावपिग्रहोयत्पश्यतिसादृष्टिःप्रत्यक्षवैरा । अखिलासंपूर्णादृष्टिः षष्टि ६० कलात्मिकास्यात् । इदंदुष्टंदृक्तृतयंचतुर्थदशम रूपमेकंसमसप्तकरूपंद्वितीयमेकराशिगतंतृतीयमेवमिदंदृष्टित्रयंक्षुताह्वयंसकलशु भकर्मनाशकं इदमपिदृष्टित्रयंकार्यस्याभीष्टस्यविध्वंसदं । किंच संग्रामादि संग्रामोयुद्धंतत्प्रभृतिककलिप्रदंयुद्धकारकंक्लेशंप्रददाति । इमादृशोद्वादशांशां तरेद्रष्टृदृशांतरंद्वादशभागानधिकं तदायथोक्तफलदात्र्यःस्युः ॥ १० ॥

अथगणितागतदृष्टिसाधनमाह अपास्येति तिथ्यइतिच । योग्रहः पश्यतिसद्रष्टा यंपश्यतिसदृश्यं इत्यत्रलोक्य पश्यंद्रष्टारंग्रहंनिजदृश्यखेटात् अपास्यशोध्य । यद्राश्यादिशेषंतिष्ठति । यस्मिन्नेकादिशेषात्मकेध्रुवाः स्थिराः लिप्तिकाःदृष्टिकलाःपूर्णमित्यादिकाःस्युः । तद्यथा । द्रष्टारहितदृश्यग्रहस्यरा शिस्थानेएकस्मिन्शेषे पूर्णशून्यंदृष्टिः । द्विशेषेखवेदाश्चत्वारिंशत् ४० । त्रि

तिथ्यःखचंद्रावियदभ्रतर्काःशेषांकयातैष्यविशेषघातात् ॥ लब्धंख रामै ३० रधिकोनकैष्येस्वर्णंध्रुवेताःस्फुटदृष्टिलिप्ताः ॥ १२ ॥

शेषेतिथयःपंचदश १५ चतुःशेषेऽक्षवेदाः ४५ पंचचत्वारिंशत् । पंचशेषेखं शून्यं ० । षष्ठशेषेषष्टिः ६० । सप्तशेषेशरवेदसंख्यापंचचत्वारिंशत् ४५ । नवशेषेतिथ्यःपंचदश १५ । दशशेषेखचंद्राः १० । एकादशशेषेवियच्छू न्यं ० । द्वादशशेषेऽभ्रतर्काःषष्टिः ६० । शेषांकेति द्रष्टारहितदृश्यस्यराशिस्थाने योंकःप्राप्तःसस्थाप्यः यातैष्ययोर्गतगम्ययोर्विशेषांतरंकार्यम् । तद्यथा—राशि स्थानेयोंकःप्राप्तःसयातसंज्ञकः । तस्याग्रिमांकोयःसएष्यसंज्ञकः । तयोरंतरंका र्यम् । तेनांतरेणशेषांशाःगुण्याः । ततः खरामैस्त्रिंशद्भिः ३० भक्तेयल्लब्धंकला दिकं तत्ध्रुवेराशिस्थानेप्राप्तांकेस्वर्णंकार्यम् । कदाचिदधिकोनकैष्येसतिय दाग्रिमोध्रुवःप्राग्ध्रुवादधिकोभवेत्तदाधनम् । यदोनोऽग्रिमध्रुवहीनोभवेत्तदा ऋणं एवंसतिताःस्फुटाःदृष्टिलिप्ताःकलाःस्युः । **उदाहरणम्**—द्रष्टाचंद्रः ५।२२।९।४७ दृश्योरविः ९।७।३०।६। द्रष्टारहितदृश्यः ३।१५।२० १९ अस्यराशिस्थानेत्रयोंकाः त्रयाणामधःपंचदशध्रुवांकःप्राप्तः १५। अग्रि मोंकःपंचचत्वारिंशत् ४५ अनयोरंतरेण ३० शेषांकाः १५।२०।१ गुणिताः जाताः ४६०।९।३० त्रिंशद्भक्ताःलब्धं १५।२० इदमग्रिमस्यांकस्याधिक त्वात्पंचदश १५ मध्येयुतंजातासूर्योपरिचंद्रस्यकलात्मिकादृष्टिः ३०।२० एवं सर्वग्रहाणामपिज्ञेयम् ॥ ११ ॥ १२ ॥

दृष्टिध्रुवांकाःसांतराः ।												
राशयः	१	२	३	४	५	६	७	८	९	१०	११	१२
ध्रुवांकाः	०	४०	१५	४५	०	६०	०	४५	१५	१०	०	६०
अंतरांकाः	४०	२५	३०	४५	६०	६०	४५	२५	९	१०	६०	६०
ऋणं.धनं.	ध	ऋ	ध	ऋ	ध	ऋ	ध	ऋ	ध	ऋ	ध	ऋ

पश्यन्मित्रदृशासुहृद्रिपुदृशाशत्रुःसमस्त्वन्यथातिथ्यर्काष्टनगांक शैलखचराः १५।१२।८।७।९।७।९ सूर्यादिदीप्तांशकाः ॥ चक्रे वामदृगुच्यतेबलवतीमध्याद्यथावेश्मनीत्येकर्क्षेऽपिदृगुच्यतेऽर्थजन नीत्येकेविदुःसूरयः ॥ १३ ॥

अथग्रहमैत्रीचक्रमाह पश्यन्निति । योग्रहोयंग्रहंमित्रदृशामित्रदृष्ट्यानव पंचमतृतीयैकादशदृष्ट्यापश्यतिसग्रहस्तंप्रतिसुहृन्मित्रंज्ञेयः । योग्रहोरिपुदृशाश त्रुदृष्ट्याचतुर्थदशमैकसप्तमदृष्ट्यापश्यतिसतंप्रतिशत्रुर्ज्ञेयः । अन्यथामित्रशत्रुदृ ष्ट्यभावेपरिशेषाद्वितीयषष्ठाष्टमद्वादशस्थानेषुसमताभवति । अत्रार्थेसंमतिवा क्यम् । तथाचरोमकः–मित्रंतृतीयपंचमनवमैकादशगतोऽपियोयस्य ॥ धन मृतिरिपुरिःफेषुचसमोग्रहःस्यादितिज्ञेयम् ॥ १ ॥ शत्रुस्तथैकतुर्येजायास्था नेतथादशमे ॥ ताजिकहिल्लाजमतेनैतादृक्कथितमस्माभिः ॥ २ ॥ अत्रमित्रस मशत्रुविचारेनवपंचमादिस्थानेदृष्टिरेवग्राह्या । अत्रसर्वेष्वपिस्थानेषुयद्यपिगणि तागतदृष्टिरायातितथापिसानग्राह्या । कुतः दृष्ट्यभावेसमतोक्ता । गणिताग तदृष्टौसत्यांसमतायाअभावःस्यादितिहेतुरितिकेचित् । वस्तुतस्तु अत्रग्रहयोरेक पंचसप्तैकादशांतरयोस्तुल्यभागाद्यवयवयोर्गणितागतदृष्टेरभावः । यथा–द्रष्टा चंद्रः १।३।२०।५० दृश्योबुधः २।३।२०।५० वाबुधः ६।३।२०।५० वाबुधः ८।३।२०।५० एवंकदाचित् ०।३।२०।५० एवंकदाचित्संभवतीति ग्रंथांतरेसमानतोक्ता ॥ **अथसूर्यादीनांदीप्तांशानाह** तिथीति । सूर्यस्यति थयःपंचदश १५। चंद्रस्यार्काःद्वादश १२। भौमस्याष्टौ ८। बुधस्यनगाः सप्त ७। गुरोरंकानव ९। शुक्रस्यशैलाःसप्त ७। शनेःखचराःनव ९ । सू र्यादीनांग्रहणामेतेदीप्तांशकाज्ञेयाः ॥ **अथदृष्टौकश्चिद्विशेषउच्यते** चक्रइ ति । चक्रेलग्नादिद्वादशराशिचक्रेवामदृग्बलवतीज्ञेया दक्षिणदृष्ट्यपेक्षयेत्यर्थः। वामस्यवामस्थानस्थग्रहस्यदृक् वामभागस्थग्रहस्यदक्षिणभागस्थग्रहोपरियादृ ष्टिःसाबलवती । लग्नादिषष्ठांतंदक्षिणविभागः सप्तमादिद्वादशांतंवामविभा

गः। तदुक्तंबृहज्जातके कंदृगित्यादिश्लोकेवामसुदितेरिति राशिभिरुदितैर्दृश्य भागावस्थितैर्वामांगाविभागलग्नस्योदितभागास्तथाद्वादशैकादशमनवमाष्टमास्त थासप्तमस्यराशेर्लग्नोदिततुल्यभागाः एषभागोदितोशेषोऽनुदितः अर्थादनुदितै रदृश्यैर्दक्षिणोविभागः तत्रलग्नानुदितभागाः तथाद्वितीयतृतीयचतुर्थपंचमषष्ठाः सप्तमराशेर्लग्नोदिततुल्यविभागइत्यनुदितोविभागः एषदक्षिणोविभागः इतिभ ट्टोत्पलः। चक्रेवामदृगुच्यतेबलवतीत्यत्रकिंचिदेकमुदाहरणमाह मध्यादिति मध्याद्दशमस्थानाद्वेश्मनिचतुर्थस्थानेयादृष्टिःसाबलवतीत्युक्तंभवति दशमस्था

ग्रहदृष्टिचक्रम्।

	र	चं	मं	बु	गु	शु	श
र	० ०	३० २१	१४ ५	९ ३२	४४ १०	४ १९	१५ ४१
चं	३० २०	० ०	२१ २१	२३ १५	२२ २५	३८ १	३० ४१
मं	१४ ५	१३ ४४	० ०	५५ २७	२९ ५४	१९ ५८	११ १७
बु	९ ३३	१३ २४	५५ ५७	० ०	२५ २१	२४ ३९	१० ५४
गु	४४ १०	२२ ३५	२९ ५४	२५ २९	० ०	१ ४१	१३ ४७
शु	१७ १३	१० २४	१९ ५८	२४ ३१	६ ४४	० ०	५ ५४
श	१५ ४१	३० २४	३३ ३३	३५ २७	२१ १	२६ ५६	० ०

नस्थितग्रहस्यचतुर्थस्थानस्थितग्रहोपरियादृष्टिः साबलवतीत्यर्थः। चतुर्थस्थानस्थितग्रहस्यदश मस्थानस्थितग्रहोपरियादृष्टिः सानिर्बलेत्यर्थस्त्वा त्सूचितम् सप्तमादिद्वादशस्थानस्थितानांग्र हाणांलग्नादिषष्ठांतस्थानस्थितेषुग्रहेषुयादृष्टिःसा बलवतीतिनिर्दिष्टोर्थः। समरसिंहस्याप्ययमे वार्थः। तद्यथा चक्रस्यवामदृष्टेर्दक्षिणदृष्टिर्बली यसीज्ञेया। भूकेंद्रोपरिदृष्टिर्मध्यात्सबलेतिसर्व तोप्यूह्यमिति॥ वामदृष्टिरित्यत्रसप्तमीतत्पुरुषः समासः वामेदृष्टिर्वामदृष्टिः दक्षिणेदृष्टिर्दक्षिणदृ ष्टिः दक्षिणभागस्थितानांग्रहाणांयावामभागस्थग्रहेषुदृष्टिस्तदपेक्षयावामभागस्थ ग्रहाणांदक्षिणभागस्थग्रहोपरियादृष्टिःसाबलवतीत्यर्थः। **अत्रोदाहरणम्** भू केंद्रेति। मध्याद्दशमस्थानाद्भूकेंद्रोपरिचतुर्थोपरियादृष्टिःसाबलवती। एवंस र्वतोऽपिसप्तमादिद्वादशांतस्थानस्थितानांलग्नादिषष्ठांतस्थानस्थितेषुयादृष्टिः सा बलवतीत्यूह्यंविचार्यम्। श्रीकेशवदैवज्ञस्याप्ययमेवार्थः तद्यथा परार्धखग दृक्प्राक्ज्यार्धदृक्तोधिकेति परार्धखगस्यदृक्। लग्नादिषष्ठांतंपूर्वार्धम्। स प्तमादिद्वादशांतमपरार्धमिति। **अथैकस्थानदृष्टौमतांतरमाह** एकर्क्षेपी

Indira Gandhi National Centre for the Arts

पुरःपृष्ठेस्वदीप्तांशैर्विशिष्टंदृक्फलंग्रहः ॥ दद्यादतिक्रमेतेषांमध्यमं दृक्फलंविदुः ॥ १४ ॥ प्रागिक्कवालोपरइंदुवारस्तथेत्थशालोऽपरईसराफः ॥ नक्तंततःस्याद्यमयामणाऊकबूलतोगैरिकबूलमुक्तम् ॥ १५ ॥ खल्लासरंरद्दमथोदुफालिकुत्थंचदुत्थोत्थदिबीरनामा ॥ तंबीरकुत्थौदुरफश्चयोगाःस्युःषोडशैषांकथयामिलक्ष्म ॥१६॥ चेत्कंटकेपणफरेचखगाःसमस्ताःस्यादिक्कवालइतिराज्यसुखाप्तिहेतुः ॥ आपोक्लिमेयदिखगाःसकलेंदुवारोनस्याच्छुभःक्वचनताजिकशास्त्रगीतः ॥ १७ ॥

ति । एकर्क्षेएकराशिस्थितयोर्द्दश्यद्रष्टोःपरस्परंया दृग्दृष्टिःसाअर्थजननीअत्यंतलाभपूर्वकशुभफलदात्रीज्ञेया । इत्येकेसूरयःपंडितास्ताजिकशास्त्रवेत्तारोविदुः ॥ १३ ॥ अथपूर्वोक्तानांदीप्तांशानांप्रयोजनमाह पुरइति । अनवमादिस्थानदृष्टौसत्यांग्रहोद्रष्टास्वदीप्तांशैःकृत्वापुरोऽग्रेपृष्ठेपश्चाद्वाऽवस्थितेदृहेविशिष्टमुत्कृष्टंनवमादिस्थानस्थंदृक्फलंदृष्टिफलंदद्यात् । तेषांदीप्तांशानामतिक्रमेदृष्टिफलंमध्यमंसाधारणंदद्यादितिविदुः ॥ १४ ॥ **अथषोडशयोगाव्याख्यायंते** तत्रतेषांनामानिश्लोकद्वयेनाह प्रागिति खल्लेतिच । प्राक्प्रथमोयोगःइक्कवालः १ । अपरःइंदुवारः २ । तथेत्थशालः ३ । अपरःईसराफः ४ । ततोनक्तंस्यात् ५ । यमया ६ । मणाऊ ७ । कबूलम् ८ । गैरिकबूलम् ९ । रवल्लासरम् १० । रद्दम् ११ । अथोदुफालिकुत्थम् १२ । दुत्थोत्थदिबीरम् १३ । तंबीरः १४ । कुत्थः १५ । दुरफः १६ । एतेषोडशयोगाःस्युः । एषामिक्कवालादीनांलक्ष्मलक्षणंकथयामि ॥ १५ ॥ १६ ॥ **अथेक्कवालेंदुवारयोर्द्वयोर्लक्षणमाह** चेदिति । लग्नचतुर्थसप्तमदशमस्थानांकंटकसंज्ञाउक्ताकथिता कंटकचतुष्टयंकेंद्रमितिपर्यायाः । तदनंतरंद्वितीयपंचमाष्टमैकादशानांस्थानानांपणफरसंज्ञाउक्ताकथिता। तदनंतरंतृतीयषष्ठनवमद्वादशस्थानानामापोक्लिमसंज्ञाउक्ता । चेत्समस्ताःसर्वेग्रहाःकेंद्रेपणफरेचस्युः तदासइक्कवालाख्योयोगःस्यात् सइक्कवालयोगोराज्यसुखयोराप्तिर्लब्धिस्तस्याहेतुः ।

Indira Gandhi National Centre for the Arts

शीघ्रोऽल्पभागैर्घनभागमंदेग्रस्थेनिजंतेजउपाददीत ॥स्यादित्थशालोऽयमथोविलिप्तालिप्तार्धहीनोयदिपूर्णमेतत् ॥ १८ ॥ शीघ्रोयदाभांत्यलवस्थितःसन्मंदेऽग्रभस्थोनिदधातितेजः ॥ स्यादित्थशालोऽयमथैषशीघ्रदीप्तांशकांशैरिहमंदपृष्ठे ॥ १९ ॥

अत्यंतशुभफलदइत्यर्थः । आपोक्लिमेयदिसर्वेखगाःग्रहाःस्युस्तदेंदुवारनामकस्ताजिकशास्त्रेगीतःकथितोयोगःस्यात् । किलइतिनिश्चयेन । सयोगःक्वचनकुत्रापिवर्षमासप्रवेशादौशुभोनस्यात् ॥ १७ ॥ **अथमुथशिलयोगस्यलक्षणमाह** शीघ्रइति । ययोर्द्वयोर्ग्रहयोर्मुथशिलविचारःक्रियतेतयोर्मध्येयस्याधिकागतिःसशीघ्रगतिग्रहःद्वितीयःमंदगतिर्ग्रहःशीघ्रःशीघ्रगतिर्ग्रहःअल्पभागैःस्वल्पभागैःस्वल्पांशैरुपलक्षितोभवति । घनाबहवःभागाःअंशाःयस्यासौघनभागःतादृशेबह्वंशेमंदेमंदगतिग्रहेअग्रस्थेसतिएतदुक्तंभवतिशीघ्रगतिग्रहस्यभागापेक्षयामंदगतिग्रहस्याधिकभागाभवंति। तदाशीघ्रगतिग्रहःनिजंस्वीयंतेजःसामर्थ्यंमंदगतिग्रहायउपाददीतददातितर्ह्ययंइत्थशालाख्योयोगःस्यात् । अस्यैवनामांतरंमुथशिलमिति । शीघ्रगतिग्रहात्शीघ्रग्रहदीप्तांशांतर्गतांतरभागैराधिकेमंदमुथशिलयोगइतिपर्यवसितोऽर्थः । अथपूर्णमुथशिलयोगमाह । यदिशीघ्रगतिग्रहःमंदगतिग्रहात् विलिप्ताएकविकलामात्रन्यूनोऽथवालिप्तार्धहीनःत्रिंशद्विकलान्यूनोपिभवेत्तदा एतन्मुथशिलंपूर्णंविंशतिविंशोपकात्मकंजातंस्यात् । यदाद्वयोर्विकलांतावयवेनतुल्यताभवतितदापूर्णमुथशिलमित्यर्थतःसिद्धम् ॥ १८ ॥ **अथअदृष्टौमुथशिललक्षणमाह**शीघ्रइतितदेतिपद्यार्धेनचयदाशीघ्रःशीघ्रगतिग्रहःभांत्यलवस्थितःराशेरंतिमांशेत्रिंशत्तमेंशेस्थितःसन्मंदेमंदगतिग्रहेऽग्रयभस्थेअग्रिमराशौसतिशीघ्रग्रहस्यदीप्तांशावधितदाशीघ्रगतिग्रहःमंदगतिग्रहायतेजोनिदधातिश्रयामित्थशालयोगःस्यात् ।अथभविष्यन्**मुथशिलयोग**उच्यतेअथेति । एषशीघ्रगतिग्रहःस्वदीप्तांशेभ्योऽधिकांशैःकृत्वामंदगतिग्रहात्पृष्ठेस्थितःसन्मंदगतिग्रहेयदानिजतेजःदातुकामोभवतितदाइत्थशालंमुथशिलयोगोऽभविष्यत्अग्रेभविष्यतीतिगणनीयंज्ञेयं । एवंत्रिधात्रिप्रकारकंमुथशिलमाहुर्यः ।**अथमु**

तदाभविष्यद्गणनीयमित्थशालंत्रिधैवंमुथशीलमाहुः ॥ लग्नेशका र्याधिपयोर्यथैषयोगस्तथाकार्यमुशंतिसंतः ॥ २० ॥ लग्नेशका र्याधिपतत्सहायायत्रस्युरस्मिन्पतिसौम्यदृष्टे ॥ तदाबलाढ्यंकथ यंतियोगंविशेषतःस्नेहदृशाऽपिसंतः ॥ २१ ॥ स्वर्क्षादिसत्स्थान गतःशुभैश्चेद्युतेक्षितोभूद्भविताऽथवास्ते ॥ तदाशुभंप्रागभवत्सुपूर्ण मग्रेभविष्यत्यथवर्ततेच ॥ २२ ॥

थशिलयोगानांफलमाह लग्नेशेति । लग्नेशःलग्नस्वामी यद्भावस्यप्रश्नःक्रियते तद्भावस्वामीकार्याधिपः । अनयोर्यथामुथशिलयोगः तथासंतःअतिशिष्टाःका र्यमुशंति । तद्यथाकेनचिदागत्यप्रश्नःकृतःममपुत्रस्त्रीराज्यलाभादिसुखंभवि ष्यतिनवेति । तत्रलग्नस्वामीप्रश्नकर्ताज्ञेयःतत्तद्भावाधीशश्चकार्यस्वामी । तत्रपुत्र प्राप्तिचिंतापंचमभावात् स्त्रीप्राप्तिचिंतासप्तमभावात् राज्यप्राप्तिचिंतादशमभावात् लाभचिंताएकादशभावात् । एवंसर्वत्रज्ञेयम् । तत्रलग्नेशस्यराज्याद्यभीष्टका र्यभावेशस्यचमुथशिलयोगोयथाभवति तथातद्भावप्राप्तिर्वक्तव्या । तयोर्वर्त मानोमुथशिलयोगश्चेत्तदातद्भावसंबंधिसुखंइदानींवर्ततइतिवाच्यम् । यदित योःपूर्णमुथशिलयोगस्तदासंपूर्णतद्भावसंबंधिसुखंवाच्यम् । यदितयोःभविष्यन् मुथशिलयोगःतदातद्भावसौख्यंअग्रेभविष्यतीतिवाच्यम् ॥ १९ ॥ २० ॥ **अथ दृष्टिविचारमाह**लग्नेशेतिलग्नेशःलग्नस्वामीकार्याधिपःकार्यस्वामीचतत्सहायोना मलग्नेशमित्रंकार्येशमित्रंचएतेचत्वारोयत्रयस्मिन्राशौस्युःभवंतिअस्मिन्राशौपतिः स्वामीसौम्यःशुभग्रहःआभ्यांदृष्टेसति तदाप्रागुत्पन्नंमुथशिलयोगंबलाढ्यंउत्कृ ष्टफलदंकथयंति । तत्रापिसंतःअतिशिष्टाःस्नेहदृष्ट्याविशेषतःसबलमितिआहुः ॥ २१ ॥ **अथाऽन्यमपिफलविचारमाह**स्वर्क्षेति । लग्नाधिपःकार्याधीशश्च स्वर्क्षादिषुस्वगृहस्वोच्चस्वहद्दास्वत्रैराशिपस्वमुल्लहेषु । अथवासत्स्थानेषुशुभग्रह स्थानेदृग्गतोविद्यमानःसन्शुभैःशुभग्रहैःयुतेक्षितश्चेद्भूत् तदाप्राक्पूर्वंशुभंशुभ फलंसंपूर्णमभवज्जातमितिवक्तव्यम्। यदालग्नपकार्याधीशौस्वर्क्षादिसत्स्थानेगाशु भैर्युतेक्षितौचेद्भवितारौतदाशुभफलमग्रेभविष्यतीतिवाच्यम् । यदालग्नपकार्या

**व्यत्यस्तमस्माद्विपरीतभावेऽथेष्टर्क्षतोऽनिष्टगृहंप्रपन्नः ॥ अभूच्छु
भंप्रागशुभंत्विदानींसंयातुकामेनचभाविवाच्यम् ॥ २३ ॥शीघ्रो
यदामंदगतेरथैकमप्यंशमभ्येतितदेसराफः ॥ कार्यक्षयोमूसरिफे
खलोत्थेसौम्येनहिल्लाजमतेनचिंत्यम् ॥ २४ ॥**

धीशौस्वक्षर्दिसत्स्थानगौशुभग्रहैर्युतेक्षितौचेद्भवतःतदाशुभफलमिदानींवर्ततएवे तिवक्तव्यम् ॥२२॥ **अथशुभफलमाह** व्यत्यस्तमिति। अस्मात्स्वक्षर्दिसत्स्थान गतइति पूर्वोक्तादर्थाद्विपरीतभावेदुष्टस्थानेसतिव्यत्यस्तंअन्यथाज्ञेयम् । तद्यथास लग्नाधीशःकार्याधीशोवास्वशत्रुक्षेत्रगतःस्वनीचगृहगतोवा स्वशत्रुहद्दादिष्वशुभे षुपापगृहस्थानेषुवागतःसन् पापग्रहैर्युतोदृष्टोवाचेदभूत्तदाप्राक्पूर्वमेवाऽशुभम भवत्।यदा लग्नाधीशःकार्याधीशोवादुष्टस्थानगतःसन् पापग्रहैर्युतईक्षितोवाचेदा स्तेतदेदानींअनिष्टंवर्ततएवेतिवाच्यम् ॥अथतृतीयमुथशिलयोगेफलविशेषविचार माह अथेति । यदालग्नेशःकार्येशोवाइष्टर्क्षगतःमित्रराशेःसका शदनिष्टग्रहंशत्रुग्रहं प्रपन्नःप्राप्तःतदाप्राक्पूर्वंशुभंशुभफलंअभूज्जातामितिवक्तव्यम् । इदानीमशुभफ लंवर्ततइतिवाच्यम् । संयातुकामेन । तद्यथा लग्नधीशःकार्याधीशोवामित्रगृ हेवर्तते अग्रेशत्रुगृहंप्रतिआयास्यतितदाअशुभफलंभाविवाच्यमग्रेभविष्यती तिवाच्यम् ॥ २३ ॥ **अथेसराफयोगस्यलक्षणमाह** शीघ्रइति । यदामंद

इसराफयोगः

गतेःमंदगतिग्रहस्यैकमप्यंशंशीघ्रःशीघ्रगतिग्रहोऽभ्ये ति अतिक्रम्यग्रेगच्छति तदाइसराफःइसराफ ख्योयोगःस्यात् अपरःपर्यायोमूसरीफाख्यइति । ख लोत्थेशीघ्रगतिमंदगतिग्रहयोःपापयोःसंबंधेनजातेमू सरिफेयोगेसतिकार्यक्षयोवांछितकार्यनाशःस्यात् । तस्मिन्नीसराफयोगे सौम्येशुभग्रहोत्पन्नेकार्यक्षयोना

**लग्नेशकार्याधिपयोर्नदृष्टिर्मिथोऽथतन्मध्यगतोपिशीघ्रः ॥ आदा
यतेजोयदिपृष्ठसंस्थान्येसेदथान्यत्रहिनक्तमेतत् ॥ २५ ॥ स्त्रीला
भपृच्छातनुरस्तिकन्यास्वामीबुधःसिंहगतोदशांशैः ॥ सूर्यांशकै
र्देवगुरुःकलत्रेदृष्टिस्तयोर्नास्तिमिथोऽथचंद्रः॥ २६ ॥ चापेवृषेचोभ
यदृश्यमूर्तिःशीघ्रोऽष्टभागैरथवाभवांशैः ॥ आदायतेजोबुधतोददौ
यज्जीवायलाभःपरतःस्त्रियाःस्यात् ॥ २७ ॥**

स्ति इदंफलंहिल्लाजमतेनचिंत्यंज्ञेयम्॥ २४॥ **अथनक्तयोगस्यलक्षणमाह** लग्नेशेति। लग्नेशःलग्नस्वामीकार्याधिपःकार्यस्वामीअनयोर्मिथःपरस्परंदृष्टिर्नास्ति अथतन्मध्यगतोपिशीघ्रः यदितयोर्लग्नाधीशकार्याधीशयोर्मध्येयःकश्चिच्छीघ्रगतिग्रहोभवति। तादृशोमध्यवर्तीपृष्ठसंस्थाच्छीघ्रग्रहात्तेजःआदायगृहीत्वाऽन्यत्रान्यस्मिन्मंदगतिग्रहेन्यसेत्ऽअर्पयतितन्नक्तंनक्तनामयोगःस्यात् ॥ २५ ॥

अथाऽस्यनक्तयोगस्योदाहरणमाह स्त्रीलाभेति चापइति च। केनचित्प्रष्ट्रा यस्मिन्कस्मिन्समयेआगत्यपृच्छाप्रश्नःकृतः ममस्त्रीप्राप्तिर्भविष्यतिनवेति । तस्मिन्समयेतनुर्लग्नंकन्यास्ति।तस्यस्वामीबुधःसिंहगतःसिंहराशौद्वादशस्थानेदशांशैर्दशभिरंशैरुपलक्षितोस्ति तथादेवगुरुःबृहस्पतिःसूर्यांशकैर्द्वादशभिरंशैरुपलक्षितःसन्कलत्रेसप्तमस्थानेस्ति तयोर्बुधजीवयोर्मिथःपरस्परंषडष्टस्थानस्थितत्वादृष्टिर्नास्त्येव। अथचंद्रःशीघ्रःशीघ्रगतिग्रहःउभयोर्बुधजीवयोर्मध्यगतःसन्चापेधनुषिअथवावृषभराशौअस्ति । कीदृशःउभयदृश्यमूर्तिः उभाभ्यांबुधजीवाभ्यांदृश्यामूर्तिःस्वरूपंयस्यबुधजीवदृष्टः । पुनःकीदृशः अष्टभागैरथवाभवांशैः

नक्तयोगोऽयम्.

एकादशभिरंशैरुपलक्षितः । एतादृशश्चंद्रःबुधःतेजः सामर्थ्यंआदायगृहीत्वाजीवायगुरवेयद्ददौददातिस्म । तस्माल्लग्नस्वामिनोबुधस्यतेजोपहारात्स्वप्रयत्नेनस्त्रीप्राप्तिर्नभवतीतिवक्तव्यम्। कुतःतृतीयेनमध्यस्थचंद्रेण तेजोपहारात्तस्मात्तृतीयमध्यस्थप्रयत्नेनस्त्रियाःप्राप्तिर्वक्तव्या ॥ नक्तयोगोयम्॥ २६ ॥ २७ ॥

अंतःस्थितोमंदगतिस्तुपश्येदीप्तांशकैर्द्वावथशीघ्रतस्तु ॥ नीत्वाम
होयच्छतिमंदगायकार्यस्यसिद्ध्यैयमयःप्रदिष्टः ॥२८॥राज्याप्तिपृ
च्छातुललग्ननाथोमेषेसितस्त्वष्टलवैर्वृषस्थः ॥ चंद्रोरसांशैर्यदिरा
ज्यनाथोदृष्टिस्तयोर्नास्तिगुरुस्तुमंदः ॥ २९ ॥ दिगंशकैःकर्कगत
स्तुपश्यन्नुभौमहोदीप्तलवैःसचांद्रं ॥ ददौसितायेतिपदस्यलाभोऽ
मात्येनभावीतिविमृश्यवाच्यम् ॥ ३० ॥

अथयमयायोगलक्षणमाह अंतःस्थितइति । द्वौलग्नाधीशकार्याधीशौपरस्परंनपश्यतःअनयोर्लग्नाधीशकार्याधीशयोरंतःस्थितोमध्येवर्तमानोमंदगतिर्ग्रहःस्वदीप्तांशैःकृत्वाद्वौलग्नाधीशकार्याधीशौस्थानदृष्ट्यापश्येत् ॥ अथसमंदगामीग्रहःशीघ्रतःलग्नाधीशकार्याधीशयोर्मध्येयःशीघ्रगतिग्रहःतस्मान्महस्तेजोनीत्वागृहीत्वामंदगायमंदगतिग्रहाययच्छति । लग्नपकार्यपयोर्मध्येयोमंदगतिर्ग्रहःतस्मैयच्छतिददातिसयमयाख्योयोगःवांछितकार्यस्यसिद्ध्यैप्रदिष्टःकथितः ॥ २८ ॥

अथास्ययमयायोगस्योदाहरणम् राज्येति दिगंशकइतिच । ममराज्यप्राप्तिर्भविष्यतिनवेतिपृच्छायांप्रश्ने लग्नंतुला तस्यनाथःस्वामीसितःशुक्रः मेषेसप्तमस्थानेगतोऽष्टलवैरुपलक्षितोस्ति तथाराज्यनाथः राज्यभवनंदशमंतस्यनाथःस्वामीचंद्रःरसांशैःषडंशैरुपलक्षितःसन् वृषभस्थोऽष्टमस्थानगतोभवति । तयोर्लग्नाधीशराज्यनाथयोःपरस्परंद्विर्द्वादशस्थानस्थितत्वात् दृष्टिर्नास्त्येव । गुरुः बृहस्पतिर्मंदोमंदगतिर्ग्रहःदिगंशकोदशभिरंशैःपरिमितःकर्कगतःकर्कस्थितोदशमस्थानस्थितःसन्उभौलग्नाधीशकार्याधीशौस्थानदृष्ट्यापश्यन्सन् उभाभ्यांचंद्रशुक्राभ्यांअधिकैःस्वदीप्तांशैःकृत्वासचांद्रंचंद्रसंबंधिमहःतेजोगृहीत्वासितायशुक्रायददौददाति । अतःकारणात्पदस्यस्थानस्यराज्यलाभोऽमात्येनमंत्रिणाभाविभविष्यति । इतिविमृश्यविचार्यवाच्यंवक्तव्यम् ॥ यमयायोगोऽयम् ॥
॥ २९ ॥ ३० ॥

यमयायोगोऽयम्



वक्रःशनिर्वायदिशीघ्रखेटात्पश्चात्पुरस्तिष्ठतितुर्यदृष्ट्या ॥ एकर्क्षे सप्तर्क्षभुवादृशावापश्यन्नथांशैरधिकोनकैश्चेत् ॥ ३१ ॥ तेजोहरे त्कार्यपदेत्थशालीस्थितोऽपिवासौमणऊशुभोन ॥ स्त्रीलाभपृच्छा तनुरस्तिकन्याऽत्रज्ञोदिगंशैस्तिथिभिःसुरेज्यः ॥ ३२॥ कलत्रगः खेऽवनिजोभवांशैःपूर्वंबुधोभौमहृतःस्वतेजाः ॥ जीवेनपश्चान्मि लतीतिलाभोनार्यास्तुनोपृष्ठगतेऽथवास्मिन् ॥ ३३ ॥

अथमणऊयोगलक्षणमाह वक्रइति तेजोहरेदितिच । अस्मिन्नम णऊयोगेलग्नाधीशकार्याधीशयोःपरस्परंस्थानदृष्टिरपेक्षिता । यदिशीघ्रखेटात् लग्नाधीशकार्याधीशयोर्मध्येयःशीघ्रखेटःशीघ्रगतिग्रहोंशादिस्तस्मात्पश्चात्पूर्वंपुरः अग्रेवांशैरेववक्रोभौमःशनिर्वातिष्ठति तादृशोभौमःशनिर्वातुर्यदृष्ट्याचतुर्थस्थान दृष्ट्यावैकर्क्षसप्तर्क्षभुवा । अथवाएकराशिजातयादृष्ट्या तथासप्तमस्थानजात यादृशादृष्ट्यावाचेदंशैरधिकोनकैः तद्यथा–शीघ्रग्रहस्यभागापेक्षयाऽधिकैर्वांशैः शीघ्रगतिग्रहस्यदीप्तांशमध्यवर्तिभिःपश्यन्सन् शीघ्रगतिग्रहस्यतेजोहरेत् । कीदृशःकार्यपदेत्थशालीस्थितः कार्यपदंवांछितकार्यस्यस्थानम् । अर्थात्कार्य स्थानाधीशेनसहमुथशिलकारीसंस्थितोऽपिवर्तमानश्चेद्भवति तदाअसौमणऊना मयोगःस्यात् । सशुभोन कार्यकर्तानभवेदित्यर्थः । **अथोदाहरणम्** । स्त्री लाभेति कलत्रगइतिच । ममस्त्रीप्राप्तिर्भविष्यतिनवेतिपृच्छायांप्रश्नेतनुर्लग्नंक न्यास्ति । तस्यस्वामीज्ञोबुधः । अत्रकन्यायांदिगंशैर्दशभिरंशैरुपलक्षितोऽस्ति त थासुरेज्योगुरुःतिथिभिःपंचदशभागैरुपलक्षितःसन् कलत्रगःकलत्रंस्त्रीभवनंतत्र गच्छतीति सप्तमस्थानेऽस्तीत्यर्थः । तथा अवनिजोभौमःखेदशमस्थानेभवांशै रेकादशभिरंशैरुपलक्षितोऽस्ति अथभौमस्तुर्यदृष्ट्याबुधंपश्यति । तस्माद्बुधाद् एकांशेनाधिकोभूत्वाऽग्रस्थितोजातस्ततोग्रेगत्वाभौमेनहृतंस्वतेजोयस्यतादृशः ते जोरहितःततोबुधः पूर्वंप्रथमतःकृतःपश्चादनंतरंजीवेनकार्याधीशेनसहशीघ्रगति त्वान्मिलति इतिहेतोःनार्याःजायायाःलाभःप्राप्तिर्नो नास्तीतिवक्तव्यम् ।

Indira Gandhi National Centre for the Arts

यदीत्थशालोस्त्युभयोःस्वदीप्तहीनाधिकांशैःशनिभूसुतौचेत्॥एकर्क्षगौलग्नपकार्यपौस्तस्तेजोहरौकार्यहरौनिरुक्तौ ॥ ३४ ॥ राज्याप्तिपृच्छातुललग्ननाथःकर्केसितोंशैस्तिथिभिर्दिगंशैः ॥ वृषेशशी भूपलवैःकुजश्चहरन्द्वयोर्भाहरतेचराज्यम् ॥ ३५ ॥

अयमेकोयोगः । अथापरः अथवा यथावस्थितेपूर्वस्मिन्योगेबुधापेक्षयाभौमः स्वल्पांशैरवस्थितःसन्पृष्ठतोभवति । एवमस्मिन् भौमेपृष्ठगतेसति असौमणऊयोगःकार्यनाशकोभवति । मणऊयोगोऽयम् ॥ ३१ ॥ ३२ ॥ ३३ ॥ **अथमणऊयोगभेदमाह** यदीत्थशालइति । यद्युभयोर्लग्नेशकार्येशयोर्मुथशिलयोगोस्ति तथाशनिभूसुतौएकर्क्षगौलग्नाधीशकार्याधीशयोर्मध्येकेनचित्सहएकराशिगतौस्तः। स्वदीप्तहीनाधिकांशैः । स्वशब्देनलग्नाधीशकार्याधीशावुच्येते। तयोर्येदीप्तांशकास्तदपेक्षयान्यूनैरधिकैर्वादीप्तांशमध्यवर्तिभिः शनिभौमयोरंशैःकृत्वालग्नपकार्यपयोः लग्नाधीशकार्याधीशयोस्तेजोहरौसंतौकार्यहरौकार्यनाशकौ निरुक्तौ ॥ ३४ ॥ **अथोदाहरणम्** राज्याप्तिपृच्छेति । ममराज्यप्राप्तिर्भविष्यतिनवेतिपृच्छायांप्रश्ने तुलालग्नंतस्यनाथःस्वामी सितःशुक्रः कर्केदशमेस्थाने तिथिभिःपंचदशांशैरुपलक्षितोस्ति । राज्यभवनाधीशःशशीचंद्रोवृषेउच्चस्थःसन्नष्टमतःसदिगंशैर्दशभिरंशैरुपलक्षितोऽस्ति । कुजोवृषस्थःसन् भूपलवैःषोडशांशैरुपलक्षितोऽस्ति । चकाराच्छनिरपिवृषस्थःसन्भूपलवैः १६ उपलक्षितोऽस्तीतिज्ञातव्यम् । भौमोद्वयोर्लग्नाधीशकार्याधीशयोरित्थशालेपरस्परमुथशिलयोगेसतिभांतेजोहरन् राज्यंहरति । पुनर्मणऊयोगोऽयम् ॥ ३५ ॥

मणऊयोगोऽयम्

पुनर्मणऊयोगः

लग्नकार्येशयोरित्थशालत्रेंद्धित्थशालतः ॥
कंबूलंश्रेष्ठमध्यादिभेदैर्नानाविधंस्मृतम् ॥ ३६ ॥

अथाष्टमषोडशभेदभिन्नंकंबूलयोगंवक्तुकामःसामान्यतःकंबूलयोगलक्षणमाह लग्नकार्येशयोरित्थेति अत्रलग्नाधीशकार्याधीशयोरित्थशालेपरस्परमुथशिलयोगे सति अनयोर्मध्येकेनचिदेकेनसाकंइंद्वित्थशालतः इंदुश्चंद्रः इत्थशालतः मुथशिलंचेत्करोतितदाकंबूलंकंबूलनामायोगःस्यात् लग्नेशकार्येशयोर्मध्येकेनचिदेकेनसहचंद्रमुथशिलेकंबूलंभवतीत्युक्तम् । ताजिकभूषणेयथा—निशाकरोयोगकरग्रहाभ्यामेकेनचेन्मुत्थशिलंकरोति ॥ कंबूलयोगःकथितस्तदानींपूर्णोहिमध्योऽधमकस्त्रिधाऽसौ ॥ सममध्यमयोर्मध्यमत्वेनगणनात्रिधाइत्युक्तम् अन्यच्च द्वयोर्मुथशिलेविधुःकेनचित्स्यात्तयोर्मुथशिलःसकंबूलयोग इति ॥ तत्कंबूलंसामान्यतस्त्रिविधम् श्रेष्ठमध्यादि । श्रेष्ठम् मध्यम् आदिशब्देनाधमम् एतैर्भेदैर्नानाविधंस्मृतम् । लग्नेशकार्येशचंद्राणांचतुर्विधाधिकारभेदेनषोडशप्रकारकमित्यर्थः । तद्यथा—उत्तमोत्तमम् १ उत्तममध्यमम् २ उत्तमम् ३ उत्तमाधमम् ४, मध्यमोत्तमम् ५ मध्यममध्यमम् ६ मध्यमम् ७ मध्यमाधमम् ८, उत्तमम् ९ मध्यमम् १० मध्यममध्यमम् ११ अधमम् १२ अधमोत्तमम् १३ अधममध्यमम् १४ अधमम् १५ अधमाधमम् १६ एतेषांप्राकट्यार्थंचक्रंलिख्यते ॥ तत्रस्वगृहेस्वोच्चाधिकारश्चोत्तमः । स्वहद्दास्वद्रेक्काणस्वनवांशाधिकारोमध्यमः । स्वशत्रुस्वनीचाधिकारोऽधमः।एतत्स्थानत्रितयराहित्यंसमाधिकारः उक्तंचमनुष्यजातके कंबूलमीषाद्वितयेत्थशालेचंद्रोऽपिचेन्मुत्थशिलंविधत्ते॥ मिथःस्वगेहोच्चगतौप्रधानंमध्यंत्रिकाद्येत्वधमंपरर्क्षे ॥समरसिंहेप्युक्तमस्ति ॥३६॥

षोडशकंबूलयोगज्ञानार्थं चक्रम् ।

	लग्नाधीशकार्या०	लग्नाधीशकार्या०	लग्नाधिका०	लग्नाधिका०
उत्तमाधिकारश्चंद्रः	मध्यमाधिकारस्थौ	मध्यमाधिका०	समाधिका०	अधामधिका०
मध्यमाधिकारश्चंद्रः	उत्तमाधिका०	मध्यमाधिका०	समाधिका०	अधमाधिका०
समाधकारश्चंद्रः	उत्तमाधिका०	मध्यमाधिका०	समाधिका०	अधमाधिका०

यदींदुःस्वगृहोच्चस्थस्तादृशौलग्नकार्यपौ ॥ इत्थशालीकंबूलंतदु त्तमोत्तममुच्यते ॥ ३७॥ स्वीयहद्दाद्रेक्काणांकथाभागस्थेनेत्थशा लतः ॥ मध्यमोत्तमकंबूलंहीनाधिकृतिनोत्तमम् ॥ ३८ ॥

उत्तमोत्तमाभिःसंज्ञाभिस्तानेवभेदानाह ॥ तत्रादौउत्तमोत्तमकंबूललक्षण माह यदींदुरिति। यदिइंदुश्चंद्रः गृहोच्चस्थःस्वगृहेस्वोच्चेवाभवतितादृशौलग्न कार्यपौ। तादृशेनस्वगृहस्वोच्चस्थितेनवालग्नाधीशेन तथास्वगृहस्थेनोच्चस्थितेन वाकार्याधीशेन। परस्परकृतमुथशिलेन सह इत्थशालीमुथशिलंकरोति। तदात त्कंबूलंउत्तमोत्तममुच्यते। त्रयाणांउत्तमाधिकारप्राप्तत्वात्। अयंप्रथमोभेदः। अत्रषोडशकंबूलयोगेषुलग्नेशकार्येशयोरेकाधिकारत्वंपरस्परमुथशिलंचनियतम् चंद्रमुथशिलंतुलग्नेशकार्येशयोर्मध्येकेनचिदेकेनसहापेक्षितम् ॥ ३७ ॥ **अथोत्त ममध्यमकेवलोत्तमयोःकंबूलयोर्लक्षण माह** स्वीयेति अथस्वीयहद्दाद्रेक्काणांकभा गस्थेनस्वहद्दायांस्वद्रेक्काणेवास्वनवांशेवाल ग्नाधीशेनकार्याधीशेनच। परस्परंकृतमुथाशि लेनचस्वगृहगःस्वोच्चराशिगतोवाचंद्रश्चेन्मुथ शिलंकरोति तदोत्तममध्यमंकंबूलंस्यात् कुतः चंद्रस्योत्तमाधिकारप्राप्तत्वात्। इतरयोर्मध्यमाधिकारप्राप्तत्वात्। ग्रंथकर्त्रातुमध्यमोत्तममित्युक्तम् कुतः छंदोभं गभयात्। **अत्रोदाहरणम्** ममभाग्यंभविष्यातिनवेतिप्रश्ने तुलालग्नं तस्यस्वामी भृगुर्दशमेस्वहद्दायांदशांशः १० भाग्यभवनाधीशोबुधः सप्तमेस्वहद्दायांचतुर्द शांशः १४ अनयोःपरस्परंमुथशिलम्। चंद्रःकर्के स्वगृहेअष्टादशांशस्ताभ्यां मुथशिलीत्युत्तममध्यममेतत्कंबूलमत्यल्पायाससाध्यंभाग्यंफलिष्यति। एवंस्वद्रे क्काणस्वनवांशस्थाभ्यांउदाहरणानिएषूह्यानि। एवंहीनाधिकृतिनाहीनाः गताः उत्तममध्यमाधमाधिकाराःयस्य तादृशेनलग्नाधीशेनकार्याधीशेनपरस्परमुथशिले नस्वगृहस्थःस्वोच्चस्थोवाशशीचेन्मुथशिलंकरोति तदोत्तममेवकंबूलंभवति कुतः केवलंचंद्रस्योत्तमाधिकारप्राप्तत्वात् इतरयोःसमाधिकारप्राप्तत्वात्। **उदाहर**

उत्तममध्यकंबूलम्

उत्तमाधमतानीचरिपुगेहस्थितेनचेत् ॥ स्वद्रेक्काणांशगश्चंद्रःस्वभोच्चस्थेत्थशालकृत् ॥ ३९ ॥ मध्यमोत्तममेतच्चपूर्वस्मान्नविशिष्यते ॥ स्वहद्दादिपदस्थेनकंबूलंमध्यममध्यमम् ॥ ४० ॥

णम् राज्याप्तिप्रश्ने लग्नंमिथुनं तस्यस्वामीबुधःसमस्यगृहेतिष्ठति । राज्यभवनाधीशोगुरुःसमस्यगृहेकन्यायामास्तिचंद्रस्तूच्चेवृषे । एवंत्रयाणांपरस्परमुथशिलयोगेसत्युत्तमंकंबूलंजातंतेनराज्यप्राप्तिरुत्तमावक्तव्या ॥ ३८ ॥ **अथश्लोकार्धेनोत्तमाधमकंबूललक्षणमाह** उत्तमेति ।स्वनीचराशिगतेनस्वशत्रुराशिगतेनवा लग्नाधीशेनकार्याधीशेनचपरस्परंमुथशिलयोगेसतिस्वगृहगतः स्वोच्चराशिगतोवा चंद्रः तयोरन्यतरेणचेत् मुथशिलंकरोति तदोत्तमाधमता उत्तमाधमाख्यंकंबूलं स्यात् कुतःचंद्रस्योत्तमाधिकारप्राप्तत्वात् इतरयोरधमाधिकारप्राप्तत्वात् । **अत्रोदाहरणम्** स्त्रीप्राप्तिप्रश्ने तुलालग्नंतत्स्वामीशुक्रःकन्यायांदशांशः १० नीचेस्त्रीभवनाधीशोभौमःकर्केनीचेपंचदशांशश्चंद्रोऽपिकर्केस्वगृहे द्वादशांशः १२ एषां परस्परंमुथशिलयोगः उत्तमाधमकंबूलाख्योजातोऽतःस्त्रीप्राप्तिरीषदायाससाध्या । **अथमध्यमोत्तमकंबूललक्षणमाह** स्वद्रेक्काणेति । स्वद्रेक्काणेस्वनवांशकेवा स्थितःसन् स्वभोच्चस्थेनस्वगृहगतेनस्वोच्चराशिगतेनवालग्नाधीशेनकार्याधीशेन चपरस्परकृतमुथशिलेनइत्थशालकृतमुथशिलंचेत्करोति तदैतत्कंबूलंमध्यमोत्तमाख्यंस्यात् कुतःचंद्रस्यमध्यमाधिकारप्राप्तत्वात् इतरयोरुत्तमाधिकारप्राप्तत्वात् एतत्मध्यमोत्तमंकंबूलंपूर्वस्मात्पूर्वोक्तात्उत्तममध्यमकंबूलान्नविशिष्यते नविशिष्टफलदमित्यर्थः । **अत्रोदाहरणम्** स्त्रीप्राप्तिप्रश्नेतुलालग्नंतस्यस्वामीशुक्रःलग्नेस्वगृहेचतुर्विंशत्यंशः २४ सप्तमभावोमेषः तत्स्वामीभौमःमेषेस्वगृहे अष्टाविंशत्यंशः २८ चंद्रस्तुवृषकर्कौविहायमकरेस्वनवमांशेद्वाविंशत्यंशैः २२ तत्रैषां मुथशिलंपरस्परमभूदितिमध्यमोत्तमाख्यंकंबूलम् । अत्रस्त्रीप्राप्तिरुत्तमा ॥ **अथश्लोकार्धेनमध्यमाधमकंबूललक्षणमाह**स्वहद्दादिपदस्थेनेति । स्वहद्दायां स्वद्रेक्काणेवास्वनवांशेवास्थितेनलग्नाधीशेनकार्याधीशेनचपरस्परकृतमुत्थशिलेन स्वद्रेक्काणेस्वनवांशेवास्थितश्चंद्रोमुत्थशिलंचेत्करोति तदामध्यमध्यमंकंबूलं

मध्यमंचकंबूलंस्याद्धीनाधिकृतिखेटजम् ॥ मध्यमाधमकंबूलंनी चारिभगखेटजम् ॥ ४१ ॥ इंदुःपदोनःस्वर्क्षोच्चस्थितेनाप्युत्तमंतु तत् ॥ स्वहद्दादिगतेनापिपूर्ववन्मध्यमुच्यते ॥ ४२ ॥

स्यात्। कुतः सर्वेषांमध्यमाधिकारप्राप्तत्वात्। अत्रोदाहरणम्—संततिप्रश्नेमिथुनलग्नंतस्यस्वामीबुधस्तुलायांस्वहद्दायांअष्टमांशः ८ सुतभवनाधीशःशुक्रोमिथुनेस्वहद्दायामष्टमांशः ८ चंद्रस्तुकर्केप्रथमेद्रेक्काणेस्वीयनवांशेचाऽस्ति अत्रत्रयाणामपिपरस्परंमुथशिलयोगाच्चमध्यममध्यमाख्यंकंबूलं तेनसंततिप्राप्तिर्मध्यममध्यमाभवति प्रयत्नेनसाध्येत्यर्थः ॥ ३९ ॥ ४० ॥ अथश्लोकार्धेनमध्यमकंबूललक्षणमाह मध्यमामिति। हीनारहिताअधिकृतयोऽधिकारायेषांतेहीनाधिकृतयस्तेचतेखेटाश्चतेभ्योजातंमुथशिलम्। एतदुक्तंभवति। स्वोत्तममध्यमाधिकाररहितेनअर्थात्समाधिकारप्राप्तेनलग्नाधीशेनकार्याधीशेनच कृतपरस्परमुथशिलेनस्वमध्यमाधिकारस्थःशशीचेत् मुथशिलंकरोति तदामध्यमकंबूलं स्यात् कुतः चंद्रस्यमध्यमाधिकारप्राप्तत्वात्इतरयोःसमाधिकारप्राप्तत्वात्। अत्रोदाहरणम्—संततिप्रश्नेवृषलग्नंतत्पतिःशुक्रः समस्यहद्दायांचतुरंशःसन् मकरेऽस्ति पंचमभवनाधीशोबुधः समस्यहद्दायांपंचांशःसन्तुलायामस्ति। चंद्रस्तुस्वेद्रेक्काणेकर्केत्र्यंशोऽस्ति। परस्परमेतन्मुथशिलेकृतेमध्यमकंबूलंजातं तेनसंततिप्राप्तिरायाससाध्येत्यर्थः। अथश्लोकार्धेनमध्यमाधमकंबूललक्षणमाह मध्यमाधमेति। लग्नाधीशेनकार्याधीशेनचस्वनीचक्षेत्रेस्वशत्रुक्षेत्रेवास्थितेनकृतपरस्परमुथशिलेनस्वद्रेक्काणेस्वनवांशेवास्थितश्चंद्रोमुथशिलंचेत्करोति तदामध्यमाधमाख्यंकंबूलंस्यात् कुतः चंद्रस्यमध्यमाधिकारप्राप्तत्वात् इतरयोरधमाधिकारप्राप्तत्वात्। अत्रोदाहरणम्—भाग्यप्राप्तिप्रश्नेमेषलग्नं तस्यस्वामीभौमःकर्केनीचेस्तिनवमभवनस्वामीगुरुर्मकरेनीचे चंद्रःकर्केस्वद्रेक्काणे एषांपरस्परमुथशिलयोगसत्वान्मध्यमाधमंकंबूलंजातं भाग्यप्राप्तिरायाससाध्याभवति ॥ ४१ ॥ अथापरमुत्तमकंबूललक्षणमाह इंदुरिति। इंदुश्चंद्रः पदोनःअधिकाररहितःस्वगृहस्वोच्चस्वद्रेक्काणस्वनवांशस्वनीचस्वशत्रुक्षेत्ररूपाधिकाररहितः। किंतु

पादोनेनापिमध्यंस्यादितियुक्तंप्रतीयते ॥
नीचारिस्थेनेत्थशालेऽधमकंबुलमुच्यते ॥ ४३ ॥

समग्रहादिगतः । स्वर्क्षोच्चस्थितेनस्वराशिगतेनस्वोच्चराशिगतेनवालग्नाधीशेन कार्याधीशेनचपरस्परमुथशिलेनचेन्मुथशिलवान्भवति तदोत्तममेवकंबूलंस्यात् कुतः चंद्रस्याधिकारशून्यत्वात् इतरयोरुत्तमाधिकारप्राप्तत्वात् । अत्रोदाहरणम्—धनलाभप्रश्नेतुलालग्नं लग्नाधीशःशुक्रः लग्नेस्वगृहे धनाधीशोभौमः मकरेउच्चे । चंद्रःसमद्रेक्काणेमिथुनेस्ति । एषांपरस्परमुथशिलयोगसत्वात् कंबूलंसमोत्तमंजातमितिभाग्यप्राप्तिरुत्तमा । **अथापरंमध्यमकंबूललक्षणंश्लोकार्धेनाह** स्वहद्दादीति । स्वहद्दायांस्वद्रेक्काणेवासनवांशेवास्थितेनलग्नाधीशेनकार्याधीशेनचकृतपरस्परमुथशिलेनसमाधिकारश्चंद्रश्चेन्मुथशिलीतदाकंबूलंमध्यमं स्यात् कुतश्चंद्रस्याधिकाररहित्यादितरयोः मध्यमाधिकारप्राप्तत्वात् । एतत्पूर्वंवत्पूर्वोक्तमध्यमकंबूलतुल्यफलदम् । **उदाहरणम्**—धनलाभप्रश्नेतुलालग्नंतस्य स्वामीशुक्रः। सिंहेस्वहद्दायांदशांशः १० धनभावाधीशोभौमःवपुषिस्वहद्दायांदशांशः १० चंद्रस्तुमध्यमद्रेक्काणेमिथुनेदशांशः तत्रैषांपरस्परंमुथशिलयोगोस्ति । तस्मान्मध्यममेतत्कंबूलंभवति।तेनधनलाभोमध्यमोभवति ॥ ४२ ॥ पुनःप्रकारांतरेण **मध्यमकंबूललक्षणमाह** श्लोकार्धेन पादोनेनेति। पादोनेनउत्तममध्यमाधिकाररहितेनलग्नाधीशेनकार्याधीशेनचकृतपरस्परमुथशिलेनसमाधिकारश्चंद्रश्चेन्मुथशिली तदामध्यमकंबूलंस्यादित्यस्माभिर्युक्तंयुक्तिसहंप्रतीयते । कुतः सर्वेषांसमाधिकारप्राप्तत्वात् । **उदाहरणम्** । धनलाभप्रश्नेलग्नंमेषः तत्स्वामीभौमः सिंहेदशांशः १० घनेशःशुक्रःकुंभेदशांशः चंद्रस्तुलायांदशांशः १० एषांपरस्परंमुथशिलयोगेजातेसतिमध्यमकंबूलम् । तेनलब्धिर्मध्यमा । नोत्कृष्टानापकृष्टाचेत्यर्थः । **अथाधमकंबूलंश्लोकार्धेनाह** नीचारिस्थेनेत्थशालइति । स्वनीचराशिगतेनस्वशत्रुराशिगतेनवालग्नाधीशेनकार्याधीशेनच कृतपरस्परमुथशिलेनसमाधिकारस्थितश्चंद्रश्चेन्मुथशिलंकरोति तदाऽधमाख्यं

Indira Gandhi National Centre for the Arts

नीचशत्रुभगश्चंद्रःस्वभोच्चस्थेत्थशालकृत् ॥ अधमोत्तमकंबूलंपूर्वं तुल्यफलप्रदम् ॥ ४४ ॥ चंद्रोनीचारिगेहस्थःस्वहद्दादिगतोन चेत् ॥ इत्थशालीकंबूलंतदुच्यतेऽधममध्यमम् ॥ ४५ ॥ इंदुर्नी चारिगेहस्थःपादोनेनेत्थशालकृत् ॥ कंबूलंमध्यमंज्ञेयंपूर्वतुल्य फलप्रदम् ॥ ४६ ॥

कंबूलंस्यात् कुतश्चंद्रस्यसमाधिकारप्राप्तत्वात् इतरयोरधमाधिकारप्राप्तत्वात् । **उदाहरणम् ।** पुत्रप्रश्नेमिथुनलग्नंतस्यस्वामीबुधःमीनेनीचे । पुत्रभावाधीशः शुक्रःकन्यायांनीचे। चंद्रस्त्वधिकाररहितः अत्रत्रयाणांपरस्परंमुथशिलयोगादधमं कंबूलंस्यात्। तेनपुत्राप्तिचिंताअधमाऽधमफला। ईषत्कष्टसाध्येतियावत्॥४३॥ **अथाधमोत्तमकंबूललक्षणमाह** नीचशत्रिविति । यदिचंद्रोनीचराशिगतः शत्रुराशिगतोवा । स्वगृहगतेनस्वोच्चगतेनवालग्नाधीशेनकार्याधीशेनचपरस्परंकृ तमुथशिलेनचेन्मुथशिलीभवति तदाअधमोत्तमकंबूलंस्यात् कुतः चंद्रस्याऽध माधिकारप्राप्तत्वात् इतरयोरुत्तमाधिकारप्राप्तत्वात् । एतत्पूर्वमुक्तस्यकंबूलयोग स्यतुल्यंफलंप्रददाति । **उदाहरणम्** सुखप्राप्तिप्रश्नेलग्नंसिंहः तत्स्वामीसूर्यः मेषे उच्चे सुखभवनाधीशोभौमः मकरेउच्चे चंद्रोनीचेवृश्चिके एवंत्रयाणांपरस्परंमुथ शिलेजातेसतिअधमोत्तमसंज्ञकंकंबूलमभूदिति । सुखप्राप्तिरीषदायाससाध्याभव ति॥४४॥**अथाधममध्यमकंबूललक्षणमाह** चंद्रइति। यदिचंद्रोनीचगृहतः शत्रुगृहगतोवास्वहद्दायामादिशब्देनस्वद्रेष्काणेवास्वनवांशेवालग्नाधीशेनकार्या धीशेनचपरस्परंकृतमुथशिलेनचेदित्थशालीमुथशिलीभवति।तदाऽधममध्यमकं बूलमुच्यते कुतः चंद्रस्याधमाधिकारत्वादितरयोर्मध्यमाधिकारप्राप्तवात् । **उदा हरणम्** पुत्रप्राप्तिप्रश्नेकन्यालग्नंतत्स्वामीबुधःमकरेस्वहद्दायांत्र्यंशः। पुत्रभावाधी शःशनिस्तुमीनेस्वहद्दायांपंचांशोस्ति । चंद्रस्तुनीचेवृश्चिकेत्र्यंशः । एषांत्रया णांपरस्परमुथशिलयोगेजातेसति अधममध्यमकंबूलंजातं। तेनसंततिप्राप्तिरल्या याससाध्याज्ञेया ॥४५ ॥ **अथान्यदधमकंबूललक्षणमाह** इंदुरिति। यदीं दुश्चंद्रः स्वनीचराशिगतःस्वशत्रुराशिगतोवा पादोनेनउत्तममध्यमाधिकाररहि

नीचारिभस्थखेटेननीचारिभगतःशशी ॥ इत्थशालीकंबूलंतदध माधममुच्यते ॥ ४७ ॥ मेषेरविःकुजोवापिवृषेकर्केऽथवाशशी ॥ तत्रेत्थशालीकंबूलमुत्तमोत्तमकार्यकृत् ॥ ४८ ॥ वृश्चिकस्थःश शीभौमःकर्केतत्रेत्थशालतः ॥ अधमाधमकंबूलंकार्यविध्वंसदुः खदम् ॥ ४९ ॥

तेनलग्नाधीशेनकार्याधीशेनचकृतपरस्परमुथशिलेनचेन्मुथशिलीभवति तदाऽ धमाख्यंकंबूलंज्ञेयम् कुतःचंद्रस्याधमाधिकारप्राप्तत्वात् इतरयोः समाधिकारप्रा प्तत्वात्।एतत्पूर्वमुक्तस्यकंबूलयोग तुल्यफलंप्रददाति। **उदाहरणम्** राज्याप्तिप्र श्नेवृषलग्नंतत्स्वामीशुक्रःषडंशःसिंहे । राज्याधीशःशनिर्वृषेदशांशः१०चंद्रस्तुनी चेवृश्चिकेत्र्यंशोस्ति। एषांमुथशिलयोगेजातेऽधमकंबूलंतेनराज्यप्राप्तिःकष्टसाध्या ॥ ४६ ॥ **अथाधमाधमकंबूललक्षणमाह** नीचारिभस्थेति। स्वनीचराशिगते नस्वशत्रुराशिगतेनवालग्नाधीशेनकार्याधीशेनचपरस्परंकृतमुथशिलेनस्वनीचरा शिगतःस्वशत्रुराशिगतोवाशशीचेन्मुथशिलंकरोति तदाकंबूलमधमाधममुच्यते। कुतः चंद्रस्येतरयोश्चाधमाधिकारप्राप्तत्वात्। **उदाहरणम्** पुत्रलाभप्रश्नेलग्नंधनुः तस्यस्वामीगुरुः मकरेनीचे पुत्रभावाधीशोभौमः कर्केनीचे चंद्रोपिमीनेवृश्चिकेवा अत्रत्रयाणांपरस्परमुथशिलयोगेऽधमाधमकंबूलाख्ययोगस्तेनसंततिलाभोनास्त्येवे तिवाच्यम ॥ ४७ ॥ एवंषोडशकंबूलस्यभेदाउक्ताः। अथप्रागुक्तानांकंबूलभे दानांमध्येउत्तमोत्तमकंबूलयोगोदाहरणमाह मेषेइति । अत्रापत्यप्रश्नेमेषलग्नं तत्स्वामीभौमः मेषेस्वगृहे । पंचमभावाधीशोरविर्मेषेस्वोच्चे । अनयोर्लग्नाधी शकार्याधीशयोः परस्परमुथशिलयोगेसति । चंद्रस्यवृषउच्चंकर्कस्वगृहं अन योर्मध्येक्वचिद्विद्यमानश्चंद्रश्चेन्मुथशिलंकरोति । तदाकंबूलमुत्तमोत्तमकार्यकृत् वांछितफलदमित्यर्थः॥४८॥ अथांतिमकंबूलयोगस्याधमाधमाख्यस्योदाहरणमा ह वृश्चिकस्थइति । पुत्रलाभप्रश्नेधनुर्लग्नंलग्नाधीशोगुरुर्मकरेनीचे । पुत्रभा वाधीशोभौमः कर्केनीचे । वृश्चिकस्थःचंद्रोनीचे । तत्रचंद्रभौमाभ्यांगुरुभौ

Indira Gandhi National Centre for the Arts

एवंपूर्वोक्तभेदानामुदाहरणयोजना ॥ उक्तलक्षणसंबंधादूहनीयावि चक्षणैः ॥ ५० ॥ मेषस्थेऽब्जेशनीत्यादिदृष्टांतान्मंदशीघ्रयोः ॥ एकर्क्षावस्थितावित्थशालादीनपरेजगुः ॥ ५१ ॥

माभ्यांचमुथशिलयोगाज्जातंकंबूलमधमाधमाख्यंतद्वांछितकार्यविध्वंसदंदुःखंच ददाति ॥ ४९ ॥ अथाद्यंतिमयोः कंबूलभेदयोर्दिशाअंतरालवर्तिनांकंबूलभेदानामुदाहरणान्यूह्यानीत्याह एवमिति । एवं पूर्वोक्तभेदानांविचक्षणैर्दैवज्ञैरुदाहरणयोजनाउक्तलक्षणसंबंधात्प्रागुक्तलक्षणयोजनाऊहनीयाविचार्या । उदाहरणानिनोक्तानि कुतःलक्षणवाक्यानांस्पष्टार्थत्वात् ॥ ५० ॥ अथात्रकेचित्कंबूललक्षणेशीघ्रमंदगतिग्रहयोरेकराशिस्थयोरेवमुथशिलयोगमाहुः । तन्मतमुपन्यस्यति । मेषराशिस्थेऽब्जेचंद्रमसि । मेषस्थेनैवशनिनासह मुथशिलयोगे कृतेसति । तदाएतदुत्पन्नंकंबूलंमध्यमाधमसंज्ञंजातंइत्यादिदृष्टांतवशात्शीघ्रमंदगतिग्रहयोरेकराश्यवस्थितत्वात् एवंमुथशिलयोगादीनपरेजगुः । आदिशब्देनेसराफादयः । तथाच **समरसिंहः** मेषस्थेब्जेशनिनाकर्कस्थेभूभुवास्त्रियांक विना ॥ मकरस्थेगुरुणासहमीनस्थेज्ञेननशुभंच ॥ १ ॥ अस्यार्थः । मेषराशिस्थेऽब्जेचंद्रमसि स्थानांतरस्यानुक्तत्वान्मेषस्थेनैवशनिनासह कृतमुथशिलेसतिमध्यमाधमसंज्ञंकंबूलंजातं । कुतः अत्रहिचंद्रेमेषेस्वगृहोच्चाधिकारेनास्तिस्वद्रेक्काणस्तुनसंभवति प्रायःस्वनवांशेस्ति । शनिस्तुनीचस्थएव । तथाकर्कस्थेचंद्रेभूभुवामंगलेन कर्काख्यनीचस्थानगतेन कृतपरस्परमुथशिलेसत्युत्तमाधमकंबूलंजातम् । कुतः अत्रहिचंद्रःस्वगृहस्थः भौमोनीचस्थः तथा स्त्रियां कन्यास्थेचंद्रेकविनाशुक्रेण कन्याख्यनीचराशिगतेनसहमुथशिलेकृतेसति मध्यमाधमकंबूलंजातं। कुतः चंद्रःस्वनवांशोस्ति शुक्रोनीचेस्ति अत्रापिचंद्रस्यस्वद्रेक्काणस्तुनसंभवति । तथा मकरस्थेचंद्रेगुरुणामकराख्यनीचराशिगतेनसहमुथशिलेसतिंमध्यमाधमकंबूलंजातम् । कुतः अत्रचंद्रःस्वद्रेक्काणेस्वनवांशेचास्ति गुरुनीचे अत्रापिस्वद्रेक्काणस्तुनसंभवति । तथा मीनस्थेचंद्रेबुधेनमीनाख्यनीचस्थितेनमुथशिलेसतिमध्यमाधमकंबूलंजातम् । कुतः अत्रचंद्रःस्वद्रेक्काणेस्वनवांशेस्तिबुधोनीचेस्ति । इदमुदाहरणपंचकंशुभंनशुभफलदंनेत्यर्थः ॥ ५१ ॥

Indira Gandhi National Centre for the Arts

तदयुक्तंनीचगस्यनीचेनरिपुणारिपोः ॥ इत्थशालकार्यनाशीत्यु क्तंतत्रयतःस्फुटम् ॥ ५२ ॥ लग्नकार्यपयोरित्थशालेचैकोस्तिनी चगः ॥ स्वर्क्षादिपदहीनोऽन्योऽत्रेंदुःकंबूलयोगकृत् ॥ ५३ ॥ तत्रकार्याल्पताज्ञेयायथाजात्यन्यमर्थयन् ॥ अन्यजातिःपुमानर्थं तथैतत्कवयोविदुः ॥ ५४ ॥

अथैषांमतंदृष्टांतेनैवदूषयति तदयुक्तमिति।शीघ्रमंदगतिग्रहयोरेकराशिस्थयो रेवमुथशिलादियोगोविचार्यइतियत्केषांचिन्मतंतदयुक्तं नयुक्तिसहमित्यर्थः । कुतइत्यतआह नीचगस्येति । लग्नाधीशकार्याधीशयोर्मध्येकेनचिदेकेनग्रहेणस्व नीचराशिगतेनस्वनीचराशिगतस्यतदितरग्रहस्यचेदित्थशालंतत्कार्यनाशीत्युक्तं नहिद्वयोरेकंनीचस्थानंभवति । तथारिपुणारिपोर्लग्नेशकार्येशयोःपरस्परवैरेसति यन्मुथशिलंतत्कार्यनाशीत्युक्तम् । यतःकारणात्तत्रसमरसिंहकृतताजिकसंज्ञा तंत्रेस्फुटंप्रकटार्थमुक्तमस्ति । तद्वाक्यंचयदि नीचोनीचेनचमुथशिलकारीतथा रिपुर्द्विषता । तत्कंबूलंनेष्टंचंद्रोपिविनाशकोमुष्मिन् ॥ १ ॥ अत्रद्वितीयोयोगः एकराशिस्थयोरपिसंभवतीतिनदूषणत्वेनोपन्यसनीयः । ग्रंथकर्त्रातुआकरग्रंथसं दर्भवशाल्लिखितः ॥ ५२ ॥ अथप्रकारांतरेणफलोत्पत्तिज्ञानार्थं**कंबूलयोगस्य भेदांतरमाह** लग्नकार्येति । पूर्वंतुलग्नाधीशकार्याधीशयोरभिन्नाधिकारस्थितयो श्चंद्रेणमुथशिलेकंबूलमुक्तम् । इदानींतुतयोरप्यधिकारभेदउच्यते यत्रलग्नाधी शकार्याधीशयोर्मुथशिलयोगोविचार्यते तत्रतयोर्मध्येएकःस्वनीचगतोस्ति। अन्यः द्वितीयःस्वर्क्षादिपदहीनःस्वगृहेस्वोच्चेस्वहद्दायांस्वद्रेक्काणेस्वनवांशेस्वनीचेस्वश त्रुक्षेत्रेवानभवति अर्थात्समाधिकारगतोस्ति । अत्रसमाधिकारगतश्चंद्रश्चेन्मुथशि लंकरोति तदापिकंबूलाख्योयोगःस्यात् ॥ ५३ ॥ **अथसदृष्टांतमेतस्यफल माह** तत्रेति । तत्रतादृशेकंबूलयोगेकार्याल्पताज्ञेया । तत्रदृष्टांतः अन्यजातिः पुमान्जात्यन्यंविजातीयमर्थयनप्रार्थयन्सन्यथाअर्थंस्वल्पंलभतेइत्यध्याहारः । तथैतत्कंबूलंकवयःपंडिताविदुर्जानंति । अर्थाद्यदासजातीयमर्थयतेतदा तस्मैलज्जावशातबह्वपिकदाचित्प्रयच्छंतीत्यर्थः ॥ ५४ ॥

Indira Gandhi National Centre for the Arts

यस्याधिकारःस्वर्क्षादिःशुभोनाप्यशुभोपिच ॥ केनाप्यदृश्यमूर्तिश्चसशून्याध्वगइष्यते ॥ ५५ ॥ लग्नकार्येशयोरित्थशालेशून्याध्वगःशशी ॥ उच्चादिपदशून्यत्वान्नेत्थशालोऽस्यकेनचित् ॥ ५६ ॥ यद्यन्यर्क्षंप्रविश्यैषस्वर्क्षोच्चस्थेत्थशालवान् ॥ गैरिकंबूलमेतत्तुपदोनेनाशुभंस्मृतम् ॥ ५७ ॥ लप्स्येसुखमितिप्रश्नेसिंहलग्नेरविःक्रिये ॥ अष्टांशैःसुखपःकुंभेभौमोंशैरविभिस्तयोः ॥ ५८ ॥

अथगैरिकंबूलंवक्तुकामस्तदुपयोगित्वेन **शून्यमार्गगग्रहलक्षणमाह** यस्येति। यस्यग्रहस्यस्वर्क्षादिस्वगृहस्वोच्चस्वहद्दास्वद्रेष्काणनवांशात्मकःशुभःशुभफलदोधिकारोनास्ति अशुभोपिनीचशत्रुराशिगतःअशुभःअशुभफलदोधिकारोपिनास्ति पुनःकेनापिशुभग्रहेणपापेनवाऽदृश्यमूर्तिरदृष्टःशून्याध्वगःशून्यमार्गगइष्यतेउच्यते । अत्रार्थेसंमतिर्नास्तिसमरसिंहेनानुक्तत्वात् ॥ ५५ ॥ अथशून्यमार्गगलक्षणंप्रतिपाद्य **गैरिकंबूललक्षणमाह** श्लोकद्वयेन लग्नकार्येति । लग्नाधीशकार्याधीशयोरित्थशालेसति तत्रशशीचंद्रश्चेच्छून्याध्वगःशून्यमार्गगोभवति शून्यमार्गगःकथंजातइत्यतआह । उच्चादिपदशून्यत्वात्स्वोच्चम् आदिशब्देनस्वग्रहस्वद्रेक्काणस्वनवांशस्वनीचस्वशत्रुभं एतत्स्थानस्यशून्यत्वाद्रहितत्वादित्यर्थः ॥ ५६ ॥ अतएतादृशचंद्रस्यकेनचिल्लग्नाधीशकार्याधीशयोर्मध्येकेनचिदेकेनमुथशिलयोगश्चेन्नभवति एतादृशश्चंद्रोयदिराश्यंतेवर्तमानःसन्नन्यर्क्षमग्रिमराशिंप्रविश्य यस्मिन्राशौप्रविष्टः सराशिर्यस्यग्रहस्यस्वगृहंस्वोच्चंवासग्रहमस्मिन्यदितिष्ठेत्तेनग्रहेणसहयदिचंद्रोमुथशिलंकरोति तदागैरिकंबूलसंज्ञकोयोगोभवति । एतद्गैरिकंबूलंपूर्वोक्तकंबूलभेदतुल्यफलदंज्ञातव्यम् । विशेषैर्यदितुअन्यराशिगतश्चंद्रस्तद्राशिस्थेनग्रहेणपदोनेनस्वगृहाद्यधिकाररहितेनमुथशिलंकरोति तदातद्गैरिकंबूलमशुभमनिष्टफलंदंस्मृतम् ॥५७॥ **अथास्यगैरिकंबूलस्योदाहरणंश्लोकत्रयेणाह** लप्स्यइति। अहंसुखंसौख्यंलप्स्येप्राप्स्यामिनवेतिप्रश्नेक्रियमाणेसति तस्मिन्कालेसिंहलग्नमस्ति तस्यस्वामीसूर्यः क्रियेमेषेअष्टांशैरष्टभिरंशैरुपलक्षितोस्ति । सुखभवनंचतुर्थंवृश्चिकाख्यं तस्यस्वामीभौमः कुंभेरविभिर्द्वादशांशैरुपलक्षितो

इत्थशालोस्तितत्रेंदुःकन्यायांचरमेंशके ॥ स्वर्क्षादिपदहीनस्यनेत्थशालस्यकेनचित् ॥ ५९ ॥ सस्वोच्चगेनशशिनाऽन्यर्क्षस्थेनेत्थशालकृत् ॥ गैरिकंबूलमन्येनसहायाल्लाभदायकम् ॥ ६० ॥ शून्येध्वनींदुरुभयोर्नेत्थशालोनवायुतिः ॥ खल्लासरोनशुभदःकंबूलफलनाशनः ॥ ६१ ॥

स्ति तयोर्लग्नाधीशकार्याधीशयोःसूर्यभौमयोःपरस्परंमुथशिलयोगोस्ति। तत्रास्मिन्योगेसतिइंदुश्चंद्रः कन्यायांचरमेंशकेत्रिंशपरिमितेंशेस्ति । अत्रविद्यमानस्यस्वर्क्षादिशुभाधिकारहीनस्याऽस्यचंद्रस्यलग्नाधीशकार्याधीशयोर्मध्येकेनाचिदेकेनमुथशिलयोगोनास्ति । परंतुचंद्रस्तुलागृहंगंतुकामोस्ति । तच्चुलागृहंशनेरुच्चमस्ति अतःतुलास्थेनशनिनासहशीघ्रगामित्वात् अन्यराशिस्तुलातत्रगतश्चंद्रोमुथशिलकारीभवति एतदेवंविधंग्रहसंस्थानंगैरिकंबूलाख्यंजातम् । अथास्यफलमुच्यते । अन्येनतृतीयेनसहायभूतेनलाभंवांछितकार्यसिद्धिरूपंददाति।**उदाहरणकुंडली**

गैरिकंबूलम्

यथा अस्मिन्नेवयोगेतुलाराशौबुधादिस्तिष्ठति यस्यैकोप्यधिकारःशुभोनास्तितत्रगतश्चंद्रोबुधादिनाकृतमुथशिलश्चेत्तदाअनिष्टफलं गैरिकंबूलंज्ञेयम् अत्रोदाहरणेसंमतिर्नास्तिसमरसिंहेनानुक्तत्वात् ॥ ५८ ॥ ५९ ॥ ॥ ६० ॥ **अथखल्लासरयोगस्यलक्षणमाह** शून्यइति । अत्रकेनाचिदेकेनेतिपदमध्याहार्यम् समरसिंहेनाप्युक्तत्वात् । लग्नाधीशकार्याधीशयोर्मुथाशिलयोगस्त्वपेक्षितएव तत्रपूर्वोक्तलक्षणेनचंद्रःशून्येऽध्वनिशून्यमार्गगोस्ति । एतादृशश्चंद्रउभयोर्लग्नाधीशकार्याधीशयोर्मध्येकेनाचिदेकेनसहमुथशिलयोगवान्नभवति अथवातादृशश्चंद्रस्तेनलग्नाधीशेनकार्याधीशेनवायुतोपिनास्ति सयोगःखल्लासरनामकोज्ञेयः । अयंनशुभदः कीदृशः कंबूलफलनाशकः । मुथशिलयोगेसतिकेवलयोगेवाकंबूलंपूर्णंभवति । अत्रतुकेनापिसहमुथशिलयोगाभावात् युक्त्यभावाद्वाकंबूलफलंनाशयति ॥ ६१ ॥

अस्तनीचरिपुवक्रहीनभादुर्बलोमुथशिलंकरोतिचेत्॥ नेतुमेषनवि भुर्यतोमहोऽतेसुखेऽपिनसकार्यसाधकः ॥ ६२ ॥ केंद्रस्थआपो क्लिमगंयुनक्तिभूत्वादितोनश्यतिकार्यमंते ॥ आपोक्लिमस्थोयदि केंद्रयातंविनश्यपूर्वंभवतीहपश्चात् ॥ ६३ ॥ मंदस्वभोच्चादिपदे स्थितश्चेत्पदोनशीघ्रेणकृतेत्थशालः ॥ तत्रापिकार्यंभवतीतिवा च्यंवक्रादिनिर्वीर्यपदेनचेत्स्यात् ॥ ६४ ॥ वीर्योनितौकार्यविल ग्ननाथौस्वर्क्षादिगेनान्यतरोयुनक्ति ॥ अन्यौयदाढ्यौबलिनौतदा ऽन्यसाहाय्यतःकार्यमुशंतिसंतः ॥ ६५ ॥

अथरद्दयोगलक्षणमाह—अस्तेति। योग्रहोऽस्तंगतःस्यादथवानीचगतःस्याद थवास्वशत्रुगृहेस्यादथवावक्रीस्यादथवाहीनाऽत्यल्पाभादीप्तिर्यस्य सतेजोरहितइ त्यर्थः। एतादृशोग्रहोदुर्बलोज्ञेयः। यदिदुर्बलोग्रहःकेनापिभावस्वामिनासह मुथशिलंचेत्करोति सग्रहोऽतेमुखेप्यादावपितद्भावकार्यसाधकोनभवति। यतः कारणादेषग्रहोमहस्तेजोनेतुंनविभुःसमर्थोनभवति ॥ ६२ ॥ अथतादृशस्यर द्दसंज्ञस्यनिर्बलग्रहस्यस्थानविशेषेस्थित्वासमयविशेषेणफलपाकमाह केंद्रस्थइ ति। कार्याधीशोयोदुर्बलोग्रहःकेंद्रस्थःसन्नापोक्लिमगंआपोक्लिमस्थानगतंलग्ना धीशंग्रहंयुनक्तिमुथशिलंकरोति तदाविशिष्टंकार्यमादितःप्रथमतोभूत्वांऽतेपरि णामेनश्यतिनष्टंभवति। यदिआपोक्लिमस्थोग्रहःकेंद्रस्थानगतंग्रहंयुनक्तिमुथ शिलंकरोति तदापूर्वंप्रथमतःविनश्यनाशंप्राप्यपश्चात्प्रांतेविशिष्टंकार्यंभवतीति वाच्यम्॥ ६३ ॥ **अथदुष्फालिकुथयोगलक्षणमाह**—मंदस्वेति। मंदोमंद गतिग्रहः स्वभोच्चादिस्वक्षेत्रेस्वोच्चे आदिशब्देनस्वहद्दायांस्वद्रेकाणेस्वनवांशे वास्थितःसन् पदोनेनशीघ्रेणस्वभोच्चादिशुभाधिकाररहितेनशीघ्रगतिग्रहेणकृते त्थशालश्चेद्भवंति तत्राभीष्टंकार्यंभवतीतिवाच्यम्। चेच्छीघ्रगतिर्ग्रहःवक्रादिनि र्वीर्यपदेप्रागुक्तास्तनीचरिपुवक्रहीनभाइत्यादिनिर्बलस्थानेषुचेन्नस्यात् ॥ ६४ ॥ **अथदुत्थोत्थादिवीरयोगमाह** वीर्योनितावीति। यदालग्नाधीशकार्याधीशौ वीर्योनितौ अस्तनीचारिपुवक्रहीनभाइत्याद्युक्तरीत्यानिर्बलौस्यातां तयोर्लग्नाधी

बलीराश्यंतगोऽन्यर्क्षगामीदीप्तांशकैर्महः ॥ दत्तेऽन्यस्मैकार्यकर स्तंबीरोलग्नकार्यपोः ॥ ६६ ॥ लग्नेऽथकेंद्रेनिकटेपिवास्यविलग्न दर्शीस्वगृहोच्चदृक्के ॥ मुसल्लहेस्वेनिजहद्दगोवाबलीग्रहोमध्यगति स्त्वशीघ्रः ॥ ६७ ॥

शकार्याधीशयोर्मध्येकश्चिदेकस्तृतीयेनग्रहेणस्वर्क्षादिगेनस्वगृहोच्चस्वहद्दादिगते नसहयुनक्तिमुथशिलंकरोति तदाऽन्यसाहाय्यतस्तृतीयोयःकश्चित्सहायभूतस्त त्सकाशात्कार्यंसंतःअतिशिष्टाउशंतिवांछंति । अथवायदाऽन्यौयौकौचिद्वौग्रहौ बलिनौस्वग्रहोच्चादिगौसंतौ लग्नाधीशकार्याधीशयोर्मध्येकेनचिदेकेनसहयुक्तः मुथशिलंकुरुतस्तदाप्यन्यसाहाय्यतःकार्यमुशंतिसंतइति ॥ ६५ ॥ **अथतंबी रयोगस्यलक्षणमाह**–बलीति । यदालग्नकार्यपोःलग्नाधीशकार्याधीशयोःपर स्परंमुथशिलयोगोनभवेत्तदाऽनयोर्मध्येकश्चनबलीग्रहःराश्यंतगःस्वाक्रांतराश्यं तिमांश २९ वर्त्तीसन् यदाऽन्यर्क्षगामी अग्रिमराशिगमनकामःस्वदीप्तांशकैरन्य स्मैअग्रिमराशिविद्यमानायग्रहायमहस्तेजोदत्ते सतंबीरयोगः । अग्रिमराशिगतो ग्रहश्चेत्स्वगृहादिबलयुक्तस्तदायंयोगःकार्यकरोऽभीष्टकार्यकर्तास्यात् ॥ ६६ ॥ **अथकुत्थलक्षणमाह** अत्रकुत्थशब्देनयवनभाषयाबलीग्रहउच्यते बलमनेक प्रकारकंतत्रकांश्चित्प्रकारान्प्रथमश्लोकेनाह लग्नइति । अत्रग्रहोबलीत्यन्वयः । तत्रापिसर्वापेक्षयालग्नस्थोबली तदभावेकेंद्रस्थश्चतुर्थसप्तमदशमस्थानेषुबली परं तुलग्नस्थापेक्षयान्यूनबलः तदभवेऽस्यकेंद्रस्यनिकटेपणफरेद्वितीयपंचमैकादश स्थानेषुबली केंद्रस्थापेक्षयान्यूनबलः तदभावेयोग्रहोविलग्नदर्शीविलग्नंपश्यती तिविलग्नदर्शी तृतीयनवमस्थोबलवान्भवति । यद्वानिकटेपिवाऽस्यविलग्नद र्शीतिविशेषणविशेष्यभावः । अस्यकेंद्रस्यनिकटेपणफरेआपोक्लिमेचास्थितःसन् विलग्नदर्शीतृतीयपंचमनवमैकादशस्थःसबलवानित्यर्थः । अन्येषुषडष्टद्वादश वर्जितपणफरापोक्लिमानांनिकटपदेनसंग्रहः षडादिष्वपिगणितागतदृष्टौसोऽपि कथंचिद्बलीत्यर्थइत्याहुः । तथायोग्रहःस्वगृहेस्वोच्चेस्वद्रेकाणेस्वमुसल्लहेस्वन वांशेस्वहद्दायांवावर्तमानोबली तथामध्यगतिःनंदाक्षाभुजगारवेरित्याद्युक्तमध्यग

कृतोदयोमार्गगतिःशुभेनयुतेक्षितःक्रूरखगस्यदृष्ट्या ॥ क्षुताख्ययानाधिगतोनयुक्तःक्रूरेणसायंचसितेंदुभौमाः ॥ ६८ ॥ यदोदयंतेपररात्रिभागेजीवार्कजावह्निनराःसवीर्याः ॥ अन्येनिशीनस्यनवैकभागेस्थिताःस्थिरर्क्षेचबलेनयुक्ताः ॥ ६९ ॥ स्त्रियश्चतुर्थात्पुरुषावियद्राद्रषट्कगाओजभगाःपुमांसः ॥ समेऽपरेस्युर्मलिनोविमृश्यविशेषमेतेषुफलंनिगद्यम् ॥ ७० ॥

तितुल्यःस्पष्टगतिर्ग्रहोबलवान्भवति तथाअशीघ्रोनशीघ्रोऽशीघ्रोमध्यगत्यपेक्षयाऽल्पगतिर्ग्रहोबली ॥६७॥ अथान्यान्प्रकारानाह–कृतोदयइति । योग्रहः कृतोदयःउदितःसबली तथामार्गगतिर्मार्गीग्रहोबली तथाशुभेनशुभग्रहेणयुतः ईक्षितोवासबली तथाक्रूरखगस्यपापग्रहस्यक्षुताख्ययाचतुर्थदशमसप्तमैकराशिदृष्ट्यानाधिगतःनदृष्टःसबली तथाक्रूरेणनयुक्तःपापग्रहेणयुक्तोनभवतिसबली । एवंसामान्यतोग्रहबलमुक्त्वाइदानींसमयबलमाह सायंचसितेंदुभौमाइति । इदमग्रिमश्लोकेनसंबध्यते ॥ ६८ ॥ अथान्यत्प्रकारमाह–यदेति । सितेंदुभौमाः शुक्रचंद्रभौमाःसायंसंध्याकालेयदोदयंतेतदाबलिनः । जीवार्कजौगुरुशनीअपररात्रिभागेअर्धरात्रादुपरिभागेबलिनौ । तथानराःपुरुषग्रहाःसूर्यभौमगुरवोऽह्निदिवसेबलिनः । अन्येग्रहाःचंद्रबुधशुक्रशनयोनिशिरात्रौबलिष्ठाः । तथाइनस्यसूर्यस्यनैकभागस्थिताः सूर्योयद्राशिनवांशेतस्मिन्नेवनवांशेयदिग्रहानस्युस्तदापिबलिनोभवंति । तस्मादन्येनिशीनस्यनवैकभागेस्थिताइतिपाठःसाधीयान् । अन्येनिशीनस्यतथैकभागइत्यपिपाठः । उक्तंचसमरसिंहे सूर्यस्यनैकभागेस्थिरराशौवातदाचतेबलिनःइत्यत्रसूर्यस्यचैकभागेइतिपाठंधृत्वा एकभागेएकराशिनवांशेइतिव्याख्यानंकुर्वंतितन्न अस्तमितस्याप्येवंसंभवात् । नचास्तमितःक्वचिद्ग्रंथेबलीश्रूयते । प्रत्युतअस्मिन्नेवग्रंथेनिर्बलःश्रूयते । तस्मात्सूर्यस्यनैकभागइतियुक्तःपाठः । तथास्थिरर्क्षेचवृषसिंहवृश्चिककुंभराशिस्थाःग्रहाःबलेनयुक्ताःबलिष्ठाज्ञेयाः ॥ ६९ ॥ अथान्यान्प्रकारानाह–स्त्रियइति । स्त्रियःस्त्रीग्रहाश्चतुर्थाच्चतुर्थभावमारभ्यभषट्कगाःषड्राशिगताःबलिनःस्युः । चतुर्थाद्यावन्नवमां

लग्नात्षष्ठाष्टमेंत्येऽनृजुररिगृहगोनीचगोवक्रगामीक्रूरैर्युक्तोऽस्तगो वायदिचमुथशिलीक्रूरनीचारिभस्थैः ॥ क्षुद्दृष्ट्याक्रूरदृष्टोव्ययरिपुमृतिगैरित्थशालंविधित्सुःकुर्वन्वानिर्बलोयंस्वगृहनगभगोराहुपुच्छास्यवर्ती ॥ ७१ ॥

तम् तावन्मध्येवर्तमानबलिनःस्युरित्यर्थः । पुरुषाःपुरुषग्रहाः वियल्लावाद्दशमभावमारभ्यषड्राशिगताःबलिनःस्युः । दशमाद्यावत्तृतीयंतावन्मध्येवर्तमानाबलिनःस्युरित्यर्थः तथाओजभगाविषमराशिस्थाःपुमांसःपुरुषग्रहाबलिष्ठाः । अपरे स्त्रीग्रहाःसमेसमराशौबलिनःस्युः । एतेषुपूर्वोक्तेष्वनेकेषुबलभेदेषुविशेषंशुभाधिकाररूपंविमृश्यविचार्यफलंशुभंनिगद्यंवक्तव्यम् ॥ ७० ॥ **अथदुरफफलक्षणमाह**–अत्रयवनभाषयादुरष्फशब्देननैर्बल्यमुच्यते । तच्चानेकप्रकारकम् । तत्रकियतःप्रकारान्प्रथमश्लोकेनाह लग्नादिति । अत्रनिर्बलोयमित्यर्थः । लग्नाद्वर्षलग्नान्मासदिनप्रश्नलग्नाद्वायःकश्चिद्ग्रहःषष्ठेस्थानेऽथवाऽष्टमेऽथवांऽत्येद्वादशेवर्तमानःसन्ननिर्बलोभवति तथानृजुर्वक्रगतिग्रहोनिर्बलः तथाअरिगृहगःशत्रुराशिस्थोनिर्बलः तथानीचगःनीचराशिगतःनिर्बलः तथावक्रगामीवक्राभिलाषीग्रहोनिर्बलः तथाक्रूरैःपापग्रहैर्युक्तोग्रहोनिर्बलः तथाऽस्तगःअस्तंगतोग्रहोनिर्बलः तथायदिक्रूरनीचारिभस्थैःमुथशिली । यदिकश्चिद्ग्रहःक्रूरग्रहेणनीचराशिगतेनशत्रुराशिगतेनवाग्रहेणमुथशिलीमुथशिलंकरोतिसनिर्बलः तथाक्रूरेणक्षुद्दृष्ट्याचतुर्थदशमसप्तमैकस्थानगतदृष्टश्चेन्निर्बलः तथाव्ययारिपुमृतिगैर्द्वादशषष्ठाष्टमस्थानस्थितैर्ग्रहैःसहेत्थशालंविधित्सुःकर्तुमिच्छति अथवाकुर्वन्मुथशिलंकरोतिसनिर्बलः । तथास्वगृहनगभगःस्वगृहात्ग्रहस्ययद्गृहंयथादेशोभौमस्यतस्मान्नगभगः सप्तमंयत्स्थानंतत्रगतोग्रहोनिर्बलः तद्यथाग्रहाधिष्ठितोराशिःसचेत्ग्रहस्यस्वगृहात्सप्तमोभवति तदानिर्बलइत्यर्थः । तथाराहुपुच्छास्यवर्तीराहोःपुच्छंराहुभुक्तांशआस्यंमुखंराहुभोग्यांशाः तत्रतिष्ठतियोग्रहःसनिर्बलः ॥ ७१ ॥

अनीक्षमाणस्तनुमस्तभागास्थितःस्वभोचादिपदैश्वशून्यः ॥ क्रूरे सराफीनसवीर्ययुक्तःकार्यविधातुंनविभुर्यतोऽसौ ॥ ७२ ॥ चंद्रः सूर्याद्द्वादशेवृश्चिकाद्येखंडेनेष्टोंऽत्येतुलायांविशेषात् ॥ राशीशेना दृष्टमूर्तिर्नसर्वैर्दृष्टोज्ञेयःशून्यमार्गोपदोनः ॥ ७३ ॥ क्षीणोभांते नाशुभोजन्मकालेपृच्छायांवाचंद्रएवंविचिंत्यः ॥ शुक्लेभौमःकृष्ण पक्षेऽर्कसूनुःक्षुद्दृष्ट्येंदुंवीक्षतेनोशुभोऽसौ ॥ ७४ ॥

अथान्यानशुभप्रकारानाह—अनीक्षमाणइति । योग्रहस्तनुंलग्नमनीक्षमाणो नेक्षतेसनिर्बलः । तथाअस्तभागास्थितःसूर्योयद्राशिनवांशोऽस्तितस्मात्सप्तमो योनवांशः तत्रस्थितोग्रहोनिर्बलः । उक्तंचसमरसिंहेन सूर्यास्तभागसंस्थइ ति । तथायोग्रहःस्वभोच्चादिपदैः स्वगृहस्वोच्चस्वहद्दास्वद्रेकाणस्वनवांशाख्यैः पदैरधिकारैःशून्योरहितःसनिर्बलः । तथायोग्रहःक्रूरेसराफीपापग्रहेणसहईसरा फंयोगंकरोतिसग्रहोवीर्ययुक्तोनभवति । यतोसौग्रहःकार्यमनोभिलषितंविधातुं कर्तुंनविभुःनसमर्थोभवति ॥ ७२ ॥ एवंसर्वेषांग्रहाणांसामान्यतःदुरफ्फमु क्त्वाइदानींचंद्रस्याऽत्यंतदुरफ्फविशेषमाह—चंद्रइति । सूर्यात्सूर्याधिष्ठितराशेः सकाशात्द्वादशेस्थानेयदिचंद्रोभवतिसनिर्बलः । तथावृश्चिकाद्येखंडेपूर्वार्धेने ष्टः अशुभफलदःनिर्बलः तथातुलायाःतुलराशेःअंत्येउत्तरार्धेविशेषान्नेष्टःनि र्बलः तथाराशीशेनचंद्रोयास्मिन्राशावस्ति तद्राशीश्वरेणअदृष्टमूर्तिर्नदृष्टस्तथा सर्वैर्ग्रहैर्नदृष्टःसनिर्बलः तथाशून्यमार्गःप्रागुक्तलक्षणलक्षितशून्यमार्गगश्चेच्चंद्रो भवतितदापादोनोनिर्बलोज्ञेयः ॥ ७३ ॥ **अथान्यदुरफ्फंचंद्रस्याह**—क्षीण इति । चंद्रइत्यनुवर्तते । क्षीणःअर्धोनःकृष्णाष्टमीमारभ्यशुक्लाष्टमीपर्यंतमिति यावत् । कृष्णैकादशीमारभ्यदर्शांतपर्यंतंक्षीणइतिकेचित् । तथाभांतेराशेरंते राशिरंतिमनवांशेवर्तमानःसन् नोशुभोदुष्टफलदःस्यात् निर्बलइत्यर्थः । एव ममुनाप्रकारेणचंद्रोजन्मकालेतथापृच्छायांप्रश्नलग्नेविचिंत्यः वाशुक्लेशुक्लपक्षेभौ मःकृष्णपक्षेऽर्कसूनुःशनैश्वरः एतौक्षुद्दृष्ट्याचतुर्थदशमसप्तमैकस्थानदृष्ट्याचेदिं दुंवीक्षेतेपश्यतःतदाऽसौचंद्रःनोशुभःशुभफलदोनभवति ॥ ७४ ॥

शुक्लेदिवान्टगृहगोर्कसुतःशशांकंकृष्णेकुजोनिशिसमर्क्षगतःप्रपश्येत् ॥ दोषाल्पतांवितनुतेपरथाबहुत्वंप्रश्नेथवाजनुषिबुद्धिमतोहनीयम् ॥ ७५ ॥ इतिषोडशयोगाः ॥ ॥ नंद९त्रि३षट्६लग्न१भवर्क्ष११पुत्र५व्यया१२इनाद्धर्षपदंस्वभोच्चम्॥ त्रिभंत्रिभंलग्नभतःक्रमेणस्त्रीणांनृणांरात्रिदिनेचतेषु ॥ ७६ ॥

अथशुभस्यापिचंद्रस्यकेनचिद्योगविशेषेणदोषाल्पतामाह–शुक्लइति ।शुक्लेशुक्लपक्षेदिवादिवसेनृगृहगःपुरुषराशयोमेषमिथुनसिंहादयस्तेषुगतोऽर्कसुतः शनिर्यदि शशांकंचंद्रंपश्येत्तदादुरफ्फदोषस्याल्पतांन्यूनत्वंवितनुते।अपरथाअन्यथा यद्यर्कसुतोनपश्येत्तदादुरफ्फदोषस्यबहुत्वंबाहुल्यंवितनुते । तथाकृष्णेकृष्णपक्षेनिशिरात्रौसमर्क्षगतःसमराशयोवृषकर्ककन्यादयस्तेषुगतः कुजोयदिचंद्रंप्रपश्येत्तदाल्पतांदुरफ्फदोषस्यन्यूनत्वंवितनुते यदिभौमोनपश्येत्तदादोषबहुत्वंवितनुते सर्वमिदंप्रश्नेप्रश्नलग्नेऽथवाजनुषिजन्मलग्नेबुद्धिमताऊहनीयंविचार्यम् । अर्थाद्वर्षलग्नादिष्वपिविचार्यमिति । एवंषोडशयोगाःसमाप्ताः ॥ ७५ ॥ **अथसर्वग्रहाणांचत्वारिहर्षस्थानान्याह**–नंदत्रिषडिति । तत्रप्रथमंहर्षस्थानमुच्यते । इनात्सूर्यमारभ्यसर्वेषांग्रहाणांनंदइत्यादिहर्षस्थानानिक्रमेणभवंति लग्नादितिसंबंधः । तद्यथा लग्नान्नवमस्थःसूर्योहर्षितः चंद्रस्तृतीयस्थः भौमःषष्ठस्थः लग्नस्थोबुधः गुरुरेकादशस्थः शुक्रःपंचमस्थः शनिर्व्ययस्थोहर्षदइत्यर्थः । अ**थद्वितीयंहर्षस्थानमुच्यते**–स्वभोच्चमिति । यदाग्रहःस्वगृहेभवतिअथवा स्वोच्चेभवातितदाहर्षितोज्ञेयः स्वगृहेयद्बलंतदेवस्वोच्चेउभयत्रापिपंचविंशोपकाबलं नतुद्विगुणम् । **अथतृतीयहर्षस्थानमुच्यते**–त्रिभामिति । लग्नभतोलग्नराशेःसकाशात् त्रिभंत्रिभंराशित्रयंराशित्रयंक्रमेणस्त्रीणांस्त्रीग्रहाणांनृणांपुरुषग्रहाणांहर्षपदंभवति । अयमर्थः–लग्नाद्वितीयतृतीयराशिषुवर्तमानाःस्त्रीग्रहाःहर्षिताः । ततस्त्रिषुराशिषुचतुर्थपंचमषष्ठस्थानेषुवर्त्तमानाःपुरुषग्रहाःहर्षिताः । पुनरपि सप्तमाष्टमनवमस्थानेषुस्त्रीग्रहाहर्षिताः । पुनर्दशमैकादशद्वादशस्थाने

श्रीगर्गान्वयभूषणंगणितविच्चिंतामणिस्तत्सुतोऽनंतो
नंतमतिर्व्यधात्खलमतध्वस्त्यैजनुःपद्धतिम् ॥ तत्सू
नुःखलुनीलकंठविबुधोविद्वच्छिवानुज्ञयायोगान्षोड
शहर्षभानिचतथासंज्ञाविवेकेऽभ्यधात् ॥ ७७ ॥

॥ इतिषोडशयोगाध्यायःसमाप्तः ॥ २ ॥

षुपुरुषग्रहाहर्षिताः । **अथचतुर्थंहर्षस्थानमुच्यते**—रात्रीति । तेषांस्त्रीपुरुषग्रहाणांरात्रिदिनेरात्रिदिवसयोर्हर्षदत्वम् । अयमर्थः—रात्रौवर्षप्रवेशेस्त्रीग्रहाणांहर्षदत्वम् दिवावर्षप्रवेशेपुरुषग्रहाणांहर्षदत्वम् तेषुचतुर्षुस्थानेषुस्थिताग्रहाः बलिनोभवंति । इहताजिकेचंद्रशनिशुक्रबुधानार्याःस्त्रीग्रहाः । रविभौमगुरवः पुरुषग्रहाः । अत्रनपुंसकानसंति । अत्रविंशति २० विंशोपकाः परमबलम् । तत्रचत्वारिहर्षस्थानानिइतिकारणाच्चतुर्भिर्भक्तंलब्धाःपंचविंशोपकाः एवंचतुर्षु स्थानपदेषुप्रत्येकंपंचविंशोपकाःबलंतेस्थाप्याः । **अस्योदाहरणम्** सूर्यादिग्रहाः लग्नान्नंदइत्यादिस्थानेषुनसंति अतःप्रथमंहर्षपदंनप्राप्तम् । अत्रगुरुस्वगृहे श

	र	चं	मं	बु	गु	शु	श
स्था.	०	०	०	०	०	०	०
उ.स्व.	०	०	०	०	५	०	५
त्रि.	५	०	०	५	०	५	५
दि.	५	०	५	०	५	०	०
योग.	१०	०	५	५	१०	५	१०

निःस्वोच्चेऽस्ति अतोद्वितीयंहर्षपदंप्राप्तम् तत्र बलंपंचविंशोपकाः । लग्नात्सप्तमाष्टमनवमस्थाःस्त्रीग्रहाःशनिशुक्रबुधाःसंति दशमस्थानेपुरुषग्रहःसूर्यस्तिष्ठति । अतस्तेषांतृतीयहर्षपदंप्राप्तम् । अत्रापिबलंपंचविंशोपकाः अत्रदिवावर्षप्रवेशःअतःपुरुषग्रहाणांरविभौमगुरूणांचतुर्थंहर्षपदंप्राप्तम् । अत्रापिबलंपंचविंशोपकाः । एवंसर्वेषांग्रहाणांहर्षस्थानानि तेषुप्रत्येकंबलानितदैक्यानिलिख्यंते ॥ ७६ ॥ ७७ ॥

इतिश्रीदिवाकरदैवज्ञात्मजविश्वनाथदैवज्ञविरचितेनीलकंठज्योतिर्वित्कृ
तसंज्ञातंत्रेषोडशयोगाध्यायःसव्याख्योदाहृतिःसमाप्तः ॥ २ ॥

पुण्यं१गुरु२ज्ञान३यशो४ऽथमित्रं५माहात्म्य६माशाच७समर्थता
च८ ॥ भ्राता९ततोगौरव१०राज११तात१२माता१३सुतो१४
जीवित१५मंबु१६कर्म १७ ॥ १ ॥ माद्यंच१८मन्मथ१९क
ला२०परतःक्षमोक्तं२१शास्त्रं२२सबंधुसहमं२३त्वथबंदकंच२४ ॥
मृत्योश्वसद्म२५परदेश२६धना२७न्यदारा२८स्यादन्यकर्म२९स
वणिक्३०त्वथकार्यसिद्धिः३१ ॥ २ ॥ उद्वाह३२सूति७३संता
पाः३४श्रद्धा३५प्रीति३६बैलं३७तनुः३८ ॥ जाड्य३९व्यापार
सहमे४०पानीयपतनं४१रिपुः४२ ॥ ३ ॥ शौर्यो४३पाय४४
दरिद्रत्वं४५गुरुतां४६बुपथाभिधं ॥ बंधनं४८दुहिता४९श्वश्व५०
पंचाशत्सहमानिहि ॥ ४ ॥ सूर्योनचंद्रान्वितमह्निलग्नंवीद्धर्केयु
क्तंनिशिपण्यसंज्ञम् ॥ शोध्यर्क्षशुद्ध्याश्रयभांतरालेलग्नंनचेत्सैकभ
मेतदुक्तम् ॥ ५ ॥

अथसहमानयनमाह—तत्रादौचतुर्भिःश्लोकैः**पंचाशत्सहमान्याह** पुण्य
मिति स्पष्टार्थः ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ **अथपुण्यसहमसाधनमाह**—
सूर्योनेति । अह्निदिवसेवर्षप्रवेशश्चेत्तदाचंद्रमध्येरविःशोध्यः निशिरात्रौचेत्तदासू
र्यश्चंद्रःशोध्यः लग्नंयोज्यं राश्यादिपुण्यसंज्ञंसहमंभवेत् **अथसर्वत्रसहमानयने
विशेषसंस्कारउच्यते** शोध्यर्क्षेति शोध्यर्क्षशुध्याश्रयभयोरंतरालेलग्नराशिश्चे
न्नास्ति तदासहमेएकोराशिर्योज्यइति । तद्यथा योग्रहःशोध्यतेन्यूनःक्रियतेसशो
ध्यः तस्यऋक्षंराशिःशोध्यग्रहराशेःसकाशादित्यर्थः । शुद्ध्याश्रयभंयावत् । त

शुद्धाः ग्रहाः							
र	चं	मं	बु	गु	शु	श	ल
९	५	८	८	८	७	६	०
७	२२	१४	१२	२९	२४	६	१८
३०	९	३२	१६	३५	३१	४६	३
६	४७	३६	८	१३	४८	५४	५४

द्यथा यस्मिन्ग्रहेशोध्योग्रहःशोध्यतेसशु
द्ध्याश्रयोग्रहःतस्यभंराशिः अनयोःशो
ध्यशोधकयोरंतरालेमध्येचेल्लग्नंभवति त
दोक्तंराश्यादिपुण्यसहमंसैकभमेकराशिस
हितंकार्यम् । यदिशोध्यशोधकयोर्मध्येलग्नंभवति तदैकराशिर्नयोज्यइत्यर्थतः
सिद्धम् अशोध्यर्क्षशुद्ध्याश्रयेग्रहेइत्युपलक्षणंमात्रसहमेपिबोध्यम् । अग्रेउक्त

व्यत्यस्तमस्माद्गुरुविद्ययोस्तुसंसाधनंपुण्यवियुक्सुरेज्यः ॥ दिवा विलोमंनिशिपूर्ववत्तुयशोभिधंतत्सहमंवदंति ॥ ६ ॥ पुण्यसद्मगुरुसद्मतस्त्यजेद्व्यत्ययोनिशिसितान्वितंचतत् ॥ सैकतातनुवदुक्तरीतितोमित्रनामसहमंविदुर्बुधाः ॥ ७ ॥

मस्तिवित्तपमर्थभावादितिपुण्याद्भौममितिक्षेत्रग्रहऋक्षभादिभवनंएतेराशिपर्याया लग्नमितियोजकोपलक्षकंज्ञेयम् ॥ **उदाहरणम्**—सूर्यः ९।७।३०।६ चंद्रमध्ये ५।२२।९।४७ शोधितः शेषं ८।१४।३९।४१ लग्नं ०।१८।३।५४ युतंजातंपुण्यं९।२।४३।३५ ॥ ५ ॥ **अथगुरुविद्यायशःसहमानांसाधनमाह**—व्यत्यस्तमिति । अस्मात्पुण्यसहमसाधनाद्व्यत्यस्तंविपरीतंगुरुविद्ययोःसहमयोस्तुसंसाधनंकार्यम् । तद्यथादिवारविमध्येचंद्रःशोध्यःलग्नंयोज्यम् रात्रौवर्षप्रवेशश्चेत्तदाचंद्रमध्येरविःशोध्यःलग्नंयोज्यम् तेगुरुविद्यासहमेभवतः पुण्यसहमेनवियुक्ऊनःसुरेज्योगुरुःकार्योदिवा निशिरात्रौविलोमंविपरीतं पुण्यसहममध्येगुरुःशोध्यः पूर्ववदितिलग्नयोगः शोध्यर्क्षेत्यादिसंस्कारश्चसर्वत्रसहमेकार्यः । तद्यशोभिधंयशःसहमंबुधावदंति। **उदाहरणम्**—रविमध्ये९।७।३०।६चंद्रः५।२२।९।४७ शोधितःशेषम्३।१५।२०।१९ लग्नयुतम् ४।३।२४।१३सैकंजातंगुरुसहमम् ५।३।२४।१३ इदमेवविद्यासहमम् ५।३।२४।१३ पुण्यसहमम् ९।२।४३।३५ गुरुमध्ये ८।२९।३५।१३ शोधितेशेषम् ११।२६।५१।३८ लग्नयुतंजातंयशःसहमम्०।१४।५५।३२ ॥६॥**अथमित्रसहमसाधनमाह**—पुण्यसद्मेति। दिवागुरुसद्मतःगुरुसहमतःपुण्यसद्मपुण्यसहमंत्यजेत् । निशि रात्रौव्यत्ययोविपरीतंपुण्यसहममध्येगुरुसहमंशोधयेत् । ततःसितेनशुक्रेणान्वितं युक्तंकार्यम्।अत्रलग्नयोगोनकार्यः। शुक्रयुक्तत्वात्तनुवत् उक्तरीतितःसैकताकार्या।सायथाशोध्यर्क्षशुद्ध्याश्रयभांतरालेशुक्रोनचेदिति तत्बुधाःमित्रनामसहमं विदुः।**उदाहरणम्**—पुण्यसहमं ९।२।४३।३५ गुरुसहममध्ये ५।३।२४।१३ शोधितेशेषं ८।०।४०।३८ शुक्रेण ७।२४।३१।४८ युतंसैकंजातंमित्रसह

पुण्याद्भौमंशोधयेदुक्तवत्स्यान्माहात्म्यंतन्नक्तमस्माद्विलोमम् ॥
शुक्रंमंदादह्निनक्तंविलोममाशाख्यंस्यादुक्तवच्छेषमूह्यम् ॥ ८ ॥
सामर्थ्यमारात्तनुपंविशोध्यनक्तंविलोमंतनुपेकुजेतु ॥ जीवाद्वि
शुद्ध्येत्सततंपुरावद्भ्राताऽऽर्किहीनाद्गुरुतःसदोह्यः ॥ ९ ॥

मम्४।२५।१२।२६॥७॥ अथमाहात्म्याशासहमयोरानयनमाह-पुण्या
दिति । पुण्यसहमाद्भौमंशोधयेत्दिवाततःउक्तवल्लग्नयोगःसैकताचकार्या नक्तं
रात्रौअस्माद्विलोमंविपरीतंभौममध्येपुण्यसहमंशोध्यम् तन्माहात्म्यसहमंस्यात् ।
अथाह्निदिवसेमंदाच्छनिमध्येशुक्रंविशोधयेत । नक्तंरात्रौविलोमम् शुक्रमध्ये
शनिःशोध्यः । शेषंलग्नयोगाद्युक्तवदूह्यंउक्तरीत्याज्ञेयम् तदाशासहममिच्छा
सहमंस्यात । उदाहरणम्-पुण्यसहममध्ये ९।२।४३।३५ भौमे ८।१४।
३२।३६ शोधितेशेषम् ०।१८।१०।५९ लग्नयुतंसैकंजातंमाहात्म्यसहमम्
२।६।१४।५३ शनिमध्ये ६।६।४६।५४ शुक्रे ७।२४।३१।४८ शोधितेशे
षम् १०।१२।१५।६ लग्नयुतंजातंआशासहमम् ११।०।१९।० ॥ ८ ॥
अथसामर्थ्यभ्रातृसहमयोरानयनमाह-सामर्थ्यमिति । आराद्भौमात्तनुपंल
ग्नस्वामिनंविशोध्यदिवसेनक्तंरात्रौलग्नस्वामिमध्येभौमंविशोधयेत् लग्नयोगःसै
कताचपूर्ववत्तत्सामर्थ्यसहमंस्यात् । लग्नस्वामीचेद्भौमस्तदाकिंकार्यमतआह
तनुपइति । लग्नस्वामिनिभौमेसतिजीवाद्विशुद्ध्येत् सततंदिवारात्रौचतत्सामर्थ्य
सहमंस्यात् । अथसदाहोरात्रमार्किहीनात्शनिरहिताद्गुरुतः पुरावत्प्राक्संस्कार
सहितात्भ्राताभ्रातृसहमंस्यात् उदाहरणम्-भौमात्तनुपंविशोध्यइत्युक्तम् ।
अत्रलग्नस्वामीभौमोस्ति अतःकारणात्गुरुमध्ये ८।२९।३५।१३ भौमे
८।१४।३२।३६ शोधितेशेषम् ०।१५।२।३७ लग्नयुतंसैकंजातंसामर्थ्यसह
मम् २।३।६।३१ गुरुमध्ये ८।२९।३५।१३ शनौ ६।६।४६।५४ शोधि
तेशेषम् २।२२।४८।१९ लग्नयुतंसैकंजातंभ्रातृसहमं ४।१०।५२।१३ ॥ ९ ॥

दिनेगुरोश्चंद्रमपास्यनक्तंरविक्रमादर्कविधूचदेयौ ॥ रीत्योक्तयागौ रवमर्कमार्केरपास्यवामंनिशिराजतातौ ॥ १० ॥ मार्तंडुतोऽपास्य सितंविलोमंनक्तंसुतोऽहर्निशमिंदुमीज्यात् ॥ स्याज्जीविताख्यंगुरु मार्कितोऽह्निवामंनिशीदंसममंबयांबु ॥ ११ ॥

अथगौरवराजतातसहमानयनमाह–दिनइति । दिनेदिवसेगुरुमध्ये चंद्रःशोध्यःरवियोज्यः । नक्तंरात्रौगुरुमध्येरविःशोध्यश्चंद्रयोगःकार्यः उक्तया रीत्यासैकताचकार्या तत्गौरवसहमंभवति तद्यथाशोध्यर्क्षशुद्धयाश्रयभांतराले क्रमेणदिवारात्रौसूर्यचंद्रौनचेत्तदासैकताकार्येत्यर्थः । दिनेवर्षप्रवेशेआर्केः शनिमध्येअर्कसूर्यंविशोध्य । निशिरात्रौवामंविपरीतंसूर्यमध्येशनिमपास्यलग्न योगःसैकताचकार्याराजतातसहमेभवतः । उदाहरणम्--गुरुमध्ये८।२९। ३५।१३ चंद्रे ५।२२।९।४७ शोधितेशेषं ३।७।२५।२६ रविणा ९।७।३०।६ युतंसैकंजातंगौरवसहमम् १।१४।५५।३२ शनिमध्ये ६।६। ४६।५४ सूर्येशोधिते ९।७।३०।६ शेषं ८।१९।१८।४८ लग्नयुतंजातंराज सहमं ९।७।२२।४२ तातसहमंच ९।७।२२।४२ ॥ १० ॥ अथमातृपु त्रजीविताम्बुसहमानामानयनमाह–मातेति । दिवसेइंदुतश्चंद्रमध्येसितं शुक्रमपास्यसंशोध्यविलोमंनक्तंरात्रौशुक्रमध्येचंद्रशोध्यःलग्नयोगःसैकताचकार्या तन्मातृसहमंस्यात् ।अहर्निशंदिवारात्रौवर्षप्रवेशेसति गुरुमध्येचंद्रःशोध्यःलग्न योगःसैकताचकार्यातत्पुत्रसहमंस्यात् । अथाह्निदिवसेशनिमध्येगुरुःशोध्यः इदंनिशिवामंगुरुमध्येशनिःशोध्यः लग्नयोगःसैकताचकार्या तज्जीविताख्यंसहमं स्यात् । अंबयासमंचमातुःसहमतुल्यंअंबुसहमम् । उदाहरणम्–चंद्रमध्ये ५।२२।९।४७ शुक्रेशोधिते ७।२४।३१।३८ शेषम् ९।२७।३७।५९ लग्नयुतंजातंमातृसहमं १०।१५।४१।५३ गुरुमध्येचंद्रेशोधितेशेषं ३।७। २५।२६ लग्नयुतंसैकंजातंपुत्रसहमं ४।२५।२९।२० शनिमध्येगुरौशोधिते शेषं ९।७।११।४१ लग्नयुतंजातंजीविताख्यंसहमम् ९।२५।१५।३५ मातुः

कर्मज्ञमारान्निशिवामभुक्तंरोगाख्यमिंदुंतनुतःसदैव ॥ स्यान्मन्मथोलग्नपमिंदुतोऽह्निवामंनिशींदुंतनुपंसदाऽर्कात् ॥ १२ ॥ कलिक्षमेस्तोगुरुतोविशुद्धेकुजेविलोमंनिशिपूर्वरीत्या ॥ शास्त्रंदिनेसौरिमपास्यजीवाद्वामंनिशिज्ञस्ययुतिःपुरावत् ॥ १३ ॥ दिवानिशंज्ञाच्छशिनंविशोध्यबंध्वाख्यमेतन्निशिबंदकंस्यात् ॥ वामंदिवैतन्मृतिरष्टमर्क्षादिंदुंविशोध्योक्तवदार्कियोगात् ॥ १४ ॥

सहममेवांबुसहमम् १०।१५।४१।५३॥ ११॥ **अथकर्मरोगमन्मथसहमानामानयनमाह**—कर्मज्ञमिति। दिवाभौममध्येबुधःशोध्यः निशिरात्रौवामंबुधमध्येभौमःशोध्यःलग्नयोगःसैकताचकार्यातत्कर्मसहमंतस्यात्। सदैवदिवारात्रौचतनुतःलग्नमध्येचंद्रःशोध्यः लग्नयोगःसैकताचकार्यातद्रोगसहमंस्यात्। दिवसेचंद्रमध्येलग्नस्वामीशोध्यः वामंनिशिलग्नस्वामिमध्येचंद्रःशोध्यः लग्नयोगःसैकताचकार्या तन्मन्मथोमदनस्तस्यसहमंस्यात् । इंदुंतनुपंलग्नस्वामीचंद्रश्चेत्तदाऽहोरात्रं अर्काल्लग्नस्वामीचंद्रःशोध्यः लग्नयोगःसैकताचकार्या मन्मथसहमंस्यात् **उदाहरणम्**—भौममध्येबुधेशोधितेशेषं ०।२।१६।२८ लग्नयुतंसैकंजातंकर्मसहमम् १।२०।२०।२२। लग्नमध्येचंद्रेशोधितेशेषं ६।२५।५४।७ लग्नयुतंजातंरोगसहमम् ७।१३।५८।१ चंद्रमध्येलग्नस्वामिनिभौमेशोधितेशेषं ९।७।३७।११ लग्नयुतंजातंमदनसहमं ९।२५।४१।५ ॥ १२ ॥ **अथकलिक्षमाशास्त्रसहमानामानयनमाह**—कलिक्षमइति। दिवागुरुमध्येभौमः शोध्यः विलोमंनिशिभौममध्येगुरुःशोध्यः पूर्वरीत्येतिलग्नयोगःसैकताचकार्या तत्कलिसहमंक्षमालहमंचभवतः। दिनेगुरुमध्येशनिःशोध्यः रात्रौशनिमध्येगुरुःशोध्यः ज्ञस्ययुतिःबुधयोगःकार्यःपुरावदितिशोध्यर्क्षशुध्याश्रयभांतरालेबुधोनचेत्तदासैकताचकार्या तच्छास्त्रसहमंस्यात् । **उदाहरणम्**—गुरुमध्येभौमेशोधितेशेषम् ०।१५।२।३७ लग्नयुतंसैकंजातंकलिसहमम् २।३।६।३१ क्षमासहमंच २।३।६।३१ गुरुमध्येशनौशोधितेशेषं २।२२।४८।१९ बुधयुतंजातंशास्त्रसहमम् ११।५।४।२७ ॥ १३ ॥ **अथबंधुबंदकमृत्युसहमानामानयनमाह**—दिवानिशमिति । दिवारात्रौवर्षप्रवेशेसतिबुधमध्येचंद्रःशोध्यः

देशांतराख्यंनवमाद्विशोध्यधर्मेश्वरंसंततमुक्तवत्स्यात् ॥ अहर्निशं वित्तपमर्थभावाद्विशोध्यपूर्वोक्तवदर्थसद्म ॥ १५ ॥ सितादपास्यार्कमथान्यदाराह्वयंसदाप्राग्वदथान्यकर्म ॥ चंद्राच्छनिंवाममथो निशायांशश्वद्वणिज्यंदिनबंदकोक्त्या ॥ १६ ॥

लग्नयोगःसैकताचकार्यातद्बंधुसहमंस्यात् निशिवर्षप्रवेशश्चेदेतद्बंधुसहमंबंदकसहमंस्यात्। दिवावामंविपरीतंचंद्रमध्येबुधःशोध्यःलग्नयोगः सैकताचकार्यातदाबंदकंस्यात्। दिवारात्रौवर्षप्रवेशेसति। अष्टमर्क्षात्अष्टमभावमध्येचंद्रःशोध्यः शनिर्योज्यः उक्तवत्सैकताचकार्यामृतिसहमंस्यात्। **उदाहरणम्**—बुधमध्येचंद्रे शोधितेशेषम् २।२०।६।२१ लग्नयुतंसैकंजातंबंधुसहमं ४।८।१०।१५ चंद्रमध्येबुधेशोधितेशेषं ९।९।५३।३९ लग्नयुतंजातंबंदकसहमं ९। २७।५७।३३ अष्टमभावमध्ये ७।१३।४९।३० चंद्रेशोधितेशेषं १।२१। ३९।४३ शनियुतंजातंमृत्युसहमं ७।२८।२६।३७ ॥ १४ ॥ **अथदेशांतरार्थसहमयोरानयनमाह**—देशांतरेति। सततंदिवारात्रौवर्षप्रवेशेसतिनवमान्नवमभावमध्येधर्मेश्वरंनवमभावस्वामिनंविशोध्यउक्तवल्लग्नयोगःसैकताचकार्यातदेशांतरसहमंस्यात्। अहर्निशंदिवारात्रौवर्षप्रवेशेसति अर्थभावाद्धनभावाद्वित्तपंधनस्वामिनंविशोध्यपूर्वोक्तवल्लग्नयोगःसैकताचकार्या अर्थसहमंस्यात्। **उदाहरणम्**—नवमभावमध्ये ८।९।२६।३८ नवमभावस्वामिनंगुरुं ८।२९ ३५।१३ विशोध्यशेषं ११।९।५१।२५ लग्नयुतंजातंदेशांतरसहमं ११ २७।५५।१९ धनभावमध्ये १।१६।४९।३० धनभावस्वामिनंशुक्रंविशोध्य शेषं ५।१९।१७।४२ लग्नयुतंजातंद्रव्यसहमं ६।७।२१।३६ ॥ १५ ॥ **अथपरदारान्यकर्मवणिक्सहमानामानयनमाह**—सितादपास्यार्कमिति। सदाहोरात्रंशुक्रमध्येसूर्यःशोध्यःप्राग्वदितिलग्नयोगःसैकताचकार्या। अन्यदाराह्वयंसहमंस्यात्। अथदिवसेचंद्रमध्येशानिंविशोध्यवामांनिशायांशनिमध्येचं

शनेर्दिवार्के निशिचंद्रमार्के विशोध्य सूर्येंदुभनाथयोगात् ॥ स्यात्कार्यसिद्धिःसततं विशोध्य मंदं सितात्स्यात्तु विवाहसद्म ॥ १७ ॥ गुरोर्बुधं प्रोज्झ्य भवेत्प्रसूतिर्वामं निशींदुं शनितो विशोध्य ॥ षष्ठं क्षिपेदुक्तदिशा सदैव संतापसद्माऽऽरमपास्य शुक्रात् ॥ १८ ॥

द्रःविशोध्यः लग्नयोगःसैकताचकार्या अन्यकर्मसहमंस्यात् । शश्वद्दिवारात्रौ दिनेबंदकसहममित्युक्तयारीत्यासाध्यं तद्वणिक्सहमंस्यात् । तद्यथा दिवारात्रौवर्षप्रवेशेसतिचंद्रमध्येबुधःशोध्यः लग्नयोगःसैकताचकार्या वणिक्सहमंस्यात् **उदाहरणम्**—शुक्रमध्येसूर्येशोधितेशेषं १०।१७।१।४२ लग्नयुतंजातंपरस्त्रीसहमं ११।५।५।३६। चंद्रमध्येशनौशोधितेशेषं ११।१५।२२।५३ लग्नयुतंजातंअन्यकर्मसहमं ०।३।२६।४७ चंद्रमध्येबुधेशोधितेशेषं ९।९।५३।३९ लग्नयुतंजातंवणिक्सहमं ९।२७।५७।३३ ॥ १६ ॥ **अथकार्यसिद्धिविवाहसहमयोरानयनमाह**—शनेरिति । दिवसेशनिमध्येऽर्केविशोध्यसूर्यराशिस्वामीयोज्यः रात्रौशनिमध्येचंद्रःशोध्यःचंद्रराशिस्वामीग्रहोयोज्यः । सैकताचकार्या तत्कार्यसिद्धिसहमंस्यात् । सततंदिवारात्रौवर्षप्रवेशेसतिशुक्रमध्येशनिःशोध्यःसैकताचकार्यातद्विवाहसहमंस्यात् । **उदाहरणम्**—शनिमध्ये सूर्येशोधितेशेषं ८।२९।१६।४८ सूर्यराशिस्वामीशनिःतेनयुतंजातंकार्यसिद्धिसहमं ३।६।३।४२ शुक्रमध्येशनौशोधितेशेषं १।१७।४४।५४ लग्नयुतंसैकं जातंविवाहसहमं ३।५।४८।४८ ॥ १७ ॥ **अथप्रसवसंतापसहमयोरानयनमाह**—गुरोरिति । दिवसेगुरुमध्येबुधःशोध्यःनिशिवामंबुधमध्येगुरुःशोध्यः लग्नयोगःसैकताचकार्यातत्प्रसूतिसहमंस्यात् । सदैवदिवारात्रौशनिमध्येचंद्रःशोध्यःषष्ठंक्षिपेत्षष्ठभावोयोज्यःउक्तनिशासैकताकार्यातत्संतापसहमंस्यात् । आरमपास्यशुक्रादित्यग्रिमश्लोकेनसंबंधः । **उदाहरणम्**—गुरुमध्येबुधेशोधितेशेषम् ०।१७।१९।५ लग्नयुतंसैकंजातंप्रसूतिसहमं २।५।२३।५९ शनिमध्येचंद्रेशोधितेशेषं ०।१४।३७।७ रिपुभावेन ५।१३।४५।१६ युतंसैकंजातं

श्रद्धासदाप्रोक्तदिशाऽथपुण्यंविद्याख्यतःप्रोज्झ्यसदापुरोक्त्या ॥
प्रीत्याख्यमुक्तंबलदेहसंज्ञेयशःसमेजाड्यमपास्यभौमात् ॥ १९ ॥
शनिर्विलोमंनिशिचांद्रयोगाद्व्यापारआराग्ज्ञमपास्यशश्वत् ॥
पानीयपातःशशिनंविशोध्यसौरेर्विलोमंनिशिपूर्ववत्स्यात् ॥२०॥
मंदंकुजात्प्रोज्झ्यरिपुर्विलोमंरात्रौभवेद्भौमविहीनपुण्यात् ॥ शौर्यं
विलोमंनिशिपूर्ववत्स्यादुपायईज्यंशनितोविशोध्य ॥ २१ ॥

संतापसहमं ६।२८।२२।२३ ॥ १८ ॥ **अथश्रद्धाप्रीतिबलदेहसहमानामानयनमाह**–श्रद्धेति । सदाहोरात्रंशुक्रमध्येआरंभौमंविशोध्य । प्रोक्तदिशालग्नयोगःसैकताचकार्यातच्छ्रद्धासहमंस्यात । सदादिवारात्रौविद्यासहममध्येपुण्यसहमंविशोध्यपुरोक्त्यालग्नयोगःसैकताचकार्यातत्प्रीतिसहमंस्यात्। अथ पूर्वंयद्यशःसहममुक्तंतदेवबलदेहसंज्ञंसहमद्वयंतत्रबलंसैन्यं नतुसामर्थ्यं तस्य पूर्वकथितत्वात । देहःशरीरम् । जाड्यमपास्यभौमादीत्यग्रिमश्लोकेनसंबंधः । **उदाहरणम्**–शुक्रमध्येभौमेशोधितेशेषं ११।९।५९।१२। लग्नयुतंजातंश्रद्धासहमं ११।२८।३।६ विद्यासहममध्येपुण्यसहमेशोधितेशेषं ८।०।४०।३८ लग्नयुतंजातंप्रीतिसहमं ८।१८।४४।३२ पूर्वोक्तंयशःसहमंतदेवबलसहमं ०।१४।५५।३२ देहसहमंच ०।१४।५५।३२ ॥ १९ ॥ **अथजाड्यव्यापारपानीयपातसहमानामानयनमाह**–शनिरिति । दिवसेभौममध्ये शनिःशोध्यः चांद्रेर्बुधस्ययोगः विलोमंनिशिशनिमध्येभौमःशोध्यः बुधोयोज्यः सैकताचकार्याजाड्यसहमंस्यात् । शश्वद्दिवारात्रौभौममध्येबुधःशोध्यः लग्नयोगःसैकताचकार्या तद्व्यापारसहमंस्यात् । दिवाशनिमध्येचंद्रःशोध्यः रात्रौचंद्रमध्येशनिःशोध्यः पूर्ववत्स्यादितिलग्नयोगःसैकताचकार्या तत्पानीयपातसहमंस्यात् । **उदाहरणम्**–भौममध्येशनौशोधितेशेषं २।७।४५।४२ बुधयुतंजातंजाड्यसहमं १०।२०।५१।५० भौममध्येबुधेशोधितेशेषं ०।२।१६।२८ लग्नयुतंसैकंजातंव्यापारसहमं १।२०।२०।२२ शनिमध्येचंद्रेशोधितेशेषं ०।१४।३७।७ लग्नयुतंसैकंजातं पानीयपातसहमम् २।२।४१।१ ॥ २० ॥ **अथशत्रुशौर्योपायसहमानामानयनमाह**–मंदमिति । दिवसे

वामंनिशिज्ञंतुविशोध्यपुण्याज्ज्ञयुग्विलोमंनिशितद्दरिद्रम् ॥ सूर्योच्चतःसूर्यमपास्यनक्तंचंद्रंतदुच्चाद्गुरुतापुरोक्त्या ॥ २२ ॥ कर्कार्धतः ३।१५ प्रोज्झ्यशनिंस्याज्जलाध्वाऽन्यथानिशि ॥ पुण्याच्छनिंविशोध्याह्निवामंनिशितुबंधनम् ॥ २३ ॥

भौममध्येशनिःशोध्यःरात्रौविलोमंशनिमध्येभौमःशोध्यःलग्नयोगःसैकताचकार्यातद्रिपुसहमंस्यात् । दिवसेपुण्यसहममध्येभौमःशोध्यः रात्रौभौममध्ये पुण्यसहमंशोध्यंपूर्ववत्स्यादितिलग्नयोगः सैकताचकार्या शौर्यसहमंभवति । उपायईज्यंशनितोविशोध्यइत्यग्रिमश्लोकेनसंबंधः।**उदाहरणम्**-भौममध्येशनौ शोधितेशेषं २।७।४५।४२ लग्नयुतंसैकंजातंशत्रुसहमं ३।२५।४९।३६ पुण्यसहममध्येभौमेशोधितेशेषं ०।१८।१०।५९ लग्नयुतंसैकंजातंशौर्यसहमं २।६।१४।५३॥ २१ ॥ **अथदरिद्रगुरुतासहमयोरानयनमाह**-वाममिति । दिवसेशनिमध्येइज्योगुरुःशोध्यः रात्रौगुरुमध्येशनिःशोध्यः लग्नयोगः सैकताचकार्या तदुपायसहमंस्यात् । दिवसेपुण्यसहममध्येबुधःशोध्यः बुधयोगःकार्यः रात्रौबुधमध्येपुण्यसहमंशोध्यं बुधयुक्तंकार्यं सैकताचकार्या तद्दरिद्रसहमंस्यात् । दिवसेसूर्योच्चमध्येसूर्यःशोध्यः नक्तंरात्रौचंद्रोच्चमध्येचंद्रःशोध्यः पुरोक्त्यालग्नयोगः सैकताचकार्या तद्गुरुतासहमंस्यात्। **उदाहरणम्**-शनिमध्येगुरौशोधितेशेषं ९।७।११।४१ लग्नयुतंसैकंजातंउपायसहमं ९।२५।१५।३५ पुण्यसहममध्येबुधेशोधितेशेषं ०।२०।२७।२७ बुधयुतंजातंदारिद्र्यसहमं ९।२।४३।३५। सूर्योच्चमध्ये०।१०सूर्यशोधितेशेषं३।२।२९।५४ लग्नयुतंसैकंजातंगुरुतासहमम् ४।२०।३३।४८ ॥ २२ ॥ **अथजलपथबंधनसहमयोरानयनमाह**-कर्कार्धतइति । दिवाकर्कार्धतः सार्धराशित्रयमध्ये ३।१५ शनिंशोध्यअन्यथानिशिरात्रौशनिमध्येसार्धराशित्रयं ३।१५ विशोध्यलग्नयोगः सैकताचकार्या जलाध्वाजलपथसहमंस्यात् अह्निदिवसेपुण्यसहममध्येशनिःशोध्यः रात्रौशनिमध्येपुण्यसहमंशोध्यं लग्नयोगः सैकताचकार्या तद्बंधनसहमंस्यात । **उदाहरणम्**-सार्धराशित्रयमध्ये ३।१५ शनौ

चंद्रःसितादपास्योक्तंसदाकन्याख्यमुक्तवत् ॥
पुण्यादर्कमपास्याययोगादश्वोऽन्यथानिशि ॥ २४ ॥

शोधितेशेषं ९।८।१३।६ लग्नयुतंजातंजलपथसहमं ९।२६।१७।० पुण्यसह ममध्येशनौशोधितेशेषं २।२५।५६।४१ लग्नयुतंसैकंजातंबंधनसहमं ४।१४। ०।३५ ॥ २३ ॥ **अथकन्याश्वसहमयोरानयनमाह**–चंद्रइति । सदा दिवारात्रौशुक्रमध्येचंद्रःशोध्यः उक्तवदितिलग्नयोगः सैकताचकार्या तत्कन्या सहमंस्यात्। दिवसेपुण्यसहममध्येसूर्यःशोध्यः रात्रौसूर्यमध्येपुण्यमहमंशोध्यम् आयभावएकादशभावोयोज्यः सैकताचकार्या तदश्वसहमंस्यात् । **उदाहरणम्**–शुक्रमध्येचंद्रेशोधितेशेषं २।२।२२।१ लग्नयुतंसैकंजातंकन्यासहमं ३।२०।२५।५५ पुण्यसहममध्येसूर्येशोधितेशेषं ११।२५।१३।२९ एकादशभावेन १०।९।२६।३८ युतंजातंअश्वसहमं १०।४।४०।७ अस्मिन्नसहमद्वये संमतिर्नास्ति समरसिंहेनानुक्तत्वात् । अस्मिन्नसंज्ञातंत्रेशोध्यशोधकयोर्मध्येल ग्नंचेन्नभवति तदासहमेएकोराशिर्योज्यःइत्युक्तमस्ति । तर्हि अत्रार्थेसंमतिवाक्यं कुत्रापिनलभ्यते यवनानांमतेपिसैकतानास्ति समरसिंहेलग्नद्वितीयभवनादित्य पिपाठस्तिष्ठति । अस्मिन्पाठेसैकतासमायाति । अत्रग्रंथकर्त्रालग्नद्वितीयभव नादितिपाठंधृत्वासहमेषुसैकतोक्ता परंतुसमरसिंहेतथायवनताजिकेतथामनुष्य ताजिकेलग्नाद्वितीयभवनादित्येवपाठोस्ति अस्मिन्पाठेसैकतानास्ति । एवंपुर स्कृत्यसर्वैराचार्यैःसहमेषुसैकतानोक्ता । **अत्रोदाहरणम्**–यदाहसमरसिंहः दिवसेदिनपतिभोग्याच्छशिभुक्तानंशकांश्चसंमील्य ॥ अंतस्थितराशियुतांस्त्रिंश त्प्रत्येकतःकृत्वा ॥ १ ॥ यद्यंतरराश्यंतर्नभवतिलग्नंतदाऽस्यभुक्तांशाः ॥ मध्येक्षेप्याःमध्यस्थितेतुभोग्यांशकाःपात्याः । लग्नाद्वितीयभवनात्त्रिंशत्प्रत्येक तःशोधितेयत्रविश्राम्यति तत्रर्क्षेविज्ञेयंपुण्यसहममिति । दिवसेवर्षप्रवेशेसति सूर्यस्यराशिंत्यक्त्वा अंशादिकंस्थाप्यं अंशास्त्रिंशदंशमध्येशोध्याः कलादिकं षष्टिमध्येशोध्यं अंशादिकंयदवशिष्टंतद्भोग्यंतन्मध्येचंद्रराशिंत्यक्त्वा अंशादि

कंयोज्यं तदनंतरंसूर्याधिष्ठितराशेःसकाशादग्रिमोयोराशिस्तस्माद्गणनयायत्संख्या कश्चंद्राधिष्ठितराशेःसकाशात्पूर्वराशिर्भवति । तावत्यःसंख्याःपूर्वानीतांशोपरिस्थाप्याः । तदनंतरंप्रत्येकतःकृत्वात्रिंशत्प्रत्येकंप्रत्येकमितित्रिंशत्प्रत्येकतःराशीनामंशाःकार्याः । अधःस्थांशयुताः तदनंतरंसूर्यराशेःसकाशाच्चंद्रराशिर्यावदनयोर्मध्येलग्नराशिश्चेन्नभवति तदालग्नस्यराशित्यक्त्वांऽशायोज्याः । अनयोर्मध्ये लग्नराशिश्चेत्भवति तदालग्नस्यभोग्यांशाःशोध्याः तदनंतरंयदास्यभुक्तांशायुक्तास्तदालग्नाद्गणनाक्रमः यदालग्नस्यभोग्यांशाःशोधिताः तदाधनभावाद्गणनाक्रमः अनयारीत्यागणनायाप्रतिराशौत्रिंशत्त्रिंशच्छोधितेयस्मिन्राशौत्रिंशन्नशुध्याति तस्मिन्राशौपुण्यसहमंज्ञेयम् । लग्नाद्द्वितीयभवनादितिपाठेसूर्यचंद्रयोर्मध्येलग्नंनभवति अथवाभवति । तदाधनभवनादेवगणनाक्रमः नतुलग्नात ।
उदाहरणम्–सूर्यः ९।७।३०।६ चंद्रः ५।२२।९।४७ लग्नं० १८।३।५४ सूर्यस्यभोग्यांशमध्ये २२।२९।५४ चंद्रस्यभुक्तांशाः २२।९।४७ युक्ताः जाताः ४४।३९।४१ सूर्यचंद्रयोरंतरालराशिभिर्युक्ताःजातोयमंकोराश्यादिः ३।१४।३९।४१ अस्यांशाः १०४।३९।४१ सूर्यचंद्रयोर्मध्येलग्नंनास्ति इति कारणाल्लग्नस्यभुक्तांशैः १८।३।५४ युक्ताजाताः १।३२।४३।३५ लग्नात्त्रिंशत्प्रत्येकतः शोधितेजातंसिंहराशौपुण्यसहमं ४।२।४२।३५ धनभवनात्त्रिंशत्प्रत्येकतःशोधितेजातंकन्याराशौपुण्यसहमं ५।२।४२।३५ अनयारीत्यासैकतासमायाति । एवंपाठयोर्विवादः लग्नाद्द्वितीयभवनादितिपाठेएतावतीयुक्तिरस्ति यदा लग्नस्यभुक्तांशाःयुक्तास्तदालग्नस्यभोग्यमवशिष्टं इतिकारणाल्लग्नाद्गणनाक्रमः तत्र लग्नसंबंधस्तिष्ठति यदालग्नस्यभोग्यांशाःशोधितास्तदालग्नसंबंधोनास्ति इतिकारणाद्धनभवनाद्गणनाक्रमः अत्रलग्नशेषंकिमपिनास्ति एतावतीयुक्तिरस्ति सर्वग्रंथेषुसंमतिरस्ति संमतेरभावाल्लग्नाद्द्वितीयभवनादित्यपिपाठः । तथाचोक्तं**मनुष्यजातके**–"भोग्यादुक्तममूनियावदखिलान्यंतर्भयुक्तान्यतोलग्नेबाह्यगतेऽस्यभुक्तसहितंभोग्योनमंतःस्थिते ॥ कृत्वाराशिमपासितेस्वदहनैर्लग्नाद्द्वितीयाच्चतत्पु

पुण्यादीनि पंचाशत्सहमानि ।

पुण्य	गुरु	विद्या	यश	मित्र	महा	आशा	साम	भ्राता	गौरव	राज	तात	माता	सुत	जीव	अंबु	कर्म	रोग	मद	कलि	क्षमा	शास्त्र	बंधु	बंदक	मृत्यु
१	२	३	४	५	६	७	८	९	१०	११	१२	१३	१४	१५	१६	१७	१८	१९	२०	२१	२२	२३	२४	२५
९	५	५	०	४	२	११	२	४	१	९	९	१०	४	९	१०	१	७	९	२	२	११	४	९	७
२	३	३	१४	२५	६	०	३	१०	१४	७	७	१५	२५	२५	१५	२०	१३	२५	३	३	५	८	२७	२८
४३	२४	२४	५५	१२	१४	१९	६	५०	५५	२२	२२	४१	२९	१५	४१	२०	५८	४१	६	६	४	१०	५७	२६
३५	१३	१३	३२	२६	५३	१०	३१	१३	३२	४२	४२	५३	२०	३५	५३	२२	१	५	३१	३१	२७	१५	३३	३७
देशांतर	धन	अन्यस्त्री	अक	वणि०	का०	विवाह	प्रसू०	संतान	श्रद्धा	प्रीति	बलसैन्य	देह	जाड्य	व्यापार	पानी	शत्रु	शौर्य	उपाय	दरिद्र	गुरु०	जल	बंध	कन्या	अश्व
२६	२७	२८	२९	३०	३१	३२	३३	३४	३५	३६	३७	३८	३९	४०	४१	४२	४३	४४	४५	४६	४७	४८	४९	५०
११	६	११	०	९	३	३	२	६	११	८	०	०	१०	१	२	३	२	९	९	३	९	४	३	११
२७	७	५	३	२७	६	५	५	२८	२८	१८	१४	१४	२०	२०	२	२५	६	२५	२	२०	२६	१३	२०	४
५५	२१	५	२६	५७	३	४८	२२	२२	३	४४	५५	५५	१	२०	४१	४९	१४	१७	४३	३३	१७	५८	२५	४७
१९	३६	३६	४७	३३	४२	४८	५९	२३	६	३२	३२	३२	५०	२२	१	३६	३६	३५	३५	४८	०	३५	५५	७

स्वनाथहीनंसहमंतदंशाःस्वीयोदयस्थाविहृतात्रिशत्या ॥ तत्सद्म पाकोदिवसैर्हिलब्धैःस्यात्तद्दशायांतदसंभवेवा ॥ २५ ॥ स्वोच्चा दिसत्पदगतोयदिलग्नदर्शीवीर्यान्वितःसहमपोयदिनेक्षतेंगम् ॥ ना सौबलीरविशशिश्रितभेशदर्शपूर्णातलग्नपबलस्यविचारणेत्थम् २६॥

प्याद्यानिभवंतितत्रसहमान्यंशोविरामोयतः”॥२४॥ **अथसहमोत्पत्तिमभिधा य**तत्फलान्याभिधास्यमानोवर्षप्रवेशात्कतिदिवसैःसहफलावाप्तिःस्यादित्याकांक्षां परिहरंस्तत्प्राप्तिदिवसानयनमाह–स्वनाथहीनमिति। यस्यसहमस्यशुभाशुभफ लावाप्तिदिवसाञ्ज्ञातुमिष्टास्तत्सहमराश्यादिकेकर्मभूमौस्थाप्यम्। स्वनाथेनस्वीय स्वामिनाग्रहेणहीनमूनंकार्यमवशिष्टस्यांशाःकार्यास्तेतत्सहमाक्रांतराशिस्वीयोद येनविनिघ्नाः त्रिशत्याशतत्रयेणविहृताभक्ताः यल्लब्धादिवसास्तैःकृत्वातेषांसद्म नांसहमानांपाकःफलपाककालःस्यात् अत्रागतैर्दिवसैःत्रिशत्भक्तैःवर्षप्रवेशका लिकोराश्यादिः स्पष्टसूर्ययुक्तस्तावतिसूर्येभुक्तेसतितत्सहमस्यफलपाककालोभ वतीति। केचित्तुसहमेश्वरमहादशाप्रवृत्तिदिनादेवतावद्भिरानीतैर्दिवसैःतद्दशायां अन्यद्दशायांवाफलपाकइति ननुसहमसहमेश्वरयोर्यदाराश्यादिसाम्यंस्यात्तदांत राभावादेवतत्सहमदिवसेलब्धेकथंसहमफलादिनज्ञानंस्यादित्यतआह– तद्दशा यामिति । सत्यं तदसंभवेवाअंतराभावाद्दिवसाप्राप्तौसत्यांतत्सहमनाथदशाया मेवसहमफलप्राप्तिःस्यात् तत्रापिसूक्ष्मकालज्ञानंत्वंतर्दशायांवाविदशायांवास्या दितिनिष्कर्षः । **उदाहरणम्**–पुण्यसहमं ५।५।२५।१ स्वस्वामिनाबुधेन ३।६।१४।१२ हीनंशिष्टं१।२९।१०।४९अस्यांशाः ५९।१०।४९कन्यास्थसह ममितिकन्योदयेन ३३५ गुणितंजातं १९८२५।२३।३५ त्रिशत्या ३०० भक्तंलब्धादिवसाः ६६ घटी५पलानि ४ वर्षप्रवेशादिवसादेतावत्सुदिनेष्वतीतेषु पुण्यसहमफलपाकः । अथवा पुण्यसहमाधीशबुधमहादशायांबहुदिनवत्यांबुध महादशाप्रवेशदिनादेतावत्सुदिनेष्वतीतेषुपुण्यसहमफलपाकः यद्यल्पदिनवत्त्वंय दावासहमेश्वरः ॥ २५॥ **अथसहमानांफलानिव्याख्यायंते**–स्वोच्चादीति। सहमपःसहमराशिस्वामी स्वोच्चादिस्वगृहस्वोच्चस्वहद्दास्वत्रैराशिकस्वमुसल्लहएत

पंचवर्गीबलेनोनोनहर्षस्थानमाश्रितः ॥ अबलोऽयंलग्नादर्शीब लीस्वल्पेऽस्तिचेत्पदे ॥ २७ ॥ स्वस्वामिनाशुभखगैःसहितंचदृ ष्टंस्वामीबलीचयदितत्सहमस्यवृद्धिः ॥ यत्स्वामिनाशुभखगैश्चन युक्तदृष्टंतत्संभवोनहिभवेदितिचिंत्यमादौ ॥ २८ ॥

त्स्थानस्थःसन् अथवासत्पदगतःशुभस्थानस्थःसन् उपलक्षणत्वान्मित्रगृहगतः सुहृत्सौम्यदृष्टोयुतोवायदिलग्नदर्शीलग्नंपश्यति तदावीर्यान्वितःवीर्येणबलेनान्वि तोयुक्तः बलीत्यर्थः।सहमस्वामीस्वोच्चादिसत्पदगतःसन् यदिअंगंलग्नंनेक्षतेनप श्यति तदाअसौबलीनभवति निर्बलइत्यर्थः। रविशशीति। रविशशिभ्यामा श्रितेयेभेराशीतयोःराश्योःईशौस्वामिनौ। तद्यथा जन्मकालेसूर्योयस्मिन्राशाव स्तितद्राशिस्वामी । तथाजन्मकालेचंद्रोयस्मिन्राशावस्तितद्राशिस्वामी । जन्मकालादतीतागतामावास्यायावत्घटीपरिमिताऽस्ति तस्मिन्कालेतात्कालिक सूर्यात्लग्नंसाध्यं तत्स्वामी तथाजन्मकालातीतपूर्णांतलग्नस्वामी एतेषांचतुर्णांब लस्यैवंविचारः। हिल्लाजेआयुर्दायानयने तथा मनुष्यजातकेआयुर्दायानयने एतेषांबलविचारस्योपयोगः। प्रकृतेअत्रप्रयोजनाभावेपिप्रसंगादुक्तम् ॥ २६ ॥ **अथनिर्बलसबलत्वलक्षणमाह**–पंचवर्गीति। पंचवर्गीबलंप्रागुक्तंतेनऊनःश रोनोहीनबलइत्युक्तः। नंदत्रिषडित्यादिचत्वारिहर्षस्थानानिप्रागुक्तानि। तन्म ध्येएकमपिहर्षस्थानंनाश्रितः। तथालग्नादर्शीलग्नमपिचेन्नपश्यति तदाअयंग्रहः अबलःनिर्बलोज्ञेयः। चेत्स्वल्पेपदेऽस्तितदाबली। तद्यथा स्वगृहस्वोच्चस्थाने ग्रहेसतिमहाधिकारः स्वहद्दायांग्रहेसतिमध्यमोऽधिकारः स्वत्रैराशिकेस्वमुसल्ल हेसतिस्वल्पोऽधिकारः अतएवप्राज्ञैर्बलतारतम्यमुक्तं त्रिंशत्स्वभेविंशतिरात्मतुं गेइत्यादि। पदंस्थानं एवंस्वल्पेपिपदेत्रैराशिकमुसल्लहाख्येस्थानेस्थितःसन्ल ग्नंपश्यति। तदाबलीग्रहोज्ञेयः ॥ २७ ॥ एवंसहमाधिपस्यबलाबलंज्ञात्वेदानीं **सहमस्यवृद्धिह्रासावाह** स्वस्वामिनेति। यत्सहमंस्वस्वामिनासहितंदृष्टंवाअ थवाशुभग्रहैःसहितंदृष्टंवाभवतियदिप्रागुक्तप्रकारेणसहमस्वामीबलीस्यात् तदात

अष्टमाधिपतिनायुतेक्षितंपापदृग्युतमथेत्थशालितैः ॥ संभवेऽपिविलयंप्रयातितत्तेनजन्मनिपुरेदमीक्ष्यताम् ॥ २९ ॥ आदौ जन्मनिसर्वेषांसहमानांबलाबलम् ॥ विमृश्यसंभवोयेषांतानिवर्षे विचिंतयेत् ॥ ३० ॥ सबलेपुण्यसहमेधर्मसिद्धिर्धनागमः ॥ शुभस्वामीक्षितयुतेव्यत्ययेव्यत्ययंविदुः ॥ ३१ ॥ लग्नात्षष्ठाष्टरिःफस्थंधर्मभाग्ययशोहरम् ॥ शुभस्वामिदृशांप्रांतेसुखधर्मादि संभवः ॥ ३२ ॥

त्सहमस्यवृद्धिः फलदातृत्वेसामर्थ्यंस्यात् । यत्सहमंचेत्स्वामिना अथवाशुभग्रहैर्नयुक्तंनदृष्टंतदातत्सहमस्यनसंभवःफलदातृत्वसामर्थ्यंनभवेत् नामसदृशंफलं नददातीत्यर्थः। इत्यादौप्रथमतश्चिंत्यंविचार्यम् ॥२८॥ **अथान्यत्सहमासंभवलक्षणमाह**—अष्टमेति । यत्सहमंवर्षलग्नादष्टमाधिपतिनाअष्टमराशिस्वामिना युतंईक्षितंदृष्टंवा अथवा पापग्रहेणदृष्टंयुतंवा अथवा तैरष्टमराशिस्वामिनापापग्रहैर्वाइत्थशालीमुथशिलंकरोति तदास्वस्वामिनाशुभखगैःसहितमित्यादिसहमस्यफलप्राप्तिसंभवेऽपिविलयंनाशंयाति । सहमंनामसदृशंफलंनददातीत्यर्थः । तेनकारणेनजन्मनिजन्मकालेप्रथमतः इदंसहमस्यबलाबलमीक्ष्यतांविचार्यताम् ॥२९॥ **अथबलिष्ठसहमस्यसाधनंनिर्बलस्यनिराकरणमित्यतआह**—आदाविति। आदौप्रथमतः जन्मनिजन्मकालेसर्वेषांपंचाशत्सहमानांबलाबलंविमृश्यज्ञात्वायेषांफलप्राप्तिसंभवस्तानिवर्षेविचिंतयेत् येषांतुसहमस्वामिनांसर्वप्रकारेणनैर्बल्यंज्ञातंतानिवर्षेकदापिनविचारयेदित्यर्थः ॥ ३० ॥ एवमुक्तप्रकारेणसहमानांसबलत्वेसातिफलदातृत्वमुक्तं इदानींसमस्तसहमानांफलानिउच्यंते तत्रादौ**पुण्यसहमस्यफलमाह**—सबलेति । सबलेपुण्यसहमेसतिशुभग्रहैःस्वमिनाचदृष्टयुतेसति धर्मस्यसिद्धिर्धनागमःधनप्राप्तिः । व्यत्ययेसहमस्यनिर्बलत्वेसतिपापग्रहदृष्टयुतेसतिव्यत्ययंधर्मनाशः धननाशश्चेतिफलंविदुःवदंति॥३१॥ **अथास्याशुभफलंसापवादमाह**—लग्नादिति । वर्षलग्नात्षष्ठाष्टमद्वादशस्थानस्थंपुण्यसहमंयदाभवतितदाधर्मभाग्ययशसांनाशकंभवेत् । एतत्स्थानस्थितंसत्

पापयुक्शुभदृष्टंचेदशुभंप्राक्ततःशुभम् ॥ शुभयुक्तंपापदृष्टमादौ शुभमसत्परे ॥ ३३ ॥ यत्राब्देपुण्यसहमंशुभंसोऽत्रशुभावहः ॥ अनिष्टेस्मिन्नशुभोनेतिपुण्यमादौविचारयेत् ॥ ३४ ॥ सूतौषष्ठाष्टरिःफस्थेमध्येपापहतंपुनः ॥ पुण्यंधर्मार्थसौख्यघ्नंपत्यौदग्धेफलंतथा ॥ ३५ ॥ सहमान्यखिलानीत्थंसूतौवर्षेविचिंतयेत् ॥ मांद्यारिकलिमृत्यूनांव्यत्ययादादिशेत्फलम् ॥ ३६ ॥

शुभग्रहेणस्वामिनावादृष्टंतदाप्रांतेवर्षांतेसुखधर्मादिसंभवःप्राप्तिःस्यात्। अर्थाद्वर्षपूर्वार्धेअशुभफलम् ॥ ३२॥ अथपापशुभग्रहसंबंधेन**युतिदृष्टयोःफलमाह**–पापयुगिति। तत्पुण्यसहमंपापयुक्तंशुभदृष्टंचचेद्भवति तदाप्राक्पूर्वार्धेअशुभंभवेत् वर्षस्योत्तरार्धेशुभंस्यात्। यदातुपुण्यसहमंशुभयुक्तंपापदृष्टंचेत्तदादौवर्षपूर्वार्धेशुभंस्यात् परेवर्षस्योत्तरार्धेअसत्अशुभंस्यात् यदातुपापयुक्तंपापदृष्टंचेत्तदा संपूर्णवर्षमशुभंभवेत्। यदातुशुभग्रहयुक्तंशुभग्रहदृष्टंचेत्तदासंपूर्णवर्षपर्यंतंशुभफलंभवतीत्यर्थतःसिद्धम् ॥ ३३ ॥ **अथपुण्यसहमप्रशंसामाह** यत्राब्द इति। यत्राब्देयस्मिन्वर्षेपुण्यसहमंशुभंशुभफलजनकंसोऽब्दःशुभावहः। तद्वर्षंशुभफलदंज्ञेयमित्यर्थः। यस्मिन्वर्षेपुण्यसहमेअनिष्टेसति तदाशुभोनेति शुभफलंवर्षमध्येनददातीत्यर्थः।अशुभमेवददातीत्यतःकारणात्पुण्यसहममादौ प्रथमतःविचारयेत् ॥ ३४ ॥ अथपुण्यसहमस्यजन्मलग्ने**त्वनिष्टस्थानस्थितस्याशुभफलमाह** सूताविति। सूतौजन्मसमयलग्नेषष्ठाष्टरिःफस्थे रिःफशब्देनद्वादशस्थानं एतत्स्थानस्थितंचेत्पुण्यंपुण्यसहमंभवति। अब्देवर्षेपुनः पापहतंपापयुतंदृष्टंवातदाधर्मार्थसौख्यानांघातकंभवति पत्यौपुण्यसहमस्वामिनिदग्धेऽस्तंगतेतथाफलंधर्मार्थसौख्यानांघातकंभवति ॥३५ ॥ सहमानीति। अखिलानिसमग्राणिसहमानिइत्थमसुनाप्रकारेणसूतौजन्मलग्नेवर्षेचचिंतयेत्। मांद्यंरोगः अरिःशत्रुः कलिःझकटकः मृत्युःप्रसिद्ध अशुभसहमस्योपलक्षणत्वाद्दारिद्र्यसहममपि। अतएवग्रंथकर्ताअग्रेवक्ष्यति ‘ दारिद्र्यमृतिमांद्यारिकलिषूक्तोविपर्ययःइति ’ एषुसहमेषुव्यत्ययात्पुण्यसहमफलाद्विपरीतंफलमादिशेत्। तद्यथा

कार्यसिद्धिसहमंयुतंशुभैर्दृष्टमूथशिलगंजयप्रदम् ॥ संगरेऽथशुभपापदृष्टियुक्क्लेशतोजयउदीरितोबुधैः ॥ ३७ ॥ कलिसद्ममिश्रखगदृष्टिसंयुतंयदिपापमूथशिलगंकलेर्मृतिम् ॥ अथतत्रसौम्यसहितावलोकितेजयमेतिमिश्रदृशितःकलिव्यथे ॥ ३८ ॥ विवाहसद्माधिपसौम्यदृष्टंयुतंशुभैर्मूथशिलंशुभाप्तिम् ॥ कुर्याद्यदामिश्रसमेतदृष्टंकष्टादथक्रूरमृतीश्वरेण ॥ ३९ ॥

पुण्यसहमवत् स्वोच्चादिसत्पदगतोयदिलग्नदर्शीत्येतच्छ्लोकमारभ्यसूतौषष्ठाष्टरिःफस्थमित्येतावत्पर्यंतंविचारेक्रियमाणेयदिमांद्यारिकलिमृत्यूनांसहमानांशुभफलमागतं तदाअशुभफलंवाच्यम् । यदित्वशुभफलमागतंतदाशुभफलंवाच्यमित्यर्थः ॥ ३६ ॥ **अथकार्यसिद्धिसहमस्यशुभाशुभफलमाह** कार्यसिद्धीति । कार्यसिद्धिसहमंशुभैःशुभग्रहैर्युतंदृष्टंवा तथाशुभग्रहैर्मुथशिलश्चेत्कृतस्तदासंग्रामेजयप्रदं शत्रुनाशः स्वोत्कर्षश्चभवतीत्यर्थः । अथेत्यनंतरं तत्कार्यसिद्धिसहमंशुभपापग्रहदृष्टंयुक्तंवातदाक्लेशतोऽत्यायासेनबुधैःपंडितैर्जयउदीरितः संगरइत्युपलक्षणंविवादादेरपि ॥ ३७ ॥ **अथकलिसहमस्यशुभफलमाह** कलीति । कलिःझकटकस्तस्यसमंमिश्रखगैःशुभपापग्रहैर्दृष्टंसंयुतंवानभवति । तथा यदिपापमुथशिलगंपापग्रहकृतमुथशिलयोगश्चेद्भवति तदा कलेःकलहप्रसंगान्मृतिंमरणंप्राप्नोति अथेत्यनंतरंतत्रकलिसमेसौम्यैःशुभग्रहैःसहितेयुक्तेऽवलोकितेदृष्टेवासति कलौकलहेजयमेतिस्वोत्कर्षंप्राप्नोति । यदिमिश्रदर्शितःशुभपापग्रहदृष्टिश्चेद्भवति तदाकलिव्यथे कलिश्चव्यथाचकलिव्यथे कलिःकलहः व्यथादुःखंचतेभवतः ॥ ३८ ॥ **अथविवाहसहमस्यशुभाशुभफलमाह** विवाहेति । विवाहसद्मसहमंअधिपेनस्वामिनायुतंदृष्टंवा । तथाऽन्यैर्वासौम्यैःशुभग्रहैर्दृष्टंयुक्तंवास्यात्तथाशुभैर्मुथशिलं शुभैःशुभग्रहकृतमुथशिलयोगश्चेत्तदाशुभाप्तिंविवाहप्राप्तिंकुर्यात् । यदामिश्रसमेतदृष्टंमिश्रैःशुभाशुभग्रहैःयुक्तंदृष्टंवाचेत्तदाकष्टात्क्लेशेनविवाहप्राप्तिंकुर्यात् । अथ क्रूरैःपापैर्विवाहसहमंयुतंदृष्टंवामुथशिलीकृतंवा तथामृतीश्वरेणवर्षलग्नाद्विवाहसहमाद्वाअष्टमस्था

यशोधिपेनैधनगेखलेनयुतेक्षितेसद्यशसोविनाशः ॥ पापार्जित
स्यायशसोऽस्तलाभोनष्टौजसिस्यात्कुलकीर्तिनाशः ॥ ४० ॥ शु
भेत्थशालेशुभदृग्युतेवाबलान्वितेस्याद्यशसोऽभिवृद्धिः ॥ युद्धेज
योवाहनशस्त्रलाभःपापेसराफादयशोर्थनाशः ॥ ४१ ॥ आशात
दीशश्चषडष्टरिःफविवर्जितःसौम्ययुतेक्षितश्च ॥ स्याद्वांच्छितार्थां
बरवाहनादिलाभःखलेक्षायुतितोऽतिदुःखम् ॥ ४२ ॥ मांद्याधि
पःपापयुतेक्षितश्चपापःस्वयंरोगकरोविचिंत्यः ॥ चेदित्थशालेमृ
तिपेनमृत्युस्तदाभवेद्धीनबलेतिकष्टात् ॥ ४३ ॥

नाधीश्वरेणयुतंदृष्टंवामुथशिलीकृतंवास्यात्तदानतस्मिन्वर्षेविवाहोनैवभवेत् ॥
॥ ३९ ॥ **अथयशःसहमस्याशुभफलमाह**—यशइति। यशोधिपेयशःसहम
स्वामिनिनैधनगेऽष्टमस्थानगतेखलेनपापग्रहेणयुतेदृष्टेवासतिअनेककालार्जित
स्यसद्यशसोविनाशःस्यात् । किंतुपापसंबंधेनार्जितस्यायशसोस्तिलाभः ।
तादृशेष्टमस्थितेसतिपुनर्नष्टौजसि अस्तंगतेसतिकुलकीर्तिनाशःस्यात् ॥ ४० ॥
अथपुनरपियशःसहमस्यशुभाशुभफलमाह—शुभेति । यशःसहमपतिना
सहशुभेत्थशालेशुभग्रहेणसाकंमुथशिलयोगेसतिशुभदृग्युतेवासतिबलान्वितेब
लिष्ठेसतियशसोभिवृद्धिःस्यात् तथायुद्धेजयःस्यात् तथावाहनानांगजा
श्वादीनांशस्त्राणांचलाभःस्यात् तथा यशःसहमपतेः पापग्रहेणसहईसरा
फयोगेसतिअयशोऽर्थनाशश्चस्यात् ॥ ४१ ॥ **अथाशासहमस्यशुभाशुभ
फलमाह**—आशेति। आशासहमंलग्नात्षष्ठाष्टमरिःफवर्जितंएतत्स्थानास्थितंन
भवति । तथातदीशश्चआशासहमाधिपतिश्चएतत्स्थानात्रिवर्जितोभवति द्व
यमपिसौम्यैःशुभग्रहैर्युतैरीक्षितौदृष्टौवास्यातां तदावांछितानामर्थानांसुवर्णादि
द्रव्याणांअंबराणांवस्त्राणांवाहनादीनांचलाभःस्यात् । खलेनपापग्रहेणदृष्टेयुते
सतितदावांच्छितार्थादीनामपिदुःखम् ॥ ४२ ॥ **अथरोगसहमस्याशुभ
फलमाह**—मांद्याधिपइति । मांद्याधिपःरोगसहमाधीशःस्वयंपापग्रहः पाप
युतेक्षितश्च । पापग्रहैर्युतःदृष्टः तदासरोगकरोविचिंत्योज्ञेयः चेन्मृतिपेनल

स्वस्वामिसौम्येक्षणभाजिमांद्येनाथेसवीर्येऽष्टषडंत्यवर्जे ॥ रोगस्त दानैवभवेद्विमिश्रंयुतेक्षितेरुग्भयमस्तिकिंचित् ॥ ४४ ॥ अर्था ख्यंशुभनाथदृष्टसहितंद्रव्यागमात्सौख्यदंपापैर्दृष्टयुतंचवित्तविल यंकुर्यादथोपापयुक् ॥ सद्दृष्टंचशुभेत्थशालियदितत्पूर्वंधनंनाशये त्पश्चादर्थसमुद्भवंचससुखंव्यत्यासतोव्यत्ययः ॥ ४५ ॥ रिपुदृ ष्ट्यारिपोर्भीतिस्तस्करादेर्धनक्षयः ॥ मित्रदृष्ट्यामित्रयोगाद्धनंमा नोयशःसुखम् ॥ ४६ ॥

ष्टमस्थानाधिपतिनासहरोगसहमाधीशइत्थशालोमुथशिलंकरोति । तदा मृत्युर्मरणंस्यात् । यदितुतादृशेमांद्यसहमस्वामिनिहीनबलेसति अतिक ष्टान्मरणंभवेत् ॥ ४३ ॥ **अथपुनरपिमांद्यसहमस्यशुभाशुभफलमाह-** स्वस्वामीति । मांद्येमांद्यसहमेस्वस्वामिनासौम्यग्रहैर्वायदीक्षणंतद्भवतितादृशेस तिउपलक्षणत्वाद्युक्तेवासति तथानाथेसवीर्येसतिमांद्याधिपउक्तरीत्यासबलेसति अष्टषडंत्यवर्जेषडष्टद्वादशस्थानास्थितिरहितेसतितदारोगोनैवभवति । यदाशु भपापैर्युतेईक्षितेदृष्टेवासतिकिंचिद्रुग्भयंरोगभयमस्तीतिज्ञेयम् ॥ ४४ ॥ **अ थार्थसहमस्यशुभाशुभफलमाह-**अर्थाख्यमिति । अर्थाख्यंसहमंशुभेननाथे नस्वामिनादृष्टंयुतंचेद्भवतितदाद्रव्यागमात्द्रव्यप्राप्त्याकृत्वासौख्यदं यदापाप ग्रहैर्दृष्टंयुतंवाचेत्तदावित्तस्यद्रव्यस्यनाशंकुर्यात् । अथार्थसहमंपापयुक्सद्दृष्टं चपापग्रहैर्युक्तंसद्भिःशुभग्रहैर्दृष्टंचभवति । तथाशुभेत्थशालिशुभग्रहेणसहमुथ शिलयोगंकरोतितदासर्वंधनंसर्वसंचितंधनंनाशयेत् । पश्चादर्थस्यद्रव्यस्यसमु द्भवंससुखंसुखसहितंकुर्यात् । व्यत्यासतोव्यत्ययइति अर्थसहमंशुभाशुभै र्दृष्टंतथातैरेवमुथशिलयोगंयदिकरोतितदाबहुधाशुभफलमेवईषत्धनंनाशश्चस्या त् ॥ ४५ ॥ **अथशत्रुमित्रदृष्ट्योःफलमाह** रिपुदृष्ट्येति । यत्सहमं शुभग्रहेणवारिपुदृष्ट्याशत्रुदृष्ट्यायदापश्यति तदारिपोःशत्रोःसकाशाद्भीतिर्भयं स्यात् तस्करादेर्धनक्षयश्च । यत्सहमंशुभेनपापेनवामित्रदृष्ट्यापश्यति

सत्स्वामिदृष्टंयुतमात्मजस्यलाभंसुखंयच्छतिपुत्रसद्म ॥ पापान्वि
तंसौख्यखगेत्थशालीप्राग्दुःखदंपुत्रसुखायपश्चात् ॥ ४७ ॥ पा
पान्वितंपापकृतेसराफंनाशायपुत्रस्यगतौजसीशे ॥ सूतौसुतेशः
सहमेश्वरौऽब्देपुत्रस्यलब्ध्यैशुभमित्रदृष्टः ॥ ४८ ॥ पित्र्यंसदीक्षि
तयुतंपतियुक्तदृष्टंतातस्ययच्छतिधनांबरमानसौख्यम् ॥ पत्यौग
तौजसिमृतौखलमूसराफेनाशःपितुश्चरगृहेपरदेशयानात् ॥४९ ॥
शुभेत्थशालेखलखेटयोगेगदप्रकोपःप्रथमंमहान्स्यात् ॥ पश्चात्
सुखंविंदतिपूर्णवीर्येनाथेनृपान्मानयशोऽभिवृद्धिः ॥ ५० ॥

तदामित्रयोगाद्धनंमानोयशःसुखंप्राप्नोति ॥ ४६ ॥ **अथपुत्रसहमस्यशुभाशुभफलमाह**—सत्स्वामिदृष्टमिति । पुत्रसद्मपुत्रसहमंसच्छुभग्रहैश्चस्वामिनाच दृष्टंयुतंवा तदाआत्मजस्यपुत्रस्यलाभंपुत्रोत्पत्तिंतज्जनितसुखंयच्छति । यदि-पुत्रसहमंपापान्वितंपापग्रहयुक्तंसौम्यग्रहैःसहेत्थशालंकरोतितदाप्राक्प्रथमतःपुत्र संबंधिदुःखंपश्चात्सुखायपुत्रसौख्यंभवति ॥ ४७ ॥ **अथपुनःसुतसहमस्याशुभाशुभफलमाह**—पापान्वितमिति । यदिपुत्रसहमंपापग्रहैर्युक्तंपापग्रह कृतेसराफयोगंईशेपुत्रसहमाधीशेगतौजसिनिर्बलेअस्तंगतेवासति तदापुत्रस्यनाशः । अब्देवर्षप्रवेशसमयेपुत्रसहमाधीश्वरःसुतौजन्मकालेसुतेशःपंचमभावाधीश्वरौभवतिपुनःशुभग्रहैर्मित्रेणचेद्दृष्टोभवतितदापुत्रस्यलब्ध्यैप्राप्त्यैभवति ॥४८॥ **अथपितृसहमस्यशुभाशुभफलमाह**—पित्र्यमिति । पित्र्यंपितृसहमंसच्छुभग्रहैरीक्षितंदृष्टंयुतंवा अथवापत्यास्वामिनायुक्तंदृष्टंवासत्तातस्यपितुर्धनांबरंमान सौख्यंयच्छति पत्यौपितृसहमस्वामिनिगतौजसिनिर्बलेअस्तंगतवा मृतौलग्नादष्टमस्थानस्थितेसति खलेनकृतमूसराफयोगेचसति तत्रापिचरगृहेचरराशिस्थेमेषकर्कतुलामकरराशिस्थेसति पितुःपरदेशयानात्परदेशयात्रायांसत्यांनाशोमरणंभवेत् ॥ ४९ ॥ **अथपुनरपिपितृसहमस्यशुभाशुभफलमाह**—शुभइति । पितृसहमेउपलक्षणत्वात्पुत्रसहमेश्वरस्यापिशुभग्रहकृतइत्थशालयो

बंधनाख्यसहमंयुतेक्षितंस्वामिनानहितदास्तिबंधनम् ॥ पापवीक्षितयुतेऽस्तिबंधनंपापजेमुथशिलेविशेषतः ॥ ५१ ॥ गौरवाख्यसहमंयुतेक्षितंस्वामिनाशुभखगैःसुखाप्तये ॥ राजगौरवयशोंबराप्तयेपापवीक्षितयुतेपदक्षतिः ॥ ५२ ॥ शुभाशुभैर्दृष्टयुतंखलैश्चेत्कृतेत्थशालंधनमाननाशम् ॥ पूर्वंविधत्तेचरमेशुभेत्थशालेसुखंवाहनशस्त्रलाभम् ॥ ५३ ॥ कर्मभावसहमाधिपाःशुभैःस्वामिनामुथशिलाबलान्विताः ॥ हेमवाजिगजभूमिलाभदाःपापदृष्टियुतितोऽशुभप्रदाः ॥ ५४ ॥

गश्चेद्भवति पुनःपापग्रहयोगश्चद्भवति तदाप्रथमंवर्षपूर्वार्धगदस्यरोगस्यप्रकोपोभिवृद्धिःमहान्स्यात् । पश्चाद्वर्षोत्तरार्धेसुखंविंदतिप्राप्नोति रोगरहितोभवतीत्यर्थः । नाथेपितृसहमस्वामिनिपूर्णवीर्येपंचदशविश्वाधिकबलेसतिनृपाद्राज्ञःसकाशान्मानयशोभिवृद्धिःस्यात् ॥ ५० ॥ **अथबंधनसहमस्य शुभाशुभफलमाह**–बंधनेति । बंधनसहमंस्वामिनायुतेक्षितंयुतंदृष्टंवातदाबंधनंकारागृहप्राप्तिर्नास्ति । तद्बंधनसहमंपापग्रहेणदृष्टंयुतंतदाबंधनमस्ति । पुनर्बंधनसहमस्यतत्स्वामिनोवापापग्रहकृतोमुथशिलयोगश्चेत्तदाविशेषतोबंधनमस्ति ॥ ५१ ॥ **अथगौरवसहमस्यशुभाशुभफलमाह**–गौरवाख्येति । गौरवसहमंस्वामिनाशुभग्रहैर्वायुतंदृष्टंवातदासुखाप्तयेसुखप्राप्त्यैस्यात् राजगौरवंयशःअंबराणिवस्त्राणितेषांप्राप्तिश्चगौरवसहमंपापग्रहैर्युतंदृष्टंवास्यात् तदापदस्याधिकारस्यक्षतिर्नाशःस्यात् ॥ ५२ ॥ **अथपुनर्गौरवसहमस्याशुभफलमाह**–शुभाशुभैरिति । गौरवसहमंशुभपापग्रहैर्दृष्टंयुतंवा तथाखलैःपापग्रहैश्चेत्कृतमुथशिलंतदापूर्वंवर्षपूर्वार्धेधननाशंमाननाशंचविधत्तेकरोति । चरमेवर्षस्योत्तरार्धेगौरवसहमंशुभग्रहैःकृतमुथशिलंचेत्तदासुखं वाहनशस्त्रलाभंचविधत्ते ॥ ५३ ॥ **अथकर्मसहमस्यशुभाशुभफलमाह**–कर्मभावेति । कर्मभावःकर्मसहमंचतयोश्चाधिपौकर्मभावाधिपःकर्मसहमाधिपश्च एवंचत्वारोबलान्विताः।

दग्धावक्राःकर्मवैकल्यदास्तेयुक्तादृष्टाःसौरिणातेविशेषात् ॥ राज्यभ्रंशःकर्मनाशश्चराजकर्मेशौचेन्मूसरीफौखलेन ॥ ५५ ॥ उपदेष्टागुरुर्ज्ञानंविद्याशास्त्रंश्रुतिस्मृती ॥ मोहोजाड्यंबलंसैन्यमंगंदेहोजलंद्युतिः ॥ ५६ ॥ गुरुतामंडलेशत्वंगौरवंमानशालिता ॥ निग्रहानुग्रहविभूराजाछत्रादिलिंगभाक् ॥ ५७ ॥

शुभैःशुभग्रहैःस्वामिनाचकृतमुथशिलाः तदाहेमवाजिगजभूमिलाभदाःस्युः । एतेकर्मभावसहमाधिपाःपापग्रहैर्दृष्टयुताःतदाअशुभदाःस्युः ॥ ५४ ॥ **अथ पुनरपिकर्मभावसहमाधिपानामशुभफलंचाह**—दग्धाइति । कर्मभावसहमाधिपाःअस्तंगताःवक्राःवक्रगतित्वंतदाकर्मवैकल्यदाःकर्मणःप्रारब्धशुभकार्यस्य वैकल्यमनिष्पत्तिस्तांददतितादृशाःस्युः । कर्मभावसहमाधिपाःसौरिणाशनैश्चरेणयुक्तादृष्टावातदाविशेषादवश्यमेवकर्मवैकल्यदाःस्युः । तथाराजकर्मेशौरागसहमेश्वरकर्मभावेश्वरौखलेनपापग्रहेणमूसरीफौकृतमूसरीफयोगौचेत्तदाराज्यभ्रंशोराज्यनाशःकर्मनाशश्च प्रारब्धशुभकार्यस्यनाशःस्यात् ॥ ५५ ॥ **अथ केषांचित्संदिग्धार्थानांसहमानांनिःसंदिग्धमर्थमाह**—उपदेष्टेति । गृणात्युपदिशतिगायत्र्यादिकमितिगुरुःसउपदेष्टैवात्रोच्यते । यद्यपिगुरूगीष्पतिपित्राद्यावित्यमरकोशोस्ति तथापिपितृसहमस्यपार्थक्येनाभिधानान्नात्रतद्वाचकता बृहस्पतिवाचकत्वंतुततःफलप्राप्तेरसंभवान्नैवसंभवति अतःगुरुरुपदेष्टा तथाविद्यासहमशब्देनज्ञानम् शास्त्रशब्देनश्रुतिस्मृती जाड्यशब्देनमोहः अज्ञानमितियावत् । बलशब्दःसैन्यदेहशक्त्योःप्रसिद्धः तदर्थनिर्णयमाह बलशब्देनसैन्यम् । देहशब्देनअंगं शरीरमितियावत् । जलशब्देनद्युतिः कांतिरितियावत् ॥ ५६ ॥ अथगुरुशब्दाद्भावप्रत्ययोत्पत्तौसत्यांगुरुतागौरवशब्दयोर्निष्पत्तिः अनयोरर्थस्यैकत्वात्पृथक्सहमकथनमनुचितमितिमत्वातयोर्भेदमाह—गुरुतेति । अत्रतुलोकप्रसिद्धिः शरणंगुरुताशब्देनमंडलेशत्वंदेशस्वामिगौरवशब्देनमानशालिताप्रतिष्ठाधिक्यम् । **अथराजशब्दःक्षत्रियवाचकःप्रसिद्धोऽस्तितदर्थनिर्णयमाह**—निग्रहेत्यादिनाअर्धेन । अत्र

Indira Gandhi National Centre for the Arts

माहात्म्यंमंत्रगाभीर्यंधृतिबुद्ध्यादिशालिता ॥ सामर्थ्यंदेहजाश
क्तिःशौर्यंयत्नोऽरिनिग्रहे ॥ ५८ ॥ आशेच्छोक्तामतिर्धर्म्याश्रद्धा
बंदःपराश्रयः ॥ पानीयपतनंवृष्टिर्जलेऽकस्माच्चमज्जनम् ॥ ५९ ॥
आधिव्याधीतापमांद्येसपिंडाबंधवःस्मृताः ॥ सत्यालीकंवणिग्वृ
त्तिराधानंप्रसवःस्मृतः ॥ ६० ॥ दासत्वंपरकर्मोक्तमन्यत्स्पष्टंस्व
नामतः ॥ निरूप्याणियथायोग्यंकुलजातिस्वरूपतः ॥ ६१ ॥
शुभयोगेक्षणात्सौख्यंपत्युर्वीर्यानुसारतः ॥ दरिद्रमतिमांद्यारि
कलिषूक्तोविपर्ययः ॥ ६२ ॥

हिलोकप्रसिद्ध्याराजशब्देनपृथ्वीश्वरएवोच्यतेतल्लक्षणमाह निग्रहेति । निग्र
होनामअनिष्टकरणम् अनुग्रहोनामवाक्यस्येष्टकरणम् तयोर्विभुःसमर्थः ।
कीदृशः छत्रादिलिंगभाक् छत्रंप्रसिद्धंआदिशब्देनचामरादियल्लिंगंचिह्नंतद्भाक्भ
जतीति ॥ ५७ ॥ **अथमाहात्म्यसामर्थ्यशौर्याणामर्थमाह**—माहात्म्य
मिति । महतोभावोमाहात्म्यंमहत्त्वंच । मंत्रगांभीर्यं मंत्रएकांतेकृतविचा
रस्तस्यगांभीर्यमप्रकाशता । नन्वप्रकाशःकथंभवत्यतआह धृतीति । धृ
तिर्धैर्यंबुद्धिःपरिणामजाप्रज्ञाआभ्यांशालतेतत्शालियुक्तमित्यर्थः अस्यभावः
शालिताएतद्रूपंमाहात्म्यमित्यर्थः । सामर्थ्यशब्देनदेहजाशक्तिः शौर्यशब्दे
नशत्रुनिग्रहेयत्नःप्रयत्नः ॥ ५८ ॥ आशेति । आशाशब्देनइच्छोक्ता श्रद्धा
शब्देनधर्म्यामतिः बंदशब्देनपराश्रयपराधीनता पानीयपतनशब्देनवृष्टिः अ
थवाऽकस्माज्जलेमज्जनम् ॥ ५९ ॥ आधीति । तापशब्देनआधिः मांद्यंनाम
व्याधिःशरीरपीडाकरः बंधुशब्देनसपिंडाःप्रोक्ताः । वणिक्शब्देनसत्यालीकवृ
त्तिःसत्यासत्यवृत्त्याजीवनम् प्रसवशब्देनआधानम् ॥ ६० ॥ दासत्वमिति ।
परकर्मशब्देनदासत्वमुक्तं अन्यत्सहमानिस्वनामतःस्पष्टानि । कुलजातिस्वरू
पतःयथायोग्यंनिरूप्याणि ॥ ६१ ॥ शुभयोगेति । यत्सहमंशुभग्रहयुतं
दृष्टंवातदासौख्यंपत्युर्वीर्यानुसारतःसहमस्वामिनोयादृशंबलंतादृशं तत्सहमजनि
तंसौख्यंज्ञेयम् । तद्यथायदासहमस्वामीबलिष्ठस्तदामहत्सौख्यम् यदामध्य

Indira Gandhi National Centre for the Arts

प्रश्नकालेपिसहमंविचार्यंप्रष्टुरिच्छया ॥ सर्वेषामुपयोगोऽत्रचित्रंपृच्छंतियज्जनाः ॥ ६३ ॥ इतिसहमफलविचारः ॥ स्पष्टान्सलग्नान्खचरान्विधायराशीन्विनात्यल्पलवंतुपूर्वम् ॥ निवेश्यतस्मादधिकाधिकांशक्रमादयंस्यात्तुदशाक्रमोऽब्दे ॥ १ ॥ ऊनंविशोध्याधिकतःक्रमेणशोध्यंविशुद्धांशकशेषकैक्यम् ॥ सर्वाधिकांशोन्मितमेवतत्स्यादनेनवर्षस्यमितिस्तुभाज्या ॥ २ ॥

बलस्तदामध्यमंसौख्यम् । यदाहीनबलस्तदासुखाभावः दारिद्र्यमतिमांद्यारिकलिषूक्तोविपर्ययः एतत्सहमानांफलंविपरीतंज्ञेयम् । तद्यथा यदाशुभफलमागतंतदाअशुभंज्ञेयम् यदात्वशुभंफलमागतंतदाशुभफलंज्ञेयम् ॥ ६२ ॥ जन्मपत्र्यभावेशुभसहमविचारःकेनोपायेनस्यादित्यतआह—प्रश्नकालइति। प्रश्नकालसहममितिजात्यभिप्रायेणैकवचनं सहमानीत्यर्थः । तानिपुण्यादीनिसहमानिप्रष्टुःप्रश्नकर्तुरिच्छयाविचार्याणि । अत्रसर्वेषांसहमानामुपयोगःयतोजनाश्चित्रंपृच्छंति ॥ ६३ ॥ इतिसहमफलविचारः ॥ ॥ **अथदशानयनमाह** । तत्रादौकुशांशसाधनमाह—स्पष्टानिति । तत्रवर्षप्रवेशसमयेस्पष्टान्सलग्नान्ग्रहान्विधायराशिंत्यक्त्वाअंशादयःसर्वेस्थाप्याः तत्रात्यल्पलवाः तेषांमध्येन्यूनांशोग्रहःपूर्वंनिवेश्यःस्थाप्यः तस्मादधिकादधिकांशक्रमान्निवेश्यः । तद्यथा यथायथायस्ययस्यग्रहस्यांशाधिकाधिक्यंतथातथाससग्रहःसलग्नोनिवेश्यःस्थाप्यः अयमब्देदशाक्रमःस्यात् ॥ १ ॥ **अथपात्यांशसाधनमाह**—ऊनमिति । ऊनंस्वल्पमंशाद्यंग्रहमधिगतोधिकांशाद्ग्राहात्क्रमेणविशोध्यः। तद्यथा प्रथमंयथाल्पताएवस्थाप्याः ततःप्रथमाद्द्वितीयात्तृतीयादित्यादिक्रमेणशोध्याः । तदनंतरंविशुद्धांशकशेषकैक्यंपरस्परशोधनेसाति येउर्वरिताअंशास्तेषामैक्यंकार्यं तत्सर्वग्रहमध्येयोधिकांशोऽतिमग्रहस्तत्तुल्यमेवस्यादितिव्याप्तिः पश्चादनेनशेषांशयोगेनवर्षमितिसौरी ३६० सावनीवा ३६५।१५।३१।३०

शुद्धांशकास्तान्गुणयेदनेनलब्धध्रुवांकेनभवेद्दशायाः ॥ मानंदिनाद्यंखलुतद्ग्रहस्यफलान्यथासांनिगदेत्तुशास्त्रात् ॥ ३ ॥ शुद्धांशसाम्येबलिनोदशाद्याबलस्यसाम्येऽल्पगतेस्तुपूर्वा ॥ साम्येविलग्नस्यखगेनचिंत्याबलादिकालग्नपतेर्विचिंत्या ॥ ४ ॥

भाज्याल्लब्धंसध्रुवांकः स्यात् ॥ २ ॥ **अथदिवसानयनमाह**–शुद्धांशकानिति । अनेनलब्धध्रुवांकेनसर्वेपिशुद्धांशकागुणनीयाः एवंकृतेसति तत्तद्ग्रहस्यदिनादिकंदशायाःमानंभवेत् । एवंदशादिनान्यानीयशास्त्रात्फलानिशुभाशुभानिनिगदेत् ॥ ३ ॥ **अथांशसाम्येदशानिर्णयमाह**–शुद्धांशेति । द्वयोरंशैःसाम्येममत्वेसतिबलिनःपंचवर्गीबलाधिकस्याद्याप्रथमादशास्यात् । अत्रशुद्धांशसाम्येइत्ययंपाठः हीनांशसाम्येइतिपाठःसाधीयान्युक्तियुक्तः सर्वसंमतश्च । अत्रदशाक्रमस्तुपूर्वमेवहीनांशेनैवभवति । तदनंतरंकृतशोधनेकृतशुद्धांशाभवंतीतिनियमत्वात् द्वयोःशुद्धांशसाम्येयस्यबलमधिकंतस्यआद्यादशा । तदनंतरंद्वितीयस्यइदंकथंस्यात्तत्राह बलस्येति । बलसाम्येन्यूनगतेःपूर्वादशाज्ञेयाः । विलग्नस्यग्रहस्यचांशसाम्येकस्यप्रथमंदशेत्यत्राह साम्येति । खगेनग्रहेणविलग्नस्यसाम्येऽर्थादंशैःसाम्येबलादिकाबलगत्यादिकाचिंत्या लग्नपतेर्लग्नपतिसंबंधिनीबोध्येत्यर्थः । सौरदशायांवर्षप्रवेशसमयेएवप्रथमंसौरदशाप्रवेशः । तदधोवर्षप्रवेशकालीनःस्पष्टःसूर्योलेख्यः प्रथमदशादिनादि प्रथमदशाप्रवेशकालीनस्पष्टसूर्येयोज्यम् । तद्यथा सूर्यस्यअंशस्थानेदिवसायोज्याः कलास्थानेघटिकायोज्याः विकलास्थानेपलानियोज्यानि । विकलाः षष्ट्याभक्ताःलब्धंकलासुयोज्यम् कलाःषष्ट्याभक्ताःलब्धमंशेषुयोज्यम् । अंशास्त्रिंशद्भक्ताःलब्धंराशिषुयोज्यम् राशयोद्वादशांकाधिकास्तदाद्वादशभिस्तष्टाः । शेषंराशयःतादृशिसूर्येद्वितीयदशाप्रवेशकालीनसूर्येद्वितीयदशादिनायोज्यम् तादृशिसूर्येद्वितीयदशाप्रवेशः । एवमग्रेपि । एवंयोजनेवर्षप्रवेशकालीनसूर्यतुल्यःअंतिमसूर्योभवति । तदासौरदशाक्रमःशुद्धोऽन्यथाअशुद्धइति ।

दशामानंसमामानंप्रकल्प्योक्तेनवर्त्मना ॥ अंतर्दशासाधनीयाप्रा
क्पात्यांशवशेनतु ॥ आदावंतर्दशापाकपतेस्तत्क्रमतोपरा ॥५॥
अथसावनदशायांवर्षप्रवेशसमयेसावनप्रथमदशाप्रवेशः ततोवर्षप्रवेशवारादौप्र
थमसावनदशादिनानियोज्यानि तस्मिन्मासेतावतिवारादौद्वितीयदशाप्रवेशः ।
एवंद्वितीयदशाप्रवेशवारादौद्वितीयदशादिनानियोज्यानितस्मिन्मासेतावतिवारा
दौतृतीयदशाप्रवेशः एवमग्रेपि । एवंयोजितेअग्रिमवर्षप्रवेशेवारादिकमायातित

अथसौरमानेनहीनांशाः पात्यांशाः

	शा	सू	बु	मं	ल	चं	शु	गु	यो
हीनांशाः	६ ४८ ५४	७ ३० ६	१२ १६ १८	१४ ३२ ३६	१८ ३ ५४	२२ ९ ४७	२४ ३१ ४८	२९ ३५ १३	०० ०० ००
पात्यांशाः	६ ४८ ५४	० ४१ १२	४ ४६ २	२ १६ २८	३ ३१ १८	४ ५ ५३	२ २२ १	५ ३ २५	२९ ३५ १३
दशा-दिवसाः	८२ ५५ १८	८ २१ १८	५८ ० १९	२७ ४० २७	४२ ५१ ०	४९ ५१ ४७	२८ ४७ ५९	६१ ३१ ५२	३६० ०० ००
दशाप्रवेशः	९ ७ ३० ६	० ० २५ २४	० ८ ४६ ४२	२ ६ ४७ १	३ ४ २७ २८	४ १७ १८ २८	६ ७ १० १५	७ ५ ५८ १०	९ ७ ३० ६

दादशाप्रवेशःशुद्धःअन्यथाअशुद्धः । उदाहरणम्—शनिः सर्वापेक्षयान्यूनांशः अतःकारणाद्राशिंत्यक्त्वाप्रथमंशनिःस्थापितः ६।४८।५४ ततोऽर्कः ७।३०।६ ततोबुधः१२।१६।१८ ततोभौमः १४।३२।३६ ततोलग्नं१८।३।५४ ततश्चंद्रः २२।९।४७ ततःशुक्रः २४।३१।४८ ततोगुरुः २९।३५।१३ अथप्रथमंयथास्थिताःशनिपात्यांशाः६।४८।५४ एतेरविहीनांश ७।३०।६ मध्येशोधिताःजाताःरविपात्यांशाः ०।४१।१२ एवंपूर्वांशाअग्रिममध्येशोधिताःजाताःसर्वेषांपात्यांशाः। बुधः ४।४६।२ भौमः २।१६।२८ लग्नं ३।३१।१८ चंद्रः ४।५।५३ शुक्रः २।२२।१ गुरुः ५।३।२५ एतेषांयोगः २९।३५।१३ अनेनवर्षमितिः ३६० षष्टिसवर्णितौ १२९६००० भाज्यभाजकौ १०६१५१३ हरभक्ताजातोगुणकः १२। १०।३ अनेनशनिपात्यांशाः ६।४८।५४ गुणिताःजाताशनिदशादिनानि ८२।५५।१८ अथवापात्यांशयोगेन २९।३५।१३ वर्षमितिः ३६५।१५। ३१ भक्ताजातोगुणकः १२।२०।४२ अनेनशनेःपात्यांशाः ६।४८।५४ गुणिताःजातानिशनिदशादिनानि ८४।७।५२ एवंजातानिसर्वेषांदशादिनानि ॥ ४ ॥ अथांतर्दशानयनमाह—दशामानमिति । स्पष्टोऽर्थः । यस्यग्रहस्य

एकैकराशिवृद्ध्याचेत्तुल्यों ऽशाद्यैर्यदारविः ॥ तदामासप्रवेशोद्युप्रवेशश्चेत्कलासमः ॥ ६ ॥

दशामध्येंऽतर्दशाक्रियते तस्यदशामानंदिनघटीपलात्मकंतदेवसमामानंप्रकल्प्यउक्तविधिनाअंतर्दशासाध्या । उदाहरणम्-शनिदशा ८२।५५।१८ पात्यांशयोगेन २९।३५।१३ भक्ताजातोगुणकः २।४८।९अनेनशनिपात्यांशागुणिताःजाता शनिदशामध्येशनेरंतर्दशाः १९।५।५८एवं जाताशनिदशामध्येसर्वेषामंतर्दशा ॥ ५ ॥

शनेरन्तर्दशा.								
श	सू	बु	मं	ल	चं	शु	गु	यो
१९	१	१३	६	९	११	६	१४	८२
५	५५	२१	२२	५२	२९	३८	१०	५५
५८	२७	३८	२८	१२	८	४	२३	१८
९	९	१०	१०	१०	११	११	०	०
२६	२८	११	१८	२८	९	१६	०	०
३६	३१	५३	१५	७	३६	१५	२५	०
४	३१	९	३७	४९	५७	१	२४	०

अथमासदिनप्रवेशानयनमाह–एकैकेति । जन्मकालीनःसूर्योयादृशोराश्यादिर्भवति सएकादशधास्थाप्यः । एकद्वित्र्यादिराशिवृद्ध्यायुक्तोयथावस्थितांशादितुल्योयस्मिन्मासघटीपलात्मकेकालेभवति तदातत्संख्याकोमासप्रवेशोज्ञेयः । एतदुक्तंभवति–प्रथममासप्रवेशस्तुवर्षप्रवेशएवजातः । तत्रजन्मार्कतुल्यएवार्कोऽस्ति द्वितीयमासप्रवेशश्चेत्क्रियतेतदैकैकराशिसंयोजनात् अंशकलाविकलासमत्वंराशौयोजितेतत्तुल्यःसूर्यःयद्दिनेयस्मिन्समयेतदाद्वितीयमासप्रवेशोभवति एवमग्रेपिबोध्यम् । दिनप्रवेशश्चेत्क्रियतेतदैकैकांशसंयोजनात्कलाविकलासमत्वंयस्मिन्समयेतदाद्युप्रवेशोभवति ॥ ६ ॥

अथसावनमानेनक्रशांशाः पात्यांशाः									
	श	सू	बु	मं	ल	चं	शु	गु	यो
क्रशलवाः	६	७	१२	१४	१८	२२	२४	२९	००
	४८	३०	१६	२२	३	९	३१	३५	००
	५४	६	१८	३६	५४	४७	४८	१३	००
पात्यांशाः	६	०	४	२	३	४	२	५	२९
	४८	४१	४६	१६	३१	५	२२	३	३५
	५४	१२	२	३८	१८	५३	१	२५	१३
दशा-दिवसाः	८४	८	५८	२८	४३	५०	२९	६२	३६५
	७	२८	५१	४	२८	३५	१३	२५	१५
	५२	३७	१५	४१	३०	२६	१२	५८	३१

Indira Gandhi National Centre for the Arts

मासार्कस्यतदासन्नपंक्त्यर्केणसहांतरम् ॥ कलिकृत्वार्थगत्याप्तदि
नाद्येनयुतोनितम् ॥ ७ ॥ तत्पंक्तिस्थंवारपूर्वमासार्केऽधिकहीन
के ॥ तद्वाराद्येमासवेशोद्युवेशोप्येवमेवच ॥ ८ ॥

अथपंचांगान्मासप्रवेशघटिकाद्यानयनमाह—मासार्कस्येति । एकैकरा
शियोगेनजातोमासप्रवेशार्कः । अस्यासन्नपंचांगस्थितयदवध्यर्क्षस्तदवधिस्थार्क
मासप्रवेशार्कयोरंतरंकार्यम् । तस्यकलाःकार्याः अवधिस्थार्कगत्याभाज्याः
फलंदिनाद्यंत्रिस्थंवासरघटीपलात्मकंग्राह्यम् । तत्फलंअवधिस्थवारादौयुतोनि
तंकार्यम् । तद्यथा—अवधिस्थार्कतोमासप्रवेशार्कोऽधिकश्चेत्तदाअवधिस्थवा
रादौयुक्तंकार्यम् न्यूनेहीनंकार्यम् तस्मिन्वारादौवारघटीपलात्मकेकालेमास
प्रवेशोभवति एवमेवानयारीत्याद्युप्रवेशोदिनप्रवेशोज्ञेयः । अवधिस्थवारादावि
त्यत्रअवधिस्थघटिकानग्राह्याः कुतः यद्ग्रामस्थपंचांगंतद्ग्रामस्थचरदेशांतरसं
स्कारस्यकृतत्वात्इतिकारणादवधिस्थवारादावित्यत्रसंस्काररहितो वारघटीपला
त्मकोऽब्दपोग्राह्यः । सयथा यस्माद्ग्रंथात्पंचांगस्थितःसूर्यःसाधितः त
स्माद्ग्रंथादब्दपःसाध्यः परंत्वेतावान्विशेषः यदिग्रंथादावब्दपेउदयांतरभु
जफलंचरसंस्कारश्चेत्कृतोभवति तदासंस्काररहितोऽब्देशःकार्यः । यथारा
मविनोदस्थाब्दपेग्रंथादावुदयांतरभुजफलकाशीस्थचरसंस्कारःकृतोऽस्ति । त
थामकरंदस्थाब्दपेग्रंथादौकेवलकाशीस्थचरसंस्कारःकृतोऽस्ति । इतिकारणा
त्संस्काररहितोऽब्दपःकार्यः । तदनंतरंअस्मिन्संस्काररहिताऽब्दपे यस्यमास
प्रवेशःक्रियते तस्ययद्ग्रामेजन्मतद्ग्रामस्थचरदेशांतरउदयांतरभुजफलसंस्कारः
कार्यः सोऽब्दपःसूक्ष्मोभवति परंतुएतत्संस्कारचतुष्टयमध्येजन्मकालीन
सूर्योयावद्भिःसंस्कारैःसंस्कृतोभवतितावद्भिःसंस्कारैरब्दपःसंस्कार्यः । तदनंत
रंमासप्रवेशार्कावधिस्थार्कयोरंतरात्यत्पूर्वानीतवारादिकंतदस्मिन्नब्दपेउक्तरीत्या
युतोनंकार्यंताःमासप्रवेशेसूक्ष्मघटिकाभवंति । यदिजन्मकालीनःसूर्योरामविनो
दात्साधितोनास्ति। पंचांगस्थितोवधिस्थार्कोपिरामविनोदात्साधितोस्ति। अथवा

भूः १ पंचचंद्राः १५ कुगुणाः ३१ कुरामाः ३१ सिद्धा २४ गताब्दैर्गुणिताःसमेताः ॥ खेना० ब्धिदस्रै २४ र्गुणलोचनैश्च २३ तष्टानगै ७ रर्कमुखोऽब्दपःस्यात् ॥ १ ॥

जन्मकालीनस्तथावधिस्थश्चार्कयोःसाधनंमकरंदाच्चेत्कृतमस्ति तदासूक्ष्मघटिकाः भवंति । ग्रंथभेदेस्थूलघटिकाभवंति । **अत्रोदाहरणम्**—ग्रहलाघवाज्जन्मकालीनःस्पष्टोऽर्कः ९।७।३०।६ एकराशियुक्तोजातोद्वितीयमासप्रवेशार्कः १०।७।३०।६ अस्यासन्नफाल्गुनकृष्णनवमी ९ भृगौरामविनोदस्थपंचांगस्थितअवधिस्थार्कः १०।१०।१।३८ अनयोरंतरं ०।२।३१।३२ अस्यकलाः १५१।३२ अवधिस्थार्कगतिकलाभिः ६०।३१ भक्ताः सवर्णितौभाज्यभाजकौ भाज्य ९०।९२ भाजकाः ३६।३१ भाजकेनहतेभाज्येफलं २।३०।१३ दिनघटीपलात्मकम् ॥ ७ ॥ ८ ॥ **अथरामविनोदस्थपंचांगस्थितेग्रहे सतिअब्दपानयनमाह**—भूरिति । यस्मिन्वर्षेरामविनोदःकृतोस्तितस्मिन्वर्षे शकः १५१२ अयंइष्टशकमध्ये १५५० शोधितः शेषंगताब्दाः ३८ अयमंकः १।१५।३१।२४ गताब्दैः ३८ गुणितोजातः ४७।४९।५७।५३।१२ एतन्मध्येऽयंक्षेपो ०।२४।२३ योजितः ४८।१४।२०।५३।१२ उर्ध्वांकेसप्ततष्टेजातोऽब्दपः ५।५६।५७ परंतुएतन्मध्येउदयांतरभुजफलचरफलसंस्कारःकृतोऽस्तिइतिकारणात् एतन्मध्येसंस्कारैरहितःक्रियते तत्रादौउदयांतरसाधनं ग्रन्थादौशकः १५।१२ अस्मिन्शके मेषसंक्रांतिसमयेसूर्यः ०।०।०।० अयनांशाः १६।२४।५४ ब्रह्मतुल्यात्साधितमुदयांतरपलात्मकंऋणं १३ ग्रहापेक्षयाब्दपेविपरीतमित्युक्तत्वात्जातंधनं १३ इदमब्दपेऊनंजातउदयांतररहितोऽब्दपः ६।१४।८। **अथभुजफलमाह**—सूर्यान्मंदफलंधनं २।७ अस्यकलाः १२७ भाजकेन ३६० भक्ताः लब्धंघटिकाद्यंभुजफलंधनं ०।२१ विपरीतमित्युक्तत्वात्जातमृणं ०।२१ इदमुदयांतरसंस्कृताब्दपे ६।१४।८। युतंजातउदयांतरभुजफलसंस्कृतोऽब्दपः ६।१४।२९ **अथचरसं**

Indira Gandhi National Centre for the Arts

अब्दौघत:शैलनखै २०७ र्विनिघ्नात्पुनर्मनुघ्नंगतवर्षवृंदम् ॥ शराब्धिभक्तं ४५ घटिकादिलब्धंयुतंनभोश्व्यग्नि ३२० युतात्खखेभैः ८०० ॥ हृतादिनाद्यंगतवर्षयुक्तंसप्तोद्धृतंमेषमुखोऽब्दपःस्यात् ॥ २ ॥

स्कारमाह—काश्यांपलभा ५।४५ चरखंडानि ५७।४६।१९ चरंऋणंपलात्मकं ३१ विपरीतमित्युक्तत्वात् जातंधनं ३१ इदमुदयांतरभुजफलसंस्कृताब्दे ६।१४।२९ रहितंजातःउदयांतरभुजफलचरसंस्कृतोब्दपः ६।१३।५८ अनया रीत्यासंस्कारसहितोऽब्दपोजातः । उदाहरणप्रदर्शनार्थंएतावत्प्रदर्शितम् । अथसुगमोपायःकथ्यते । पूर्वग्रंथादावुदयांतरभुजफलचरमानीयतेषांत्रयाणांपरस्परसंस्कारेकृतेसतित्रयोविंशति २३ पलानिऋणानिजातानि एतानिस्थिराणि। अभीष्टवर्षेपूर्वोक्तश्लोकेनाऽब्दपश्चेत्साध्यते तदातस्मिन्नब्दपपलेषुत्रयोविंशतिपलानिरहितानिकार्याणि । अभीष्टवर्षेसोऽब्दपःसंस्काररहितोभवति। यथापूर्वानीतोऽब्दपः ६।१४।२१ अयंत्रयोविंशतिपलैरहितःकृतःजातःपूर्वानीतसंस्काररहिताब्दपतुल्यः ६।१३।५८ अब्दपः ॥ १ ॥ अथवारामविनोदस्थपंचांगे अभीष्टवर्षे**संस्कारत्रयरहिताब्दपानयनमाह**—अब्दौघतइति । यस्मिन्वर्षे रामविनोदःकृतस्तस्मिन्वर्षेशकः १५१२ अयमिष्टशक १५५० मध्येशोधितःजातानिगतवर्षाणि ३८ एभिरयमंको २०७ गुणितोजातः ७८६६ गतवर्षगणः ३८ चतुर्दशभिर्गुणितः ५।३२ अनेन ४५ भक्तःपलंघटिकाद्यं ११।४९ इदंपूर्वांक ७८६६ युतं ७८६६ मध्ये ११।४९ अस्मिन्नूर्ध्वांके ३२० अयमंकोयोजितः ८१८६।११।४९ अष्टशतैः ८०० भक्तं २ फलं दिनघटीपलात्मकं १०।१३।५८ अस्योर्ध्वांकेगतवर्षाणि ३८ युतानि ४८। १३।५८ सप्तभिस्तष्टानिशेषांकप्रमितोजातोऽब्दपः ६।१३।५८ जन्मकालीनसूर्यमध्येचरदेशांतरसंस्कारःकृतोस्ति इतिकारणात् अस्मिन्नब्दपेस्वदेशीयचरदेशांतरसंस्कारःक्रियतेअवधिस्थार्काच्चरंपलात्मकंधनं ७८ षष्टिभक्तंजातंघटिकाद्यं १।१८ विपरीतमित्युक्तत्वाज्जातंऋणं १।१८ इदमब्दपे ६।१३।५८

रहितंजातश्चरसंस्कृतोऽब्दपः ६।१२।४० देशांतरयोजनानिधनानि ३० चतुर्थांशोन्मितानिपलानि २२ विपरीतमित्युक्तत्त्वात् जातानिऋणानि २२ एतानि चरसंस्कृताब्दपेरहितानिजातश्चरदेशांतरसंस्कृतोऽब्दपः ६।१२।१८ अवधिस्थार्कमासप्रवेशार्कयोरंतरात्पूर्वसाधितवारादिकमिदं २।३०।१३ अवस्थार्कतः मासार्कस्यन्यूनत्वात्स्पष्टाब्दपं ६।१२।१८रहितंजातोमासप्रवेशकालः ३।४२।५ एवंजाताःफाल्गुनकृष्ण ६ भौमेद्वितीयमासप्रवेशेस्थूलघटिकाः ४२।५ कुतः ग्रहलाघवाज्जन्मकालीनःसूर्यःसाधितोऽस्तिरामविनोदस्थपंचांगस्थितअवधिस्थार्कोगृहीतोऽस्ति । एकग्रंथादुभयोःसाधनंचेत्क्रियते तदासूक्ष्मघटिकाःभवंति अतएव विचार्यग्रंथभेदेसतिपंचांगोपरिसुगमोपायत्वान्मासप्रवेशानयनंसर्वैःक्रियते तदशुद्धं । **अथसूक्ष्मघटिकानयनमाह**–यस्माद्ग्रंथाज्जन्मकालीनसूर्यो यावद्भिःसंस्कारैःसंस्कृतोस्तितावद्भिःसंस्कारैस्तस्माद्ग्रंथान्मासप्रवेशार्कःमासप्रवेशदिवसेसूर्यःसाध्यः मासप्रवेशदिवसेज्ञानंपंचांगोपरिअनुमानेनज्ञातुंशक्यते । जन्मकालीनसूर्येएकराशौयोजितेजातोमासप्रवेशार्कःमासप्रवेशदिवससूर्योयःसाधितोभवति । तयोर्मासप्रवेशार्कयोरंतरंकार्यंतस्यकलाःकार्याः मासप्रवेशसमयेसूर्योयःसाधितोभवतितस्यगतिःकलाभिर्भाज्या फलंदिनघटीपलात्मकं ग्राह्यंमासप्रवेशेसूक्ष्मघटिकाःभवंति । **उदाहरणम्**–ग्रहलाघवाज्जन्मकालीनचरदेशांतरसंस्कृतःस्पष्टोर्कः ९।७।३०।६ जातः एकराशियुक्तोजातोद्वितीयमासप्रवेशेर्कः १०।७।३०।६ फाल्गुनकृष्णषष्ठ्यां ६ भौमेग्रहलाघवादहर्गणः ३६२४ चक्रं ९ सूर्योदयेमध्यमोऽर्कः १०।५।७।५५ देशांतरविकलाभि २२ र्युक्ताः १०।५।८।१७ मंदकेंद्रं ४।१२।५१।४३ मंदफलंधनं १।३५।४९ संस्कृतोऽर्कः १०।६।४४।६चरंधनं१।२४संस्कृतःजातोमासप्रवेशदिवसेस्पष्टोऽर्कः १०।६।४५।३० स्पष्टागतिः ६०।३५ उभयोरंतरं ०।०।४४।३६ अस्यकलाः ४४।३६ गतिकलाभिः ६०।३५ भक्ताःसवर्णितौभाज्य २६७६ भाजकौ ३६३५ भाजनाल्लब्धंदिनघटीपलात्मकं ०।४४।१० एवंफाल्गुनकृष्णषष्ठ्यां ६ भौमेसूर्योदयाद्गतघटीषु ४४ पलेषु १० जातोद्वि

आसीदसीमगुणमंडितपंडिताग्र्योव्याख्यद्भुजंगपगवीःश्रुतिवित्सुवृत्तः ॥ साहित्यरीतिनिपुणोगणितागमज्ञश्चिंतामणिर्विपुलगर्गकुलावतंसः ॥ १ ॥ तदात्मजोऽनंतगुणोऽस्त्यनंतोयोऽधोक्षदुक्तीःकिलकामधेनुम् ॥ सत्तुष्टयेजातकपद्धतिंचन्यरूपयद्दुष्टमतंनिरस्य ॥ २ ॥

तीयमासप्रवेशः। अनयारीत्याचेत्साध्यतेतदामासप्रवेशेसूक्ष्मघटिकाःभवंति अस्मिन्समयेसूर्यः १०।७।२०।६ अयंपूर्वतुल्योजातः। एवमग्रेपिबोध्यम्। अनयारीत्यादिनप्रवेशःसाध्यःमासदिनप्रवेशसमयेग्रहभावाःसाध्याःपंचवर्गीफलादिकंविचार्यम् ॥ २ ॥ **अथग्रंथालंकारस्तत्रपितामहवर्णनमाह**—आसीदिति। चिंतामणिश्चिंतामणिसंज्ञकआसीत्बभूव। कथंभूतश्चिंतामणिः असीमगुणमंडितपंडिताग्र्यः असीमानिर्मर्यादाःअनंतागुणाःसाधुत्वादयःतैर्मंडिताःयुक्ताइतियावत् येपंडिताःशास्त्रज्ञाःतेष्वग्र्यःश्रेष्ठःअतिपंडितइत्यर्थः। पांडित्यमेवविवृणोति। पुनःकथंभूतःभुजंगपवीः भुजंगपःशेषनागःतस्यगावोवाण्यःमहाभाष्यरूपाःव्याख्यत्सदामहाभाष्याध्यापकइत्यर्थः। पुनःकथंभूतः श्रुतिवित्वेदविद्यामर्मज्ञः। पुनःकथंभूतः सुवृत्तःसमीचीनाचरणःयथाकालविहितश्रौतस्मार्तकर्मानुष्ठानशीलः। पुनःकथंभूतः साहित्यरीतिनिपुणः अलंकारज्ञानविषयेऽतिपंडितइत्यर्थः। पुनःकथंभूतः गणितागमज्ञःज्योतिःशास्त्रज्ञः। पुनःकथंभूतः विपुलगर्गकुलावतंसःविपुलंमहद्यद्गर्गकुलंगर्गर्षेर्वंशःतस्यावतंसःभूषणरूपः गर्गगोत्रोत्पन्नइत्यर्थः ॥ १ ॥ **अथपितृवर्णनमाह**—तदात्मजइति। तदात्मजश्चिंतामणिदैवज्ञस्यपुत्रःअनंतःअनंताख्यदैवज्ञःप्रसिद्धोस्तिपृथिव्याम्। अनंतगुणःअसंख्यगुणाश्रयीभूतः सकःअसंदिग्धंकामधेनुंकामधेनुसंज्ञंतिथ्यादिपंचांगसाधकंज्योतिःशास्त्रेप्रसिद्धंग्रंथंतस्मात्तदुक्तीःग्रंथेगणितव्याख्यानानिअधोक्षदुदोह कामधेनुसारिण्युपरियेनटीकाकृतेत्यर्थः। किमर्थं सत्तुष्टयेसतांगुणग्राहिणांदैवज्ञानांसंतोषार्थम्। तथाजातकपद्धतिंउत्पन्नबालकस्यतज्जन्मकाल

पद्मांबयाऽसावितत्तोविपश्चिच्छ्रीनीलकंठःश्रुतिशास्त्रनिष्ठः ॥ विद्वच्छिवप्रीतिकरंव्यधात्तंसंज्ञाविवेकंसहमावतंसम् ॥ ३ ॥ ॥ इति ताजिकनीलकंठ्यांसंज्ञातंत्रंसमाप्तम् ॥ १ ॥

मधिकृत्य शुभाशुभनिरूपकंशास्त्रंतदुपजीव्यगणितप्रतिपादिकाकृतिंन्यरूपयत् निरूपितवान् । ननुश्रीपत्यादिपद्धतीनांसत्त्वेनकथंतांकृतवानित्यपेक्षायामाह दुष्टमतमिति । दुष्टमतंयुक्तिविरुद्धंनिरस्यदूषणदानेनदूरीकृत्य ॥ २ ॥ **अथस्ववर्णनपूर्वकंसंज्ञातंत्रमाह**-पद्मांबयेति । ततोऽनंतदैवज्ञात् पद्मांबयापद्मानाम्नीयाअंबामातातयेत्यर्थः । श्रीनीलकंठःपांडित्यादिशोभायुतोनीलकंठरूपःपुत्रः असाविप्रसूतः । कथंभूतः विपश्चित्पंडितःश्रुतिशास्त्रनिष्ठःवेदशास्त्रसंपन्नः संज्ञाविवेकंसंज्ञाविचारंग्रंथंव्यदधात्कृतवान् । कथंभूतं सहमावतंसंसहमनिरूपकशास्त्रमवतंसःभूषणंयस्यतं । अत्रग्रंथेसहमविचारंसम्यङ्निरूपितवान् । पुनःकथंभूतं विद्वच्छिवप्रीतिकरंपंडिताशिवस्यप्रीतिदम् ॥ ३ ॥ इतिश्रीदिवाकरदैवज्ञात्मजविश्वनाथदैवज्ञविरचितेश्रीनीलकंठज्योतिर्वित्कृतसंज्ञातंत्रेसहमाध्यायस्यव्याख्योदाहृतिःसमाप्ता ॥ ॥ अकारिविश्वनाथेनसंज्ञातंत्रप्रकाशिका ॥ टीकाटीकाकृतिंकुर्यात्सज्जालज्जानुबंधनम् ॥ १ ॥ चंद्रबाणशरचंद्र १५५१ संमितेहायनेनयतिशालिवाहने ॥ मार्गशीर्षसितपंचमीतिथौविश्वनाथविदुषासमापितम् ॥ २ ॥ ॥ ७ ॥

॥ इति संज्ञातंत्रम् ॥

अथ वर्षतंत्रम् २।

स्वस्वाभिलाषंनहिलब्धुमीशानिर्विघ्नमीशानमुखाःसुरौघाः ॥
विनाप्रसादंकिलयस्यनौमितंढुंढिराजंमतिलाभहेतुम् ॥ १ ॥
जातकोदितदशाफलंचयत्स्थूलकालफलदंस्फुटंनृणाम् ॥
तत्रनस्फुरतिदैवविन्मतिस्तद्ब्रुवेऽब्दफलमादिताजिकात् ॥ २ ॥

श्रीगणेशायनमः ॥ यत्पादपद्मंसुरसिद्धदैत्याअभीष्टसिद्धचैप्रणमंतिनित्यं ॥ तं विघ्नराजंमनसास्मरामिभक्तप्रियंनागमुखंगणेशं ॥ १ ॥ गोदावरीतटेभातिगोलग्रामोऽतिसुंदरः ॥ तत्रावसन्पूर्वजामेसिद्धांतांबुजभानवः ॥ २ ॥ अनेकविद्याकुशलैर्द्विजेंद्रैःसंसेवितोभूमितलेप्रसिद्धः ॥ दिवाकरोदैवविदांवरिष्ठोवेदांतशास्त्राभिरुचिर्बभूव ॥ ३ ॥ तस्यात्मजाःपंचगुणैरुपेताजाताअमीषांप्रथमस्तुकृष्णः ॥ दैवज्ञवर्यःसकलागमज्ञोविश्वेशपादाब्जरतोनितांतं ॥ ४ ॥ तस्यानुजौख्यातशिरोमणीतौयौविष्णुमल्लार्यभितौपृथिव्याम् ॥ त्रिस्कंधपारंगमरंगमल्लौश्रीकेशवस्याग्रजनीप्रसिद्धौ ॥ ५ ॥ तस्यानुजोगणितविद्गणनाग्रगण्योमल्लारिसेवनसमुद्गतशास्त्रपण्यः ॥ सच्छास्त्रबुद्धिसुहृदांचमहाशरण्यःश्रीविश्वनाथगणकःसुतरांचकास्ति ॥ ६ ॥ आसीन्नाम्नानीलकंठोद्विजाग्र्योज्योतिःसिंधोःपारदृग्भाष्यवेत्ता ॥ तेनोद्दिष्टेवर्षतंत्रेकरोमिटीकांसम्यग्विश्वनाथोविविच्य ॥ ७ ॥ तत्रग्रंथारंभेप्रारिप्सितनिर्विघ्नसमाप्त्यर्थं**कृतंमंगलंशिष्यशिक्षार्थेनिबध्नाति** स्वस्वेति । अहंनीलकंठस्तंढुंढिराजंनौमिनमस्करोमि । कथंभूतं मतिलाभहेतुं मतिर्बुद्धिस्तस्यलाभःप्राप्तिस्तत्रहेतुंकारणम् तंकं यस्यढुंढिराजस्यप्रसादमनुग्रहंविनाईशानमुखाःसुरौघाईशानोमहादेवस्तदादयःसुरौघादेवसमूहाःनिर्विघ्नं यथास्यात्तथास्वस्वाभिलाषंस्वीयस्वीयमनोरथंलब्धुमीशाःसमर्थाःनहिनभवंति किलेतिनिश्चयेन । श्रुत्यादौश्रूयतेअतोगणेशस्तुतिरावश्यकी ॥ १ ॥ तत्रप्रथमंसप्रयोजनंतदारंभंप्रतिजानीते**—**जातकेति । तत्तस्मात्कारणात्अब्दफलंवर्षीयशुभाशुभफलंआदिताजिकात्प्रथमताजिकग्रंथात् जात्याभिप्रायेणै

Indira Gandhi National Centre for the Arts

गताःसमाःपादयुताःप्रकृतिघ्नसमागणात् ॥ खवेदाप्तघटीयुक्ताज न्मवारादिसंयुताः ॥३॥ अब्दप्रवेशेवारादिःसप्ततष्टेऽत्रनिर्दिशेत् ॥ शिवघ्नोऽब्दःस्वखाद्रींदुलवाढ्यःखाग्निशेषितः ॥ ४ ॥ जन्मति थ्यान्वितस्तत्रतिथावब्दप्रवेशनम् ॥तत्कालेऽर्कोजन्मकालरविणा स्याद्यतःसमः ॥ ५ ॥ एकैकराशिवृद्ध्याचेत्तुल्योंशाद्यैर्यदारविः ॥ तदामासप्रवेशोह्युप्रवेशश्चेत्कलासमः ॥ ६ ॥ तात्कालिकास्तुख चराःसुधियाविधेयाः स्पष्टाविलग्नमुखभावगणोविधेयः ॥ वीर्यं तथोक्तविधिनानिखिलग्रहाणामब्दाधिपस्यविधयेकथयामियुक्ति म् ॥ ७ ॥ द्विघ्नंप्रश्नांगभागाद्यंशरलब्धंस्फुटेंतिहा ॥ प्रश्नांगाद्धा यनफलेतुर्येशोलग्नपोभवेत् ॥ ८ ॥ जन्मलग्नपतिरब्दलग्नपोमुंथहा धिपइतित्रिराशिपः ॥ सूर्यराशिपतिरह्निचंद्रभाधीश्वरोनिशिविमृ श्यपंचकम् ॥ ९ ॥

कवचनं पूर्वताजिकग्रंथेभ्यइत्यर्थः । ब्रुवेवदामि । तस्मात्कस्मात् यतोयतो यस्मात्कारणात्जातकशास्त्रोक्तदशाशुभाशुभफलंनृणांमनुष्याणांस्थूलकालफल दंस्थूलकालेनवर्षाधिककालेनोत्सर्गतःफलंददातिइतिस्फुटम् । यतस्तत्रग्रहाणा मायुर्दायात्मकदशाःवर्षसमूहात्मकागणितेनागच्छंतितत्रतस्मिन्फलेदैवविन्मतिः दैवज्ञांबुद्धिः नस्फुरतिकस्मिन्समयेकिंफलंभवतिसूक्ष्मविचारेबुद्धिःस्फुटानभवति अतोवर्षमध्येफलज्ञानार्थमिदंवदामीत्यर्थः ॥ २ ॥ गताःसमाइत्यादिपंचश्लो काःसंज्ञातंत्रटीकायांव्याख्याताः ॥ ३ ॥ ४ ॥ ५ ॥ ६ ॥ ७ ॥ ८ ॥ अ थश्लोकत्रयेणप्रतिज्ञातंवर्षेश्वरनिर्णयमाह—जन्मेति बलीयइतिदृगादिसाम्यइ तिच। जन्मकालेयल्लग्नंतस्यस्वामी अब्दलग्नपःवर्षप्रवेशकालिकलग्नस्वामी मु थहाधिपःमुथहावक्ष्यमाणातस्याःस्वामीति एतदनंतरंत्रिराशिपःसंज्ञातंत्रोक्तत्रैरा शिकस्वामी ततः अह्निदिवसेवर्षप्रवेशेसतिसूर्यराशिपतिः सूर्याधिष्ठितराशिस्वा मी निशिरात्रौवर्षप्रवेशेसतिचंद्रभाधीश्वरःचंद्राक्रांतराशिस्वामी इदंपंचकंविमृश्य

बलीयएषांतनुमीक्षमाणःसवर्षपोलग्नमनीक्षमाणः ॥ नैवाब्दपोदृष्ट्यतिरेकतःस्याद्बलस्यसाम्येविदुरेवमाद्याः ॥ १० ॥ दृगादिसाम्येप्यथनिर्बलत्वेवर्षाधिपःस्यान्मुथहेश्वरस्तु ॥ पंचापिनोचेत्तनुमीक्षमाणावीर्याधिकोऽब्दस्यविभुर्विचिंत्यः ॥ ११ ॥ बलादिसाम्येरविराशिपोऽह्निनिशींदुराशीडितिकेचिदाहुः ॥ येनेत्थशालोऽब्दविभुःशशीसवर्षाधिपश्चंद्रभपोऽन्यथात्वे ॥ १२ ॥

विचार्यएषांपंचानांमध्येयएकतरस्तनुंपश्यतिवर्षप्रवेशकाललग्नंईक्षमाणःपश्यन्बलीपंचवर्गीबलाधिकःसग्रहःपंचान्यतमःवर्षस्वामी । वर्षलग्नमनीक्षमाणः अपश्यन्बलाधिकोपिनैववर्षेश्वरः । बलस्यतुल्यत्वेदृष्ट्यतिरेकतः दृष्ट्याधिक्यादब्दपोभवति । एवमित्याद्याःपुरातनाःआचार्याःविदुःआहुः ॥ १ ॥ १० ॥ दृगादिसाम्येदृष्टिसाम्येआदिपदाद्बलसाम्येपिअनयोःसमतायां अथवानिर्बलत्वेपंचानांलग्नदर्शित्वेपिपंचविंशोपकोनपंचवर्गीबलवत्तायां उभयत्रमुथहास्वाम्येववर्षेश्वरो भवति । चेद्यदिपंचाधिकारिणोग्रहाअपिवर्षलग्नेक्षमाणाःपश्यंतोनभवंतितदेषांमध्येयोबलाधिकःसएववर्षस्यविभुःस्वामीविचारणीयः । बलयोःसाम्येमुथहेश्वरएवेतिज्ञेयम् ॥ ११ ॥ **अथमतांतरंचंद्रस्यवर्षेश्वरत्वसंभावनायांविशेषंचाह**–बलेति। पंचाधिकारिग्रहान्यतमयोर्बलदृष्ट्योःसमतायांअह्निदिवसेवर्षप्रवेशेसतिसूर्याक्रांतराशिस्वामी अंतिमाधिकारीग्रहोवर्षस्यस्वामी निशिरात्रौवर्षप्रवेशेसतिइंदुराशीट्चंद्राक्रांतराशिस्वामी अंतिमाधिकारीग्रहोवर्षस्यस्वामीभवतीत्येवंकेचिदाचार्याआहुः । पूर्वोक्तप्रकारावगतोवर्षस्वामीचंद्रोयेनग्रहेणसहान्यतमेइत्थशालीमुथशिलकारीसग्रहोवर्षस्वामी अनेकग्रहमुथशिलकारीचेत्तदातद्ग्रहाणांमध्येयोबलाधिकः बलसाम्येमुथहेश्वरइतिसुधियोह्यम् । **चंद्रस्यमुथशिलाभावेनिर्णयमाह**–चंद्रभपइति । अन्यथात्वेचंद्रस्यमुथशिलाभावेसति चंद्राक्रांतराशिस्वामीवर्षेश्वरोभवति । अनेनप्रकारेणकर्कस्थेचंद्रमसिचंद्रएकवर्षेश्वरो नान्यइतिज्ञेयम् ॥ १२ ॥

अब्दाधिपोव्ययषडष्टमभिन्नसंस्थोलब्धोदयोऽब्दजनुषोः सदृशोबलेन ॥ निःशेषमुत्तमफलंविदधातिकार्येनैरुज्यराज्यबललब्धिरतीवसौख्यम् ॥ १३॥ बलपूर्णेऽब्दपेपूर्णशुभंमध्येचमध्यमम् ॥ अधमेदुःखशोकारिभयानिविविधाःशुचः ॥ १४ ॥ ॥ अथसूर्यः ॥ ॥ सूर्येऽब्दपेबलिनिराज्यसुखात्मजार्थलाभःकुलोचितविभुःपरिवारसौख्यम् ॥ पुष्टंयशोगृहसुखंविविधाप्रतिष्ठाशत्रुर्विनश्यतिफलेजनिखेटयुक्त्या ॥ १५ ॥

अथवर्षेश्वरस्थितिवशेनफलमाह–अब्दाधिपइति । अब्दाधिपोवर्षस्वामीग्रहः व्ययषडष्टमभिन्नस्थः द्वादशषष्ठाष्टमस्थानव्यतिरिक्तस्थानस्थितः । यद्यपिलग्नदर्शित्वेनवर्षस्वाम्युक्तेवर्षस्वामीषष्ठाष्टमद्वादशस्थानेष्वनवस्थितएवेतिवक्तुमनुचितंतदतिरिक्तस्थानस्थइति।तथापिपंचापिचेन्नोतनुमीक्षमाणाइत्यादिप्रकारेषष्ठाष्टमद्वादशस्थानस्थितस्यापिवर्षेश्वरत्वसंभवःराशिकुंडल्यांदृष्टिसद्भावेनतत्रलग्नद्रष्टुर्वर्षेश्वरस्यभावकुंडल्यांतत्स्थानस्थितत्वसंभावनायाब्रह्मणोप्यनिवार्यत्वाच्चलब्धोदयःवर्षप्रवेशकालेप्राप्तोदयोस्तंगतइत्यर्थः । अब्दजनुषोःवर्षजन्मकालयोःबलेनपंचवर्गीबलेनसदृशस्तुल्यःअहीनबलइत्यर्थः । एतादृशोवर्षेश्वरोनिःशेषंसमग्रंउत्तमफलंकरोतितदेवाह कार्येत्यादिस्पष्टम् ॥१३॥ **अथवर्षेश्वरफलंपंचवर्गीबलानुरोधाद्भवतीत्याह**–बलेति ।वर्षस्वामिनिबलेनपंचवर्गीबलेनपूर्णेसतिशुभफलंपूर्णंभवति मध्यबलेशुभेमध्यंभवति।अधमेहीनबलेदुःखरोगादीत्यादिस्पष्टम् ॥ १४ ॥ **अथवर्षेश्वरस्यसूर्यबलपूर्णतायांफलमाह**–सूर्येऽब्दपइति। विनश्यतीत्यंतंस्पष्टंफलम् इदमुक्तंफलंजनिखेटयुक्त्याजन्मकालग्रहविचारेणवाच्यम् । एतदुक्तंभवति वर्षेश्वरग्रहोजन्मकालेउत्तमंबलंश्चेदत्राप्युत्तमबलस्तदोत्तमोत्तमम् मध्यबलश्चेदुत्तमम् अधमबलश्चेन्मध्यमम् । जन्मकालेमध्यमबलश्चेत्क्रमेणोत्तममध्यमाधमंचभवति । जन्मकालेहीनबलश्चेत्क्रमेणमध्यमाधमाधमानिभवंति ॥ १५ ॥

Indira Gandhi National Centre for the Arts

मध्येरवौफलमिदंनिखिलंतुमध्यंस्वल्पंसुखंस्वजनतोपिविवादमाहुः ॥ स्थानच्युतिर्नचसुखंकृशताशरीरेभीतिर्नृपान्मुथशिलोनशुभेनचेत्स्यात् ॥ १६ ॥ सूर्येबलेनरहितेऽब्दपतौविदेशयानंधनक्षयशुचोऽरिभयंचतंद्रा ॥ लोकापवादभयमुग्ररुजोतिदुःखंपित्रादितोपिनसुखंसुतमित्रभीतिः ॥ १७ ॥ चंद्रेऽब्दपेमुथशिलंयेनासावब्दपोऽस्यचेत् ॥ कंबूलमिंदुनाजन्मनिशिवर्षंतदोत्तमम् ॥१८॥ अथचंद्रः॥ ॥ वीर्यान्वितेशशिनिवित्तकलत्रपुत्रमित्रालयस्यविविधंसुखमाहुरार्याः ॥ स्रग्गंधमौक्तिकदुकूलसुखानिभूतिर्लाभःकुलोचितपदस्यनृपैःसखित्वम् ॥ १९ ॥ वर्षाधिपेशशिनिमध्यबलेफलानिमध्यान्यमूनिरिपुतासुतमित्रवर्गैः ॥ स्थानांतरेगतिरथोकृशताशरीरेश्लेष्मोद्भवश्चयदिपापकृतेसराफः ॥ २० ॥ नष्टेऽब्दपेशशिनिशीतकफादिरोगश्चौर्यादिभीःस्वजनविग्रहमप्युशंति ॥ दूरेगतिःसुतकलत्रसुखाप्तयश्चस्यान्मृत्युतुल्यमतिहीनबलेशशांके ॥ २१ ॥

अथवर्षेश्वरार्कस्यमध्यबलत्वेफलमाह—मध्यइति। इदंउत्तमबलसंबंधियत्फलंप्रागुक्तंतत्समग्रंमध्यमंभवति। स्वल्पमित्यादिनृपादित्यंतंस्पष्टम् अनिष्टफलंतदास्याद्यदाशुभेनग्रहेणवर्षेश्वरस्यमुथशिलोनस्यादर्थाच्छुभग्रहमुथशिलंअनिष्टंस्यादित्यपवादउक्तः ॥ १६ ॥ हीनबलार्कस्यफलमाह—सूर्यइति। स्पष्टम् ॥ १७ ॥ अथयेनेत्थशालोऽब्दविभुरितिदार्ढ्यार्थंपुनर्वदंस्तद्वर्षेश्वरस्यकंबूलयोगे रात्रिजन्मनोवर्षमुत्तमंतदित्याह—चंद्रेति। चंद्रेऽब्दपेसतियेनग्रहेणचंद्रोमुथशिलःअसौवर्षेश्वरः अस्यवर्षेश्वरस्यचंद्रेणकंबूलचंद्रातिरिक्तग्रहेणमुथशिलमित्यर्थः। रात्रौजन्मतदावर्षमुत्तमंज्ञेयमित्यर्थः ॥ १८ ॥ अथचंद्रस्यपूर्णबलस्यफलमाह—वीर्यान्वितइति।स्पष्टम् ॥१९॥ अथचंद्रस्यमध्यबलस्यफलमाह—वर्षाधिपइत्यादिनाश्लेष्मोद्भवश्चेत्यंतंस्पष्टम् । यदिपापग्रहेणेसराफयोगश्चंद्रस्यस्यात्तदाश्लेष्मोत्पत्तिः ॥२०॥ अथनष्टातिहीनबलस्यचंद्रस्यफलमाह—नष्ट

Indira Gandhi National Centre for the Arts

अथभौमः ॥ ॥ भौमेऽब्दपेबलिनिकीर्तिजयारिनाशःसेनापतित्वर
णनायकताप्रदिष्टा ॥ लाभःकुलोचितधनस्यनमस्यताचलोकेषुमि
त्रसुतवित्तकलत्रसौख्यम् ॥ २२ ॥ मध्येऽब्दपेऽवनिसुतेरुधिरस्रु
तिश्चकोपोऽधिकोझकटशस्त्रहतिक्षतानि ॥ स्वामित्वमात्मगण
तोबलगौरवंचमध्यंसुखंनिखिलमुक्तफलंविचिंत्यम् ॥ २३ ॥ हीने
ऽब्दपेसृजिभयंरिपुतस्कराग्निलोकापवादभयमात्मधियाविनाशः॥
कार्यस्यविघ्नमतिरोगभयंविदेशयानंक्षयोऽपनयतोगुरुदृष्टयभावे
॥ २४ ॥ अथबुधः ॥ ॥ सौम्येऽब्दपेबलवतिप्रतिवादलेख्यसच्छा
स्त्रसद्व्यवहृतौविजयोऽर्थलाभः ॥ ज्ञानंकलागणितवैद्यभवंगुरुत्वं
राजाश्रयेणनृपतानृपमंत्रितावा ॥ २५ ॥ अब्दाधिपेशशिसुतेख
लुमध्यवीर्येस्यान्मध्यमंनिखिलमेतदथाध्वयानम् ॥ वाणिज्यवर्त
नमथात्मजमित्रसौख्यंसौम्येत्थशालवशतोपरथानसम्यक् ॥ २६॥
सौम्येऽब्दपेऽधमबलेबलबुद्धिहानिर्धर्मक्षयःपरिभवोनिजवाक्यदो
षात् ॥ निक्षेपतोविपदतीवमृषैवसाक्ष्यंहानिःपरव्यवहृतेःसुतवि
त्तमित्रैः ॥ २७ ॥

इति । नष्टेसूर्याक्रांतत्वेनास्तंगते । उत्तरार्धेहीनबलस्यफलम् ॥ २१ ॥
अथभौमस्यबलपूर्णस्यफलमाह—भौमइति । स्पष्टम् ॥ २२ ॥ **अथभौम
स्यमध्यबलस्यफलमाह**—मध्यइति । स्पष्टम् ॥ २३ ॥ **अथभौमस्यहीन
बलस्यफलमाह**—हीनइति । असृजिभौमेवर्षेशेहीनबलेसातिभयमित्यादिविदे
शयानमित्यंतंस्पष्टम् । गुरुदृष्टिहीनेभौमेसति अपनयतअनीतितःक्षयोनाशः
॥ २४ ॥ **अथोत्तमबलिनोबुधस्यफलमाह**—सौम्यइति । स्फुटार्थम् ॥ २५ ॥
अथमध्यबलस्यबुधस्यफलमाह—अब्दाधिपइति । एतत्प्रागुक्तंसर्वंमध्यमंस्या
त् । शुभग्रहमुथशिलानुरोधतःआत्मजमित्रयोःसुखंभवति । अपरथाअशुभ
ग्रहेसराफेनतयोः सम्यक्शुभंनस्यात् ॥ २६ ॥ **अथहीनबलस्यबुधस्य
फलमाह**—सौम्यइति । स्पष्टार्थम् ॥ २७ ॥

Indira Gandhi National Centre for the Arts

अथगुरुः॥ ॥ जीवेऽब्दपेबलयुतेपरिवारसौख्यंधर्मोगुणग्रहिलताध नकीर्तिपुत्राः ॥ विख्यात्यताजगतिसन्मतिविक्रमाप्तिर्लाभोनिधेर्नृ पतिगौरवमप्यरिघ्नम् ॥ २८ ॥ अब्दाधिपेसुरगुरौकिलमध्यवीर्ये स्यान्मध्यमंफलमिदंनृपसंगमश्च ॥ विज्ञानशास्त्रपरताप्यशुभेस राफेदारिद्यमर्थविलयश्चकलत्रपीडा ॥ २९ ॥ जीवेऽब्दपेऽधमब लेधनधर्मसौख्यहानिस्त्यजंतिसुतमित्रजनाःसभार्याः ॥ लोकाप वादभयमाकुलतातिकष्टंवृत्तिस्तनौकफरुजोरिपुभीःकलिश्च॥३०॥ अथशुक्रः ॥ ॥ शुक्रेऽब्दपेबलिनिनीरुजताविलाससच्छास्त्ररत्नमधु राशनभोगतोषाः ॥ क्षेमप्रतापविजयावनिताविलासोहास्यंनृपाश्र यवशेनधनंसुखंच ॥ ३१ ॥ अब्दाधिपेभृगुसुतेखलुमध्यवीर्येस्या न्मध्यमंनिखिलमेतदथाल्पवृत्तिः ॥ गुप्तंचदुःखमखिलंसुनिबद्ध वृत्तिःपापारिवीक्षितयुतेविपदोऽर्थनाशः ॥ ३२ ॥ शुक्रेऽब्दपेधम बलेमनसोऽतितापोलोकापहासविपदोनिजवृत्तिनाशः ॥ द्वेषःकल त्रसुतमित्रजनेषुकष्टादन्नाशनंचविफलंक्रियतानसौख्यम् ॥ ३३ ॥

अथगुरोरुत्तमबलिनोवर्षेश्वरस्यफलमाह—जीवइति । स्पष्टम् ॥ २८ ॥ **म ध्यबलिनस्तस्यफलमाह**—अब्दाधिपइति । इदंप्रागुक्तंफलंमध्यमं अशुभग्रहे णेसराफेसतिदारिद्यमित्यादिश्लोकांतंफलं शेषंस्पष्टम् ॥ २९ ॥ **हीनस्यतस्य फलमाह**—जीवइति । स्पष्टम् ॥ ३० ॥ **अथशुक्रस्योत्तमबलिनोवर्षेशस्य फलमाह**—शुक्रइति । स्पष्टम् ॥ ३१ ॥ **मध्यबलस्यतस्यफलमाह**—अब्दा धिपइति । पापग्रहःयश्चशत्रुस्ताभ्यांदृष्टेयुतेवाशुक्रेविपदोर्थनाशइति । अत्रवीक्षि तयुतइत्युक्त्याराशिकुंडल्यांदृष्टिर्विलोक्या भावकुंडल्यांसंयुक्तत्वंद्रष्टव्यमितिस्प ष्टीकृतम् अन्यथाताजिकशास्त्रेप्रथमस्थानेदृष्टयुक्तेर्वीक्षितइत्यनेनयुतिसिद्धौयुत इत्यस्यवैयर्थ्यापत्तेः शेषंस्पष्टम् ॥ ३२ ॥ **अथहीनबलस्यतस्यफलमाह**— शुक्रइति । स्पष्टम् ॥ ३३ ॥

॥ अथशनिः ॥ मंदेऽब्दपेबलिनिनूतनभूमिवेश्मक्षेत्राप्तिरर्थनिचयो यवनावनीशात् ॥ आराम निर्मितिजलाशयसौख्यमंगपुष्टिःकुलो चितपदाप्तिगुणाग्रणित्वम् ॥ ३४ ॥ अब्दाधिपेरविसुतेखलुमध्य वीर्येस्यान्मध्यमंनिखिलमन्नभुजिस्तुकष्टात् ॥ दासोष्ट्रमाहिषकु लान्यरतस्तुलाभःपापंफलंभवतिपापयुगीक्षणेन ॥ ३५ ॥ मंदेब लेनरहितेऽब्दपतौक्रियाणांवंध्यत्वमर्थविलयोविपदोरिभीतिः ॥ स्त्रीपुत्रमित्रजनवैरकदन्नभुक्तंसौम्येत्थशालयुजिसौख्यमपीषदाहुः ॥ ३६ ॥ वर्षेश्वरोभवतियःसदशाधिपोऽब्देज्ञेयोखिलेब्दजनुषोर्ब लमस्यचिंत्यम् ॥ वीर्यान्वितेऽत्रनिखिलंशुभमब्दमाहुर्हीनेत्वनिष्ट फलतासमतासमत्वे ॥ ३७॥ येनेत्थशालोऽब्दपतेर्ग्रहोऽसौस्वीय स्वभावात्सुफलंददाति ॥ शुभेसराफेशुभमस्तिकिंचिदनिष्टमेवाशु भमूसरीफे ॥ ३८ ॥

अथोत्तमबलिनःशनेर्वर्षेशस्यफलमाह—मंदइति । स्पष्टम् ॥ ३४ ॥ मध्य मबलिनस्तस्यफलमाह—अब्दाधिपइति । पापग्रहयोगेनदृष्ट्यावापापंफलंदुष्टं फलंस्यात् योगोभावकुंडल्याद्रष्टव्यइत्याग्रहार्थयुक्तिः शेषंस्पष्टम् ॥ ३५ ॥ हीन बलिनःशनेर्वर्षेशस्यफलमाह—मंदइति । सौम्येत्थशालयुजिशुभग्रहमुथशि लेशुभग्रहयोगेवाईषत्किंचिद्वर्षेसौख्यमपिभवति शेषंस्पष्टम् ॥ ३६ ॥ वर्षेश्व रइति । योग्रहोवर्षेश्वरोभवति सग्रहःसंपूर्णवर्षदशाधिपोज्ञेयः तद्वर्षंसंपूर्णंतस्यद शेत्यर्थः । अस्यवर्षेशस्यवर्षजन्मकालयोःबलंपंचवर्गीबलंचिंत्यंविचार्यम् उत्त ममध्यमाधमादिभेदेनवीर्यान्वितेउभयत्रबलिष्ठेसतिवर्षेशुभफलत्वंसमत्वेजन्मनि वीर्यान्वितेवर्षेमध्यबलेहीनबलेवाजन्मनिमध्यबलेहीनबलेवा वर्षेवीर्यान्विते जन्मनिमध्यबलेवर्षेहीनबलइत्यादौतारतम्येउत्तमाधमपक्षफलापेक्षयावर्षेमध्यफ लदाता ॥ ३७ ॥ येनेति । वर्षेश्वरस्ययेनग्रहेणमुथशिलः असौमुथशिलकारी ग्रहःस्वीयस्वभावात्आत्मीयप्रागुक्तसंज्ञातंत्रोक्तस्वरूपवशातःसुफलंशुभफलंददा ति शुभग्रहकृतेसराफेसतिवर्षेकिंचित्सुखंवर्तते अशुभग्रहकृतेसराफेसतिअनिष्ट

हृद्दैयादृशियःखेटआधत्तेऽत्रचयोमहः ॥ जन्मन्यब्देचतादृक्चेत्तदा त्मफलदस्त्वसौ ॥ ३९ ॥ योजन्मनिफलंदातुंविभुर्मूसरिफोस्यचे व् ॥ अब्दलग्नाब्दपभवस्तस्मिन्नब्देनतत्फलम् ॥ ४० ॥ व्य त्यासेफलमादेश्यमित्थशालेविशेषतः ॥ नोभयंचेत्तदाप्यस्तिज न्माश्रयमितिस्फुटम् ॥ ४१ ॥ ॥ उदाहरणम् ॥ पुत्राधिपोजन्म निपुत्रभावंपश्यन्सुतंदातुमसौसमर्थः ॥ वर्षेशपुत्राधिपमूसरीफेपु त्रस्यनाशोभवतीतिवर्षे ॥ ४२ ॥

मेवअशुभफलमेवभवति ॥ ३८ ॥ हृद्दइति यःवर्षस्वामीग्रहः यादृशिमित्रश त्रुग्रहसंबंधिनिहद्देहद्दांशेभवति अत्रअस्मिन्मित्रशत्रुग्रहेअत्रवर्षेश्वरइतिकेचित योग्रहः चकारान्मित्रशत्रुदृशामहःउक्तांशरूपंतेजःआधत्तेधारयतिमुथशिलका रीभवति। जन्मकालेवर्षप्रवेशकालेपितादृगुक्तप्रकारसदृशः असौवर्षग्रहस्तदातदा नीमात्मफलदःशुभाशुभफलदातास्यात् ॥ ३९ ॥ यइतिव्यत्यासइतिच जन्म नियोग्रहःस्वभावजंदातुंकर्तुंविभुःसमर्थःस्वभावंपश्यन्नधिष्ठितोवा अस्यग्रहस्य यदिअब्दलग्नाब्दपभवःवर्षलग्नस्वामीवर्षस्वामिनोरुत्पन्नःमुसरिफःईसराफयोगः स्याच्चर्हितस्मिन्वर्षेतत्फलंजन्मकालीनभावोत्पन्नफलंन तत्फलनाशोभवतीत्य र्थः । व्यत्यासेईसराफाभावेफलंजन्मकालिकंभावजंफलंआदेश्यंकथनीयम् । इत्थशालेमुथशिलेसतिविशेषतःअत्यंततत्फलंस्यात उभयमीसराफमुथशिलौन स्यातांयदितदापिजन्माश्रयंजन्मकालीनभावजंफलमस्तिभवतिइतिस्फुटम्।बाध काभावात्तत्फलंकेननिवारणीयमित्यर्थः । यद्यपिव्यत्यासेफलमादेश्यमित्यनेनपौ नरुक्त्यंतथापितत्स्पष्टत्वार्थमिदमुक्तं अन्यथोक्तत्रिष्वेकतमवैयर्थ्यापत्तेः । वस्तु तस्तुग्रंथकृतोऽत्रप्रमादः ॥४०॥४१॥ प्रथमश्लोकस्फुटार्थबोधायोदाहरति पु त्राधिपइति । जन्मकालेपुत्राधिपःपंचमभावस्वामीपुत्रभावंपंचमभावंपश्यन्न सौपुत्रस्वामीग्रहःपुत्रफलंदातुंसमर्थःशक्तः । सःफलदाताग्रहःवर्षेयत्रकुत्रा प्यवस्थितोवर्षेशेनेसराफीअतःइहास्मिन्वर्षेपुत्रस्यनाशोभवति । एवमन्यभावेपि

अब्देश्वरोगुरुर्मित्रहद्देमित्रदृशाशशी ॥ महोत्राधादमूदृक्सवर्षेऽब्दस्तेनशोभनः ॥ ४३ ॥ एवमुन्नेयमन्यच्चशुभाशुभफलंबुधैः ॥ बलाबलविवेकेनयोगत्रयविमर्शतः ॥ ४४ ॥ ॥ इत्यब्दपफलाध्यायः ॥ ॥ अथमुथहानिरूपणम् ॥ ॥ स्वजन्मलग्नात्प्रतिवर्षमेकैकराशिभोगान्मुथहाभ्रमेण ॥ स्वजन्मलग्नंरवितष्टयातशरद्युतंसाभमुखेन्थिहास्यात् ॥ ४५ ॥ प्रत्यहंशरलिप्ताभिर्वर्धतेसानुपाततः ॥ सार्धमंशद्वयंमासेइत्याहुःकेपिसूरयः ॥ ४६ ॥ स्वामिसौम्येक्षणात्सौख्यंक्षुतदृष्ट्याभयंरुजः ॥ भावालोकनसंयोगात्फलमस्यानिरूप्यते ॥ ४७ ॥

वर्षलग्नेशेसराफेनाप्युदाहार्यम् ॥ ४२ ॥ हद्देयादृशीत्यादिसोदाहरणंस्पष्टयति अब्देश्वरइति । वर्षेश्वरोबृहस्पतिः जन्मनिस्वमित्रस्यहद्दांशेतस्मिन् मित्रदृष्ट्या चंद्रःमहःउक्तंतेजःअधात्धारयति मुथशिलकारीत्यर्थः । वर्षेअमूदृक्अमुंगुरुंपश्यतिअसौअमूदृक् । अयमर्थः स्वमित्रादिहद्दास्थितेगुरौयदिचंद्रोमुथशिलद्वारामहःधारयति सवर्षेश्वरस्तेनकारणेनअब्दःवर्षकालःशुभः । केचित्तु अब्देश्वरइतितुयोगांतरं अमूदृक्षइत्यस्यार्थस्तुअमुंचंद्रंपश्यतीतितन्न उदाहरणप्रकरणपठितत्वेनयोगांतरासंभवात् मूलवाक्याभावाच्च ॥ ४३ ॥ उपसंहरति एवमिति । अनयोक्तरीत्याअन्यत् शुभाशुभफलंबलाबलविवेचनेनयोगत्रयविमर्शतः । मुथशिलकंबुलेसराफेतियोगत्रयाणांविचारेणबुधैर्ज्ञेयम् ॥ ४४ ॥ ॥ इतिदिवाकरविरचितायांवर्षफलाध्यायः ॥ ॥७॥ ॥ **अथमुथहाफलार्थंमुथहानयनमाह**–स्वजन्मलग्नादिति संज्ञातंत्रव्याख्यायांस्पष्टम् ॥ ४५ ॥ अस्याउपपत्त्याग्रहवद्गतिरस्तीत्याह प्रत्यहमिति । प्रतिसौरदिनंसामुंथाअनुपाततःषष्ट्यधिकशतत्रयसौरांशैरेकराशिकलास्तदैकसौरादिनेनैकाइत्यनुपातात्पंचकलाभिर्वर्धते । अनयारीत्यासौरमासेसार्द्धांशद्वयंवर्धतेच इत्येवंकेपिपंडिताःवदंति स्वमतेपूर्वग्रंथमध्येमुंथाचलनानुक्तेर्वर्षांतेएवाग्रिमराशावुड्डीयगच्छतीतियावद्वचनांहिवाचनिकमितिन्यायात्तत्त्वमंगीकृतम॥४६॥ स्वामिसौम्येति । स्वामिशुभग्रहदर्शनात्सुखं क्षुतदृष्ट्यारुजःभयं अस्यामुथहायाःफलंभावालोकनसं

वर्षलग्नात्सुखास्तांत्यरिपुरंध्रेष्वशोभना ॥ पुण्यकर्मायगास्वाम्यं दत्तेऽन्यत्रोद्यमाद्धनम् ॥ ४८ ॥ शत्रुक्षयंमानसुताश्वलाभंप्रतापवृद्धिर्नृपतेःप्रसादम्॥ शरीरपुष्टिंविविधोद्यमाश्वददातिवित्तंमुथहातनुस्था ॥ ४९ ॥ उत्साहतोऽर्थागमनंयशश्चस्वबंधुसन्माननृपाश्रयाश्च ॥ मिष्टान्नभोगोबलपुष्टिसौख्यंस्यादर्थभावेमुथहायदाऽब्दे ॥ ५० ॥ पराक्रमाद्वित्तयशःसुखानिसौंदर्यसौख्यंद्विजदेवपूजा ॥ सर्वोपकारस्तनुपुष्टिकीर्तिर्नृपाश्रयश्चेन्मुथहातृतीया ॥ ५१ ॥ शरीरपीडारिपुभीःस्ववर्ग्यवैरंमनस्तापनिरुद्यमत्वे ॥ स्यान्मुंथहायांसुखभावगायांजनापवादामयवृद्धिदुःखम् ॥ ५२ ॥ यदींथिहापंचमगाब्दवेशेसद्बुद्धिसौख्यात्मजवित्तलाभः ॥ प्रतापवृद्धिर्विविधाविलासादेवद्विजार्चान्नृपतेःप्रसादः ॥ ५३ ॥ कृशत्वमंगेषुरिपूदयश्चभयंरुजस्तस्करतोन्नृपाद्वा ॥ कार्यार्थनाशोमुथहारिगाचेद्दुर्बुद्धिवृद्धिःस्वकृतोनुतापः ॥ ५४ ॥ कलत्रबंधुव्यसनारिभीतिरुत्साहभंगोधनधर्मनाशः ॥ द्यूनोपगाचेन्मुथहातनोःस्याद्रुजामनोमोहविरुद्धचेष्टा ॥ ५५ ॥ भयंरिपोस्तस्करतोविनाशोधर्मार्थयोर्दुर्व्यसनामयश्च ॥ मृत्युस्थिताचेन्मुथहानराणांबलक्षयःस्याद्गमनंसुदूरे ॥ ५६ ॥ स्वामित्वमर्थोपगमोन्नृपेभ्योधर्मोत्सवःपुत्रकलत्रसौख्यम्॥ देवद्विजार्चापरमंयशश्चभाग्योदयोभाग्यगतेंथिहायाम् ॥ ५७ ॥ नृपप्रसादंस्वजनोपकारंसत्कर्मसिद्धिंद्विजदेवभक्तिम्॥ यशोऽभिवृद्धिंविविधार्थलाभंदत्तेंऽबरस्थामुथहापदाप्तिम्॥ ५८ ॥ यदींथिहालाभगताविलाससौभाग्यनैरुज्यमनःप्रसादाः ॥ भवंतिराजाश्रयतोधनानिसन्मित्रपुत्राभिमताप्तयश्च ॥५९॥

योगान्निरूप्यते ॥ ४७ ॥ वर्षलग्नादितिस्पष्टम् ॥ ४८ ॥ शत्रुक्षयमित्यादि मुंथाभावफलश्लोकाः द्वादशस्पष्टाः ॥ ४९ ॥ ५० ॥ ५१ ॥ ५२ ॥ ५३ ॥ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ ५८ ॥ ५९ ॥

व्ययोऽधिकोदुष्टजनैश्चसंगोरुजातनौविक्रमतोप्यसिद्धिः ॥ धर्मार्थहानिर्मुथहाव्ययस्थायदातदास्याज्जनतोपिवैरम् ॥ ६० ॥ क्रूरैर्दृष्टःक्षुतदृशांयोभावोमुथहाऽत्रचेत् ॥ शुभंतद्भावजंनश्येदशुभंचापिवर्धते ॥ ६१ ॥ ॥ इतिमुंथाभावफलम् ॥ शुभस्वामियुक्तेक्षितावीर्येयुक्सेंथिहास्वामिसौम्येत्थशालंप्रपन्ना ॥ शुभंभावजंपोषयेन्नाशुभंसाऽन्यथात्वेऽन्यथाभावऊह्योविमृश्य ॥ ६२ ॥ जनुर्लग्नतोस्तांत्यषण्मृत्युबंधुस्थिताब्देहताक्रूरखेटैस्तुसाचेत् ॥ विनश्येत्सयत्रेन्थिहाभावएवंशुभस्वामिदृष्टौननाशःशुभंच ॥ ६३ ॥ यदोभयत्रापिहताभावोनश्येत्ससर्वथा ॥ उभयत्रशुभत्वेतुभावोऽसौवर्धतेतराम् ॥ ६४ ॥

॥ ६० ॥ क्रूरैरिति क्षुतदृशाअशुभदृष्टयापापग्रहैर्दृष्टोयस्तन्वादिर्भावः । अत्रअस्मिन्भावेयदिमुथहाभवति । तदातद्भावगंमुथहाधिष्ठितभावस्थितंशुभफलंनश्येत् । तद्भावसंबंध्यशुभफलंचवर्धते ॥ ६१ ॥ अस्याःफलमाह—शुभमिति । सावीर्ययुक्तामुंथाभावजंस्वाधिष्ठितभावसंबंधिशुभफलंपोषयेत्वर्धयेत् । अशुभफलंतद्भावसंबंधिनवर्धयेत् अन्यथात्वेशुभस्वामियुक्तानभवतिस्वामिसौम्येत्थशालंप्रपन्नाचनभवति । पापदृष्टापापमुथशिलाचभवति तस्यामित्यर्थः । अन्यथाभावःस्वभावसंबंध्यशुभफलंवर्धयेत् शुभफलंतत्संबंधिनवर्धयेदितिविपरीतभावइत्यर्थः । शुभाशुभदृष्टाशुभाशुभमुथशिलाचतदाविमृश्यशुभाशुभग्रहबलवशाद्विचार्यशुभमशुभंवाज्ञेयमित्यर्थः ॥ ६२ ॥ जनुर्लग्नतइति जन्मलग्नात्सप्तमद्वादशषष्ठाष्टमचतुर्थस्थानस्थितामुंथावर्षेसामुथाचेत्पापग्रहैर्हतायुक्ता तदावर्षेयस्मिन्भावेमुंथासभावःविनश्येत् । एवमुक्तरूपत्वेशुभग्रहस्वामिदृष्टौसत्यांतस्यभावस्यनाशोनभवति शुभंचभवति ॥ ६३ ॥ यदेति । यदाउभयत्रजन्मनिवर्षेचअनिष्टस्थानस्थाहतापापग्रहयुक्ता तदासमुंथायुक्तोभावःसर्वथाअवश्यंनश्येत् । उभयत्रजन्मनिवर्षेचशुभत्वेशुभग्रहयुक्तत्वेअसौमुंथायुक्तोभावः

वर्षेप्यनिष्टगेहस्थायद्भावेजनुषिस्थिता ॥ क्रूरोपघातात्तंभावंनाश
येच्छुभयुक्शुभा ॥ ६५ ॥ जनुर्लग्नतस्तुर्यगासौम्ययुक्ताब्दवेशेपै
तृकस्यलाभंविधत्ते॥ नृपाद्भीतिदापापयुक्तातिकष्टाष्टमादावपीत्थं
विमर्शोविधेयः ॥ ६६ ॥ यस्मिन्भावेस्वामिसौम्येक्षिताचेद्भावोज
न्मन्येषयस्तस्यवृद्धिः॥ एवंपापैर्नाशउक्तस्तुतस्येत्यूह्यंवीर्याद्वर्षपः
सौख्यमेव॥ ६७॥ यदींथिहासूर्यग्रहेयुतावासूर्येणराज्यंनृपसंगमं
च ॥ दत्तेगुणानांपरमामवाप्तिंस्थानांतरस्येतिफलंदशोपि ॥६८॥

वर्धतेतरांसुतरामतिशयेनवर्धते ॥ ६४ ॥ वर्षइति वर्षेलग्नकुंडल्यांअनिष्टस्थान स्थाच्चतुर्थषष्ठसप्तमाष्टमद्वादशस्थिता अपिशब्दाज्जन्मलग्नादिषुस्थानेषुस्थिता तदाजनुषिजन्मकुंडल्यांयस्मिन्भावेस्थिताक्रूरोपघातावर्षेपापग्रहसंयुक्तत्वात् तं जन्मस्थितमुथहायुक्तभावंनाशयेत् । वर्षेशुभग्रहयुक्ताचेच्छुभफलदा ॥६५॥ **उदाहरति** जनुर्लग्नतइति । जन्मलग्नाच्चतुर्थस्थानस्थिता वर्षप्रवेशकालेशुभग्र हयुक्तातदापितुर्द्रव्यस्यउपलक्षणाच्चतुर्थभावचिंतासंबंधिफलस्येत्यर्थः लाभंकरो ति । पापग्रहयुक्ताचेन्नृपाद्भयंकरोति अतिकष्टफलदाभवति । इत्थंअनयोक्तरी त्याविमर्शोविचारः अष्टमादौचतुर्थस्थानव्यतिरिक्तानिष्टस्थानेपिविधेयः । तदुक्त भावफलस्यलाभोनाशोवावक्तव्यः ॥६६॥ यस्मिन्नितिवर्षलग्नकुंडल्यांअसौमुंथाय स्मिन्भावेअधिष्ठितासतीस्वामिशुभग्रहाभ्यांदृष्टाएषवर्षसंबंधी अयंभावोजन्मनिज न्मलग्नकुंडल्यांयोभावोभवति मुंथाधिष्ठितवर्षभावस्ययोराशिर्जन्मभावकुंडल्यांय स्मिन्भावेभवतीत्यर्थः । तस्यतद्भावसंबंधिचिंतितपदार्थस्यवृद्धिः पापग्रहैःएवंदृ ष्टातस्यभावस्यजन्मसंबंधिनोनाशःकथितइत्येवंज्ञेयम् । **अस्यापवादमाह** वी र्यादिति । वर्षस्वामिवीर्यात्बलवशात्सौख्यमेवकरोति नमुंथाकृतानिष्टफलं वर्षेशे बलिष्ठेसतिमुंथाजनितानिष्टफलवृत्तिर्भवतीत्यर्थः ॥६७॥ अथमुथहाग्रहयोगवी क्षणग्रहराशिस्थितफलंवक्तुकामःप्रथमंसूर्यस्याह यदीति । मुथहासूर्यग्रहेसिंहरा शौअथवासूर्येणयुक्तातदाराज्यादिदत्तेगुणानांपरभागंउत्कृष्टांशस्थानांतरप्राप्तिंच

चंद्रेणयुक्तेंदुगृहेथदृष्टेंदुनापिवाधर्मयशोभिवृद्धिम् ॥ नैरुज्यसंतोषमतिप्रवृत्तिंददातिपापेक्षणतोऽतिदुःखम्॥ ६९ ॥ कुजेनयुक्ताकुजभेकुजेनदृष्टाचपित्तोष्णरुजंकरोति ॥ शस्त्राभिघातंरुधिरप्रकोपंसौरीक्षितासौरिगृहेविशेषात् ॥ ७० ॥ बुधेनशुक्रेणयुतेक्षितावातद्भेपिवास्त्रीमतिलाभसौख्यम् ॥ धर्मयशश्चाप्यतुलंविधत्तेकष्टंचपापेक्षणयोगतःस्यात् ॥ ७१ ॥ युतेक्षितावागुरुणागुरोर्भेयदीथिहापुत्रकलत्रसौख्यम् ॥ ददातिहेमांबररत्नभोगंशुभेत्थशालादिहराज्यलाभः ॥ ७२॥ शनेर्गृहेतेनयुतेक्षितावायदीथिहावातरुजंविधत्ते ॥ मानक्षयंवह्निभयंधनस्यहानिंचजीवेक्षणतःशुभाप्तिम्॥७३॥ तमोमुखेचेन्मुथहाधनाप्तिंयशःसुखंधर्मसमुन्नतिंच ॥ सितेज्ययोगेक्षणतःपदाप्तिंसुवर्णरत्नांबरलब्धयश्च ॥ ७४ ॥ भोग्याराहोर्लवास्तस्यसुखंपृष्ठंगतालवाः ॥ ततःसप्तमभंपुच्छंविमृश्येतिफलंवदेत् ॥ ७५ ॥

दत्ते दृशःसूर्यदृष्टेरपिइदंफलमुक्तम् ॥ ६८॥ **चंद्रस्याह** चंद्रेणेति । ददातीत्यंतंस्पष्टम् । पापग्रहदर्शनादतिदुःखंभवति ॥ ६९ ॥ **भौमस्याह** कुजेनेति । रुधिरप्रकोपमित्यंतंस्पष्टम् सौरीक्षिताशनिनादृष्टाशनिराशौकुजयुक्तादृष्टामुंथाभवतितदापूर्वोक्तफलंविशेषादधिकत्वेनभवति ॥ ७० ॥ **बुधशुक्रयोराह** बुधेनेति । विधत्तेइत्यंतंस्पष्टम् । पापग्रहदर्शनात्तद्योगाद्वाकष्टफलंस्यात् ॥ ७१ ॥ युतेति । भोगमित्यंतंस्पष्टम् । इहपूर्वोक्तेगुरुराशौगुरुयुक्तादृष्टावामुथहेत्यर्थः। शुभग्रहमुथशिलयोगाद्राज्यप्राप्तिः ॥ ७२ ॥ **शनेराह** शनेरिति । चांतंस्पष्टं गुरुदृष्ट्याशुभफलप्राप्तिः ॥ ७३ ॥ **अथराहुमुखगतमुथहाफलमाह** तमोमुखइतिस्पष्टम् । पदंस्थानम् ॥ ७४ ॥ **अथराहोर्मुखपृष्ठपुच्छानांलक्षणमाह** भोग्याइति । यस्मिन्राशौराहुरस्तितस्यवक्रगत्यायेभोग्यालवाः भोग्यभागास्तेमुखसंज्ञका । येगतालवास्तेनभुक्तालवास्तेपृष्ठसंज्ञकाज्ञेयाः । तद्यथा राहुरिदानींकन्यायांदशभिरंशैर्वक्रोऽस्ति तत्रादिमादशअंशामुखसंज्ञकाः ।

तत्पृष्ठभागेनशुभप्रदास्यात्तत्पुच्छभागाद्रिपुभीतिकष्टम् ॥ पापे क्षणादर्थसुखस्यहानिश्चेज्जन्मनीत्थंग्रहवित्तनाशः ॥ ७६ ॥ येजन्मकालेबलिनोऽब्दकालेचेद्दुर्बलास्तैरशुभंसमांते ॥ विपर्यये पूर्वमनिष्टमुक्तंतुल्यंफलंस्यादुभयत्रसाम्ये ॥ ७७ ॥ षष्ठेऽष्टमेऽ न्त्येभुविवेंथिहेशोऽस्तगोऽथवक्रोशुभदृष्टयुक्तः ॥ क्रूराच्चतुर्थास्त गतश्चभव्योनस्याद्रुजंयच्छतिवित्तनाशम् ॥ ७८ ॥ यद्यष्टमेशे नयुतोऽथदृष्टःक्षुताख्यदृष्ट्यानशुभस्तदापि ॥ योगद्वयेस्यान्निध नंयदैकयोगस्तदामृत्युसमत्वमाहुः ॥ ७९ ॥

भोगस्यकरिष्यमाणत्वात् ।अन्येभुक्ताविंशत्यंशाःपृष्ठसंज्ञकास्ततोराव्हाक्रांतराशेः सकाशात्सप्तमंभंराशिःपुच्छं यथाकन्यायाःसप्तमोराशिर्मीनाख्यःकेत्वाक्रांतराशिः पुच्छसंज्ञकःइतिविमृश्यविचार्यफलंवदेत् ॥ ७५ ॥ **अथपृष्ठपुच्छागतमुथ हायाःफलमाह** तत्पृष्ठभागइति स्पष्टार्थपद्यम् ॥ ७६ ॥ अथजन्मकालीनग्रह **वशाच्छुभाशुभफलमाह येजन्मेति।** येग्रहाजन्मकालेबलिनस्तेग्रहाअब्दका लेवर्षकालेचेद्दुर्बलास्तदातैर्ग्रहैःसमांतेवर्षांतेवर्षस्योत्तरार्धेअशुभफलंवाच्यम् अ र्थाद्वर्षपूर्वार्धेतद्ग्रहफलंशुभं । विपर्ययेजन्मकालेचेद्ग्रहादुर्बलाःस्युःवर्षकालेसबला स्तदापूर्वंवर्षपूर्वार्धेफलमनिष्टमुक्तम् । अर्थाद्वर्षोत्तरार्धेशुभंफलंवाच्यम् । उभ यत्रजन्मकालवर्षकालयोःसाम्येतुल्यंफलंस्यात् । अयमर्थः तेग्रहाःजन्मकालव र्षकालयोश्चेत्सबलास्तदासंपूर्णवर्षपर्यंतंशुभफलंस्यात् उभयत्रापियदानिर्बलास्त दासंपूर्णवर्षपर्यंतमशुभंफलंस्यात् ॥ ७७ ॥ **अथशुभंमुथहास्वामिफलमा ह**—षष्ठइति । चेन्मुथहेशःषष्ठेऽष्टमेऽन्त्येद्वादशेभुविचतुर्थस्थाने । एष्वनिष्टस्थाने षुभवति अथवा अस्तंगतोवक्रीवातथाअशुभैःपापग्रहैर्दृष्टोयुक्तोवास्यात् । त थाक्रूरात्क्रूरग्रहस्थानाच्चतुर्थेअस्तेसप्तमेवागतःस्यात् तदाभव्यःशुभोनस्यात् किंचसमुथहेशोरुजंरोगंवित्तनाशंचयच्छतिददाति॥ ७८ ॥ **अथान्यदशुभंमु थहास्वामिफलमाह**—यदीति । यदिअष्टमेशेनवर्षलग्नादष्टमस्थानाधीश्वरेणाशु भग्रहेणपापग्रहेणमुथहास्वामियुक्तःस्यात् । अथवाक्षुताख्यदृष्ट्याचतुर्थसप्तमैक

मुथहातत्पतिर्वापिजन्मनीक्षितयुक्शुभैः ॥ वर्षारंभेशुभंदत्तेऽब्दे चेदंतेन्यथाऽशुभम् ॥ ८० ॥ ॥ इतिमुथहानिरूपणम् ॥ अथव र्षारिष्टविचारः ॥ ॥ लग्नेशेऽष्टमगेऽष्टेशेतनुस्थेवाकुजेक्षिते ॥ ज्ञजीवयोरस्तगयोःशस्त्रघातोविपन्मृतिः ॥ ८१ ॥ अब्दलग्नेश रंध्रेशौव्ययाष्टहिबुकोपगौ ॥ मुथहासंयुतौमृत्युप्रदौतद्धातुकोपतः ॥ ८२ ॥

दशमदृष्ट्यादृष्टश्चेत्तदानशुभःअनिष्टफलदएव । अस्मिन्योगद्वयेनिधनंमरणमेव स्यात् । द्वयोर्मध्येयदैकोयोगस्तदामृत्युसमत्वंमरणतुल्यंस्यादित्याहुः ॥ ७९ ॥ **अथ मुथहायास्तत्स्वामिनश्चशुभाशुभफलमाह**—मुथहेति । जन्मनिजन्म कुंडल्यांवर्षावगतमुंथातस्याःस्वामीवाविकल्पेनशुभग्रहैःईक्षितयुक्दृष्टयुक्तइति । यथायोग्यंवर्षारंभेवर्षपूर्वार्धेशुभंशुभफलंदत्तेददाति प्रत्येकम् । अथजन्मकुंडल्या मुक्तसंभावनांतरंचेद्यदिअब्देवर्षकुंडल्यांवर्षावगतमुंथातस्याःस्वामीवाशुभग्रहैर्दृ ष्टत्वादृष्टत्वयुक्तःप्रत्येकंतर्हिअंतेवर्षोत्तरार्धेशुभफलंददाति शुभंदत्ते । अन्यथापा पग्रहैर्दृष्टयुक्तःप्रत्येकंजन्मवर्षक्रमेणवर्षस्यपूर्वार्धपरार्धयोरशुभफलंददाति । अन्य थेत्यत्राकारप्रश्लेषः नसदितियुक्तःपाठः । उभयत्रसंभवेवर्षंशुभंवार्थसिद्धंनैकत्रार्धे उभयत्रासंभवमध्यमंवर्षंअत्रदृष्टितारतम्यग्रहतारतम्यशुभाशुभग्रहदृष्टितारतम्या दिभिर्वर्षार्धयोर्वर्षस्यवातरतमादिभेदाःबहवःस्वबुद्ध्यासुधीभिरवगंतव्याः॥८०॥ इतिवर्षतंत्रटीयायांमुथहाध्यायः ॥ ॥ अत्रसत्यरिष्टयोगेवक्ष्यमाणंफलंवृथैवेत्याह **मणित्थः** "वृथाफलंहायनजंहियस्मान्नजीवनंहयनारिष्टयोगात् ॥ रिष्टानितस्मा त्प्रथमंप्रवक्ष्येपूर्वैर्विधिज्ञैःकथितानियानि " इति । **प्रथमतोरिष्टाध्यायोव्या ख्यायते**।तत्रादौलग्नेशाद्यरिष्टमाह लग्नेशइति । लग्नेशेवर्षलग्नस्वामिनिअष्टमगे अष्टमस्थानगेकुजेनभौमेनेक्षिते दृष्टेसति । अथवा अष्टेशेअष्टमस्थानाधीशेतनु स्थेलग्नस्थेभौमेनदृष्टेसति अस्मिन्योगद्वयेशस्त्रघातःविपत्ज्वरादिदुःखंवामृतिर्वा स्यात् अथवाज्ञशुक्रयोर्बुधशुक्रयोरस्तगयोः सूर्यसांनिध्यवशादस्तंगतयोःसतोः शस्त्रघातोविपन्मृतिश्चेति ॥ ८१ ॥ **अथान्यदाह** अब्देति । अब्दलग्नेशरंध्रे शौवर्षलग्नेशाष्टमस्थानाधीशौव्ययाष्टहिबुकोपगौद्वादशाष्टमचतुर्थस्थानानांमध्ये

जन्मलग्नाधिपोवीर्योमृतीशोलग्नपोयदा ॥ सूर्यदृष्टोमृतिंदत्तेकुष्ठंकंडूंतथापदः ॥ ८३ ॥ अस्तगौमुथहालग्ननाथौमंदेक्षितौ यदा ॥ सर्वनाशोमृतिःकष्टमाधिव्याधिभयंरुजः ॥ ८४ ॥ क्रूरमूसरिफोऽब्देशोजन्मेशःक्रूरितःशुभैः ॥ कंबूलेपिविपन्मृत्युरित्थमन्याधिकारितः ॥ ८५ ॥

कस्मिंश्चित्स्थानेस्थितौ । तत्रापिमुथहासंयुतौस्याताम् । तदातद्धातुकोपतः तयोर्ग्रहयोर्यौधातूवातपित्तादी तयोःप्रकोपतस्तदुत्पन्नविकारान्मृत्युप्रदौस्याताम् त्रिभिर्मिलित्वाएकएवयोगःनपृथक् । यदाएकतमस्ययोगस्तदाक्लेशमात्रम्॥८२॥ अथान्यदाह–जन्मेति। जन्मलग्नाधिपोजन्मकालीनलग्नस्यस्वामी । अब्देवर्षकालेअवीर्यःनविद्यतेपंचवर्गीबलंयस्येतिपंचवर्गीबलरहितःसन् । वर्षलग्नादष्टमस्थानस्थराशेःस्वामी यदायदिअस्तगोवर्षलग्नात्सप्तमस्थानेवर्तमानः इतिकेचिदाहुः । अन्येएवंवदंति अस्तगः सूर्यसान्निध्यादस्तगतःसन् एवंमतद्वये सूर्येणदृष्टस्तर्हिसग्रहोमृत्युंददाति । कुष्ठंकंडूंआपदःतथासमुच्चयेददाति "जन्मलग्नाधिपोवीर्योमृतीशोब्देऽस्तगोयदा सूर्यदृष्टोमृतिंदत्ते" इत्यत्र अस्तगोयदेतिपाठस्तुप्रामादिकएव यतःग्रहस्यास्तंगतस्यसूर्यसहचारित्वाद्दृष्टेश्चसंभवः सूर्यदृष्टइत्यस्यवैयर्थ्यापत्तेः । तथाच सूर्यादितरद्वितीयद्वादशराशिगतस्यअस्तत्वसंभवोदृष्टेस्तुनसंभवः । यद्वा अस्तगइत्यत्रसप्तमगतइत्यर्थेमूलवचनाभावान्नैवार्थोऽयंमंतव्यः । वस्तुतस्तुअस्तगइत्यत्रलग्नगइतिपाठः । मृतीशोवर्षलग्नादष्टमस्थानाधीशोलग्नगःसूर्येणदृष्टस्तदामृत्युं तथाचोक्तंमणित्थेन"चेज्जन्मनाथोविबलोमृतीशोलग्नंगतोभास्करदृष्टमूर्तिः ॥ शस्त्राभिघातंबहुधाचकष्टंकुष्ठंशरीरेमरणेनतुल्यम्"इति ॥ ८३ ॥ अथान्यदाह–अस्तगाविति। मुथहालग्ननाथौ मुथहास्वामीवर्षलग्नस्वामीएतौउभौअस्तगौसूर्यसान्निध्यवशादस्तगामिनौअस्तंगतौमंदेक्षितौयदामंदेनशनिनाईक्षितौदृष्टौस्यातांतदासर्वस्यस्त्रीपुत्रद्रव्यादेर्नाशः मृतिः । स्वस्यमरणम् कष्टंपीडा आधिर्मानसीव्यथा व्याधिःशरीररोगः भयंभीतिः एतेपदार्थाःस्युः ॥ ८४ ॥ अथान्यदाह– क्रूरेति । अब्देशोवर्ष

क्रूरावीर्याधिकाःसौम्यानिर्बलारिपुरंध्रगाः ॥ तदाऽधिव्याधिभीतिःस्यात्कलिर्हानिस्तथाविपत् ॥ ८६ ॥ नीचेशुक्रोगुरुःशत्रुभागेसौख्यलवोपिन ॥ लग्नेशेऽष्टमगेऽष्टेशेतनौवामृतिमादिशेत् ॥ ८७ ॥ निर्बलौधर्मवित्तेशौदुष्टखेटास्तनौस्थिताः ॥ लक्ष्मीश्चिरार्जितानश्येद्यदिशक्रोपिरक्षिता ॥ ८८ ॥

स्वामीक्रूरमूसरिफःपापग्रहेणकृतइसराफोयस्यासौभवति जन्मेशोजन्मलग्नस्वामीक्रूरितःअस्तंगतत्वादिनाक्रूरतांप्राप्तोभवति तत्रवर्षेतदन्यतरस्यशुभग्रहैःकृत्वा कंबूलयोगेशुभग्रहेणमुथशिलीचंद्रस्ताभ्यांसहमुथशिलीचतदन्यतरौभवतीत्यर्थः अपिशब्दाच्छुभकंबूलयोगेआरिष्टाभावाभासविपन्मृत्युः नानाविधदुःखानुभवेन मरणंभवति किंपुनः शुभकंबुलाभावेइत्थमुक्तरीत्या अन्याधिकारितः वर्षेशस्थानेमुथहेशादिकमधिकारिणंगृहीत्वाजन्मेशःक्रूरितइत्यादिकेसिद्धेविपन्मृत्युः स्यादित्यर्थः । अत्रकेनचिच्छुभैःकंबूलेइत्यस्यवर्षस्वामिजन्मलग्नस्वामिनोर्मुथशिलयोगेतयोश्चंद्रवरकेनचिच्छुभग्रहेणमुथशिलयोगरूपकंबूलेसतीतिव्याख्यानं कृतंतच्छब्देनप्रतिपाद्यंजन्मलग्नवर्षस्वामिनोर्मुथशिलप्रातिपादकशब्दाभावात् । द्वयोर्मुथशिलेताभ्यांचंद्रस्यमुथशिलेसतिकंबूलयोगाभिधानात्चंद्रेतरेणमुथशिलेतस्ययोगस्यभिन्नसंज्ञाभिधानाच्चेत्यलम् ॥ ८५ ॥ अथान्यदाह-क्रूराइति । क्रूराःपापग्रहाःवीर्याधिकाःपंचवर्गीबलेनबलिष्ठाः सौम्याःशुभग्रहाःनिर्बलाः पंचवर्गीबलेनहीनाः । रिपुरंध्रगाःषष्ठाष्टमस्थानगाश्चेत्स्युस्तदाधिव्याधिभीतिरित्याद्यशुभंफलंस्यादितिस्पष्टम् ॥ ८६ ॥ अथान्यदाह नीचइति । शुक्रोयत्किंचित्स्थानेस्थितःसन्नीचेनीचराशावस्ति गुरुर्यत्किंचित्स्थानेस्थितःसन्शत्रुभागेशत्रुनवांशोस्ति तदासौख्यलवोपिननास्ति अयमेकोयोगः। अथान्यःलग्नेशइति । लग्नेशेवर्षलग्नस्वामिनिअष्टमगेअष्टमस्थानस्थेसतिवाविकल्पेनअष्टेशेअष्टमस्थानाधीशेतनौलग्नेसतिएवंविधेयोगेमृतिमादिशेत् ॥ ८७ ॥ अथान्यदाह-निर्बलाविति । धर्मवित्तेशौनवमद्वितीयस्थानाधीशौनिर्बलौ पंचवर्गीबलेन

Indira Gandhi National Centre for the Arts

नीचेचंद्रेऽस्तगाःसौम्यावियोगःस्वजनैःसह ॥ शरीरपीडामृत्युर्वा साधिव्याधिभयंद्रुतम् ॥ ८९ ॥ अब्दलग्नंजन्मलग्नराशिभ्यामष्टमं यदा ॥ कष्टंमहाव्याधिभयंमृत्युःपापयुतेक्षणात् ॥ ९० ॥ जन्म न्यष्टमगःपापोवर्षलग्नेरुगाधिदः ॥ चंद्राब्दलग्नपौनष्टबलौचेत्स्या त्तदामृतिः ॥ ९१ ॥ जन्याब्दलग्नपौपापयुक्तौपतितभस्थितौ ॥ रोगाधिदौमृत्युकरावस्तगौनेक्षितौशुभैः ॥ ९२ ॥ व्ययांबुनिधना रिस्थाजन्मेशाब्दपमुंथहाः ॥ एकर्क्षगास्तदामृत्युःपापक्षुतदृशा ध्रुवम् ॥ ९३ ॥

हीनबलौ । दुष्टखेटाःपापग्रहाःतनौलग्नेस्थिताः । एतादृशयोगेलक्ष्मीश्चिरार्जि तानश्येदितिस्पष्टम् ॥ ८८ ॥ अथान्यदाह–नीचेचंद्रइति । क्वचित्स्थानेस्थि तश्चंद्रोनीचेनीचराशावस्तिसौम्याःशुभग्रहाःबुधगुरुशुक्राःअस्तगाअस्तंगताःस्यु स्तदावियोगइत्याद्यशुभंफलंस्यात् ॥ ८९ ॥ अथान्यदाह अब्दलग्नमि ति । जन्मलग्नराशिभ्यांजन्मलग्नतःजन्मराशेश्चअब्दलग्नंवर्षलग्नमष्टमंयदास्यात्त दाकष्टंमहाव्याधिभयंफलंस्यात् तादृशंवर्षलग्नंपापग्रहैर्युतमीक्षितंदृष्टंवातदामृत्यु रेवस्यात् ॥ ९० ॥ अथान्यदाह–जन्मनीति । जन्मनिजन्मकालिकलग्ना दष्टमगःअष्टमस्थानेपापःपापग्रहस्तिष्ठेत्सयदिवर्षलग्नेवर्षकालिकलग्नेस्यात्सरुजंरो गमाधिंमानसींव्यथांचददाति । अयमेकोयोगः । अथापरोयोगः । चंद्राब्द लग्नपौवर्षलग्नेकालिकचंद्रवर्षकालिकलग्नराशिस्वामिनौपंचवर्ग्यांनिष्टबलौपंचाल्प बलौचेत्स्यातांतदामृतिःस्यात् ॥ ९१ ॥ अथान्यदाह–जन्मेति । जन्मा ब्दलग्नपौजन्मलग्नस्वामीवर्षलग्नस्वामीचपापयुक्तौपापग्रहैर्युक्तौपतितभस्थितौपति तभंदुष्टस्थानंचतुर्थषष्ठाष्टमद्वादशंतत्रस्थितौस्यातांतदारोगाधिदौभवतः । यदि तौद्वावपिअस्तगौसूर्यसान्निध्यवशादस्तंगतौ । शुभैःशुभग्रहैर्नेक्षितौनदृष्टौ । तदामृत्युकरौभवतः ॥ ९२ ॥ अथान्यदाह–व्ययेति । एकर्क्षगाएकराशिगाः जन्मेशाब्दपमुंथहाः जन्मलग्नस्वामीवर्षस्वामीमुंथहाएतेव्ययांबुनिधनारिस्थाद्वा दशचतुर्थाष्टमषष्ठस्थानेस्थिताःसंतस्तदाअसतिप्रतिबंधकेमृत्युःस्यात् । यद्येते

चंद्रोव्ययेशनियुतःशुभःषष्ठोऽथनाशकृत् ॥ चित्तवैकल्यमशुभे सराफान्नशुभेक्षणात् ॥ ९४ ॥ चंद्रोऽर्कमंडलगतोरिपुरिःफाष्टबंधुगः ॥ त्रिदोषतस्तस्यरुजाविविधेज्यदृशाशुभम् ॥ ९५ ॥ हद्दाहायनलग्नेशौसप्ताष्टांत्येखलान्वितौ ॥ स्वदशायांनिधनदौशुभदृष्ट्याशुभंवदेत् ॥ ९६ ॥ अब्दलग्नादृज्वनृजूव्ययार्थस्थौरुजा तदा ॥ एवंवर्षाब्दलग्नेशजन्मेशैरपिबंधनम् ॥ ९७ ॥

पापग्रहैःक्षुतदृष्ट्याचतुर्थदशमैकसप्तमस्थानस्थदृष्ट्याद्दष्टास्तदासत्यपिप्रतिबंधेमृत्युःस्यात् । ध्रुवंनिश्चयेनमृत्युःस्यात् केचिदेवंव्याकुर्वते अब्दपइत्यत्रवर्षलग्नस्वामीमुथहाइत्यत्रमुथहास्वामीतिइदमपिसंभवतिस्वामिप्रकरणपाठात् ॥ ९३ ॥ **अथान्यदाह**-चंद्रइति । व्ययेद्वादशस्थानेशनियुतश्चंद्रोभवेत् । शुभःषष्ठस्थानस्थितोभवेत् तदार्थस्यद्रव्यस्यनाशकृत्स्यात् अशुभेसराफात् । यदाअशुभेनपापग्रहेणसाकंयोगकारकग्रहाणां यथासंभवमीसराफयोगश्चेत्तर्हिचित्तवैकल्यंबुद्धिविपर्यासःस्यात् नशुभेक्षणात् तत्रशुभग्रहदृष्टिश्चेत्तर्हि अर्थनाशचित्तवैकल्येनस्यातां केचित्तुपापग्रहकृतःशनिशुक्राभ्यामेवेसराफयोगेनहिचंद्रेणसाकंचंद्रस्यशीघ्रगतित्वात्तदितितन्न अशुभग्रहस्येसराफयोगकर्तृत्वोक्तेरभावात्॥९४॥ **अथान्यदाह**-चंद्रइति। अर्कमंडलगतोऽस्तंगतश्चंद्रःरिपुरिःफाष्टबंधुगःषष्ठद्वादशाष्टमचतुर्थस्थानान्यतरस्थानस्थश्चेद्भवति तदात्रिदोषतःवातपित्तकफेभ्यस्तस्यरुजाविविधानानाप्रकारकोरोगःस्यात् यदिचंद्रोपरिइज्यदृशागुरोर्दृष्टिश्चेत्तदासुखंस्यात् । रिपुरिःफाष्टबंधुगइत्यत्ररिःफाष्टभस्थितइतियुक्तःपाठः उक्तंच **मणित्थेन** रात्रीश्वरेभास्करमंडलस्थेषष्ठेव्ययेवामृतिभावसंस्थे ॥ त्रिदोषतासौबहुभिःप्रकारैःकरोतिकष्टंविविधंदशायामिति ॥ ९५ ॥ **अथान्यदाह**-हद्देति। हद्दाहायनलग्नेशौवर्षसमयलग्नेहद्दास्वामिवर्षलग्नस्वामिनौसप्तमाष्टमांत्यस्थानस्थितौसंतौखलान्वितौचेत्पापग्रहैर्युक्तौभवतस्तदातौस्वामिनौस्वदशायामंतर्दशायांचानिधनदौमरणप्रदौभवतः । यदाशुभग्रहैर्मित्रदृष्ट्याद्दष्टौतदासुखंभवेत् ॥ ९६ ॥ **अथान्यदाह** अब्दलग्नादिति । वर्षलग्नादृज्वनृजूमार्गिवक्रिणौद्वादशद्वितीय

नीचेत्रिराशिपेपापदृष्टेकार्यंविनश्यति॥ इंथिहेशेऽब्दपेवारिभेऽस्तं यातेरुजाविपत् ॥ १८ ॥ चंद्रोरिःफषडष्टभूद्युनगतोदृष्टोऽशुभैर्नो शुभैःसोऽरिष्टंविदधातिमृत्युमथवाभौमेक्षणादग्निभीः ॥ शस्त्राद्वा शनिराहुकेतुभिररेर्भीतिंरुजंवायुजांदारिद्र्यंरविणाशुभंशुभदृशेज्या लोकनाद्दादिशेत् ॥ १९ ॥

स्थानस्थितौस्याताम्। तद्यथा द्वादशेमार्गीपापग्रहाः द्वितीयेवक्रीपापग्रहइत्यर्थः। तदारुजारोगोत्पत्तिःस्यात् एवममुनाप्रकारेणवर्षाब्दलग्नेशजन्मेशैर्त्रैर्षस्वामिनोवावर्षलग्नस्वामिनोवाजन्मलग्नस्वामिनोश्चेत्पापग्रहकृतकर्तरीयोगस्तदाबंधनं कारागृहप्राप्तिःस्यात् ॥ १७ ॥ **अथान्यदाह**–नीचइति। त्रिराशिपेवर्षलग्ने यस्त्रैराशिकस्वामीसयदिनीचराशिस्थितःसन्पापग्रहैर्दृष्टश्चतदाचिंतितंकार्यंविनश्यतिनाशंप्राप्नोति। अयमेकोयोगः। **अथान्यः** ॥ इंथिहेशेमुंथहास्वामिनिअब्दपेवर्षस्वामिनिवाअरिभेशत्रुराशौअस्तंयातेसूर्यसान्निध्यादस्तंगतेसतिरुजारोगाधिक्येनविपत्स्यात् ॥ १८ ॥ **अथचंद्रारिष्टंसापवादंचाह**–चंद्रइति। वर्षलग्नतःरिःफषडष्टभूद्युनगतोद्वादशषष्ठाष्टमलग्नसप्तमस्थानगतश्चंद्रःअशुभैःपापग्रहैर्दृष्टःशुभग्रहैर्नोदृष्टस्तदासःअरिष्टमथवामृत्युंविदधातिकरोति। एकेनद्वाभ्यां दृष्टोऽरिष्टंकरोऽतिसर्वपापग्रहैर्दृष्टोमृत्युंकरोतीत्यर्थः। अत्रारिष्टप्रसंगेभूशब्देनचतुर्थस्थानमंगीकृत्यव्याख्यातंतदसत्। कुतः भूशब्दस्यलग्नवाचकत्वात् यद्यपि भूशब्देनकचिच्चतुर्थस्थानमप्युच्यते तथापिचतुर्थचंद्रस्याशुभफलत्वंकुत्रापिनोक्तंसर्वत्रचतुर्थस्थानस्थितचंद्रस्यशुभफलत्वस्योक्तत्वाच्च। उक्तंच लग्नास्तांत्यषडष्टगोहिमरुचिरिति अन्यच्च निधनतनुमदारिप्रांत्यगःशीतरश्मिरिति एवंसर्वग्रंथेषु एतादृशश्चंद्रोभौमेनदृष्टोऽग्निभयंकरोतिशस्त्राद्वाभीतिः। शनिराहुकेतुभिर्दृष्टश्चंद्रःअरेःशत्रुतोभीतिंददाति। रविणासूर्येणदृष्टश्चंद्रःवायुजांवातसंबंधेनरुजंरोगंदारिद्र्यंधनरहितंकरोति। **अथउक्तस्यापवादः**। चंद्रस्यशुभदृशा बुधगुरुशुक्राणांमित्रदृष्टयाशुभंशुभफलंवदेत्। केवलंइज्यालोकनात् बृहस्पतिदृष्टश्चेत्तथापिशुभफलमादिशेत्कथयेत् ॥ १९ ॥

क्रूरान्वितेक्षितयुताशनिनेंत्थिहानिव्याधिप्रदाजनुषिरिःफसुखारि रंध्रे ॥ द्यूनेचवर्षतनुनैधनगामृतिंसादत्तेखलेक्षितयुतेत्यपिचिंत्य पार्यैः ॥१००॥ इत्यरिष्टाध्यायः ॥ ॥ अथारिष्टभंगः ॥ लग्नाधि पोबलयुतःशुभेक्षितयुतोपिवा ॥ केन्द्रत्रिकोणगोऽरिष्टंनाशयेत्सु खवित्तदः ॥ १ ॥ गुरुःकेंद्रेत्रिकोणेवापापादृष्टःशुभेक्षितः ॥ ल ग्नचंद्रेंत्थिहारिष्टविनाशार्थसुखंदिशेत् ॥ २ ॥ सुखंस्वामियुतंसद्भिर्दृ ष्टंसौख्ययशोऽर्थदम् ॥ लग्नेतृतीयेऽथगुरुर्जन्मेट्सौख्यार्थदःसुखे ॥ ३ ॥ लग्नेद्युनेशस्तनुगःसुरेज्यःक्रूरैरदृष्टःशुभमित्रदृष्टः ॥ रिष्टं निहंत्यर्थयशःसुखानिदिशेत्स्वपाकेनृपतिप्रसादम्॥ १०४ ॥

अथमुथहाकृतमरिष्टयोगमाह–क्रूरान्वितेति । मुथहाक्रूरान्वितापापग्रहैर्यु क्ताशनिनाईक्षितादृष्टायुतावातदाधिव्याधिप्रदा॥अयमेकोयोगः ॥ अथान्यः॥ सामुथहाजनुषिजन्मलग्नेद्वादशचतुर्थषष्ठाष्टमसप्तमएतत्स्थानानांमध्येयत्रकुत्रापि स्थितासतीयदिवर्षतनुनैधनगावर्षलग्नादष्टमस्थानगाविशेषतः खलेक्षितयुतापा पग्रहैर्दृष्टायुतावास्यात्तदासामुंथामृतिंमरणंदत्तेददाति इत्यपि आर्यैर्दैवज्ञैश्चिंत्यम् ॥ १०० ॥ इतिश्रीदिवाकरात्मजविश्वनाथविरचितायांवर्षतंत्रटीकायामरिष्टाध्या यः ॥ अथारिष्टभंगाध्यायोव्याख्यायते–लग्नाधिपइति । लग्नाधिपोवर्षलग्न स्वामीबलयुतः पंचवर्गीबलेनबलिष्ठः यदाशुभेक्षितयुतःशुभग्रहेणईक्षितोदृ ष्टोयुतोवा अथवात्रिकोणकेन्द्रगः त्रिकोणंनवमपंचमं केंद्रं १।४।७।१० एतत्स्थानस्थःसन् अरिष्टंनाशयेच्च दशायांसुखवित्तदःस्यात् ॥ १ ॥ अथान्यदाह– गुरुरिति । गुरुःकेंद्रेत्रिकोणेवापापादृष्टःपापग्रहैरदृष्टः शुभग्रहैर्दृष्टः एतादृशःसन्लग्नचंद्रेंत्थिहारिष्टंनाशयेत् पश्चादर्थसुखंदिशेत् ॥ २ ॥ अथान्यदाह–सुखमिति । सुखंवर्षलग्नाच्चतुर्थस्थानंस्वामिनायुक्तं सद्भिः शुभग्रहैर्दृष्टंसौख्ययशोर्थदंभवति ॥ अयमेकोयोगः ॥ अथान्यः– गुरुर्लग्नेअथवातृतीयेस्थानेस्यात्तथासुखेचतुर्थस्थानेस्याज्जन्मेट्जन्मलग्नस्वामी तदासौख्यार्थदःस्यात् ॥ ३ ॥ अथान्यदाह–लग्नइति । द्युनेशःसप्तमस्था नाधीशःलग्नेस्यात्सुरेज्यःबृहस्पतिरपितनुगःलग्नगःस्यात् क्रूरैःपापग्रहैर्नदृष्टः शु

बलान्वितौधर्मधनादिनाथौक्रूरैरदृष्टौतनुगौयदास्ताम् ॥ राज्यंग
जाश्वांबररत्नपूर्णंरिष्टस्यनाशोप्यतुलंयशश्च ॥५॥ त्रिषष्ठलाभोपगतै
रसौम्यैःकेंद्रत्रिकोणोपगतैश्चसौम्यैः ॥रत्नांबरस्वर्णयशःसुखाप्तिर्ना
शोप्यनिष्टस्यतनोश्चपुष्टिः ॥ ६ ॥ यदासवीर्योमुथहाधिनाथोल
ग्नाधिपोजन्मविलग्नपोवा ॥ केंद्रत्रिकोणायधनस्थितास्तेसुखार्थहे
मांबरलाभदाःस्युः ॥७॥ तुंगेशनिर्वाभृगुजोगुरुर्वाशुभेत्थशालाद्य
वनाद्धनाप्तिम्॥बलीकुजोवित्तगतोयशोर्थतेजांस्यकस्माच्चसुखानि
दद्यात् ॥८॥ सूर्येज्यशुक्रामिथइत्थशालंकुर्युस्तदाराज्ययशःसुखा
र्थाः ॥सूर्यःकुजोवोपचयेददातिभद्रंयशोमंगलमिंथिहायाः ॥९॥

भग्रहेणमित्रग्रहेणवादृष्टस्तदासग्रहोरिष्टंनिहंतिदूरीकरोति स्वपाकेस्वस्वदशाया मर्थयशःसुखाप्तिंनृपतिप्रसादंदिशेत्ददाति ॥ ४ ॥ **अथान्यदाह**–बला न्विताविति । धर्मधनाधिनाथौनवमद्वितीयस्थानस्वामिनौबलान्वितौपंचवर्गीब लेनबलिष्ठौक्रूरैःपापग्रहैरदृष्टावेतादृशौसंतौतनुगौलग्नगौस्यातांतदाऽरिष्टस्यनाशः राज्यमित्यादिशुभफलंस्यात् ॥ ५ ॥ **अथान्यदाह**–त्रिषष्ठेति । असौम्यैः पापग्रहैस्त्रिषष्ठलाभोपगतैस्तृतीयषष्ठैकादशस्थानास्थितैः सौम्यैःशुभग्रहैः केंद्रत्रि कोणोपगतैः अरिष्टस्यनाशोभवति । चकारःसमुच्चयार्थः रत्नांबरइत्यादि स्पष्टार्थम् ॥ ६ ॥ **अथान्यदाह**–यदेति । यदामुथहाधिनाथःमुथहास्वामी सवीर्यःपंचवर्गीबलेनबलिष्ठः अथवालग्नाधिपःवर्षलग्नस्वामीबलिष्ठोवाजन्मलग्न स्वामीबलिष्ठःसन् केंद्रत्रिकोणायधनस्थिताः तेसुखार्थहेमांबरलाभदाःस्युः । यदाउक्तस्थानगाः सर्वेपितादृशाःसंतस्तदाउक्तपदार्थानांलाभोभूयात् ॥ ७ ॥ **अथधनलब्धिमाह**–तुंगइति । तुंगेउच्चेशनिर्वाभृगुजःशुक्रःउच्चेवागुरुर्बृ हस्पतिरुच्चे सग्रहः शुभेत्थशालात्शुभग्रहेणसाकंमुथशिलंचेत्कुर्वंतितदायव नाद्धनाप्तिंकुर्यात् यदातुसर्वेपिएतादृशास्तदाम्लेच्छप्रभुतःमहतीप्राप्तिरित्यर्थतः सिद्धम् ॥ अयमेकोयोगः ॥ **अथापरः** ॥ वित्तगःद्वितीयस्थानस्थितोबलि ष्ठोभौमः यशोर्थेत्यादिशुभफलंदद्यात् ॥ ८ ॥ **अथान्यदाह**–सूर्येज्येति ।

शुक्रज्ञचंद्राहद्देस्वेपापारुयायगतायदि ॥ स्वबाहुबलतोहेमसुख कीर्तीर्नरोऽश्नुते ॥ १० ॥ बुधशुक्रौमुसरिफौगुरुर्विक्रमभावगः ॥ तदाराज्ययशोहेममुक्ताविद्रुमलब्धयः ॥ ११ ॥ भौमोमित्रगृहेऽब्देशःकंबूलीस्वगृहादिगैः ॥ गजाश्वहेमांबरभूलाभंधत्तेसुखादिकम् ॥ १२ ॥ इत्थंजन्मनिवर्षेचयोगकर्तुर्बलाबलम् ॥ विमृश्य कथयेद्राजयोगंतद्भंगमेवच ॥ १३ ॥

सूर्यबृहस्पतिशुक्राःमिथःपरस्परमित्थशालंमुथशिलंकुर्युःकुर्वंति तदाराज्ययशः सुखार्थाःस्युः ॥ अयमेकोयोगः ॥ अथान्यः—सूर्यइति । इंथिहायाःमुथहायुक्तस्थानादुपचयेत्रिषष्ठदशमैकादशस्थानयोर्मध्येयत्रकुत्रापिस्थितःसूर्योभौमोवाचेत्स्यात्तदाभद्रंकल्याणंयशोमंगलंविवाहादिकृत्यंददातिसमुद्भवेत् ॥ ९ ॥ अथान्यदाह—शुक्रज्ञचंद्राइति । शुक्रबुधचंद्राःपंचवर्ग्यास्वहद्दायांचेत्स्युःपापाः सूर्यभौमशनयस्त्र्यायगतास्तृतीयैकादशस्थानगतायदिस्युस्तदानरःपुरुषःस्वबाहुबलतःस्वकीयपराक्रमेणसुवर्णसुखकीर्तीरश्नुतेभुनक्ति । अत्रचंद्रःस्वहद्दायामित्युक्तंतर्हिचंद्रस्यहद्दाचक्रमध्येगणनानास्ति एतदर्थेसंमतिवाक्यंकुत्रापिनास्तीतिकृत्वातेषामाशयंतएवजानंतु ॥ १० ॥ अथान्यंशुभयोगमाह—बुधशुक्राविति । यदिबुधशुक्रौमुसरिफयोगंकुरुतःगुरुबृहस्पतिःविक्रमभावगस्तृतीयस्थानेस्थितस्तदाराज्ययशोहेममुक्ताविद्रुमलब्धयःस्युः ॥ ११ ॥ अथान्यदाह—भौमइति । भौमःअब्देशोवर्षेशःसन्मित्रगृहेतिष्ठतिस्वगृहादिगैःस्वगृहस्थोच्चादिस्थानस्थितैर्ग्रहैःसहमुथशिलयोगंकरोति । स्वगृहोच्चादिस्थानस्थितेनचंद्रेणापिसहमुथशिलंकरोति तदाकंबूलीत्युच्यते । एतादृशोभौमोगजाश्वहेमांबरभूमिलाभंसुखाधिकंददाति ॥ १२ ॥ अथबलाबलविचारेणराजयोगसंबंधिशुभाशुभफलमाह—इत्थमिति । इत्थममुनाप्रकारेणजन्मनिजन्मकालेवर्षेवर्षकालेचराजयोगकर्तुर्ग्रहस्यबलाबलंपंचवर्ग्यीबलिष्ठःस्वोच्चादिगः अथवानिर्बलोनष्टबलोनीचादिगःइतिविमृश्यविचार्यराजयोगंतद्भंगंचकथयेत् ॥ १३ ॥

अब्देंत्थिहेशादिखगाःखलैश्चेद्युतेक्षिताअस्तगनीचगावा ॥ सौम्याबलोनान्नृपयोगभंगंतदाभवेद्वित्तसुखक्षयांश्च ॥ १४ ॥ इत्यरिष्टभंगाध्यायः ॥ श्रीगर्गान्वयभूषणंगणितविच्चिंतामणिस्तत्सुतोऽनंतोऽनंतमतिर्व्यधात्खलमतध्वस्त्यैजनुःपद्धतिम् ॥ तत्सूनुःखलुनीलकंठविबुधोविद्वच्छिवानुज्ञयाऽवोचद्वर्षमथुंथहाफलमथारिष्टादिसद्योगयुक्॥ १५॥॥ अथभावविचारः ॥ योभावःस्वामिसौम्याभ्यांदृष्टोयुक्तोयमेधते ॥ पापदृष्टयुतौनाशोमिश्रैर्मिश्रफलंवदेत् ॥ १ ॥

अथराजयोगभंगमाह—अब्देंत्थिहेशादिखगाइति । अब्देशोवर्षस्वामीइंत्थिहेशोमुथहास्वामी आदिशब्देनवर्षलग्नजन्मलग्नस्वामीग्रहाःखलैःपापग्रहैर्युताःदृष्टाःसौम्याःशुभग्रहाबलोनाःहीनबलाश्चेत्स्युस्तदाराजयोगभंगंवदेत् ॥ अयमेकोयोगः ॥ अथान्यः। अस्तगःसूर्यसान्निध्येनास्तंगतः नीचगावानीचराशौगतावासौम्याःशुभग्रहाःबलोनापंचवर्गीबलेनहीनबलाश्चेत्स्युस्तदाराजयोगभंगंवदेत् योगद्वयेपिफलंवित्तसुखक्षयंचवदेत् । यदिसौम्यग्रहाःस्वोच्चस्वगृहादिगताःकेंद्रत्रिकोणायगताश्चेत्स्युस्तदाराजयोगकर्तारइत्याहमणित्थः । यदींदुसौम्येज्यसुरारिपूज्याःस्वोच्चंगताःस्वांशगतायादिस्युः ॥ त्रिकोणकेंद्रायगताः स्वामिभिर्दृष्टाश्चयुक्तानिजवर्गसंस्थाः ॥ गजाश्वरत्नांबरदेशलाभंस्त्रीपुत्रलाभंविविधंचसौख्यम् ॥ यच्छंतिखेटाःपरमर्दनंचकुर्वंतिसर्वेबलिनोनराणाम् ॥१४॥१५॥

इत्यरिष्टभंगाध्यायः ॥ अथद्वादशभावविचाराध्यायोव्याख्यायते ॥

तत्रादौतनुभावविचारः । योभावइति । द्वादशभावानांमध्येयःस्वामीशुभग्रहः पापग्रहोवासौम्याःशुभग्रहाः आभ्यांस्वामिशुभाभ्यांदृष्टोयुक्तोवा अयंभावः एधतेवृद्धिंकरोतियोभावःस्वामिव्यतिरिक्तेनपापग्रहेणदृष्टोयुतोवास्यात्तदातस्यभावस्यनाशः । मिश्रैःशुभग्रहैः पापग्रहैश्चयुक्तोदृष्टोवायोभावोभवतितस्यभावस्यमिश्रफलंशुभाशुभमिश्रितफलंवदेत्कथयेत् ॥ गार्गिः । नीचस्थोऽरिगृहस्थोवाग्रहोभावविनाशकृत् । उदासीनगृहेमध्योमित्रस्थर्क्षत्रिकोणगः ॥

लग्नाधिपेवीर्ययुतेसुखानिनैरुज्यमर्थागमनंविलासः ॥ स्यान्म ध्यवीर्येऽल्पसुखार्थलाभःक्लेशाधिकत्वंविपदल्पवीर्ये॥ २ ॥जन्मा ब्दांगपतींथिहापतिसमानाथाद्यधीकारवान्सूर्योनष्टबलस्त्वगक्षि विलयंकुर्यान्निरुत्साहताम् ॥ नीचत्वंपितृमातृतोप्यभिभवश्चंद्रेक्षि कार्यक्षयोदारिद्र्यंचपराभवोग्रहकलिर्व्याध्याधिभीतिस्तदा ॥३॥ भौ मेचलत्वंभीरुत्वंबुधेमोहपराभवौ ॥ जीवेधर्मक्षयःकष्टफलाजीवन वृत्तयः ॥४॥ शुक्रेविलाससौख्यानांनाशःस्त्रीभिःसमंकलिः॥ सौरे भृत्यजनाद्दुःखरुजोवातप्रकोपतः ॥ ५ ॥ लग्नंपापयुतंसौम्यैरदृष्टं सहितंनृणाम् ॥ विवादंवंचनांदुष्टमशनंचापिविंदति ॥ ६ ॥

स्वोच्चगश्चग्रहोऽवश्यंभारवृद्धिकरःस्मृतइति । तत्रषष्ठाष्टमांत्यभावानांविपरीता निफलान्याहवराहः । समुपचयविपत्तिसौम्य भावेषुसत्यःकथयतिविपरीतंरिःफष ष्ठाष्टमेष्विति॥ १ ॥ **अथलग्नाधिपस्यशुभाशुभफलमाह**—लग्नाधिपइति । लग्नाधिपेवर्षलग्नस्वामिनिवीर्ययुतेपंचवर्गीबलेनबलिष्ठेसतिसुखानीत्यादिशुभाशु भफलंस्यात् । मध्यवीर्येमध्यबलेसतिसुखार्थलाभःअल्पःस्यात् । अल्पवीर्येहीन बलेसतिक्लेशाधिकत्वंविपत्स्यात्॥ २ ॥ अथवर्षाधिकारिग्रहेनष्टबलेसति **विशेष फलमाह**—जन्माब्दांगेति । जन्माब्दांगपतीजन्मलग्नस्वामीवर्षलग्नस्वामीवा इं थिहापतिः मुथहास्वामीवासमानाथादिवर्षस्वामी आदिशब्दात्त्रैराशिकदिनरात्रि स्वामिनः अधिकारवान्एतेष्वधिकारिषुसूर्यादिग्रहेषुयःकश्चिन्नष्टबलःपंचाल्पबल स्तस्यफलमाह । तत्रादौसूर्यश्चेन्नष्टबलस्तदात्वगक्षिविलयंत्वकृत्वचातस्यकुष्ठादि नाविलयंनाशंकुर्यात् । अक्षिनेत्रयोरंधत्वेनविलयंनाशंकुर्यात् निरुत्साहतांउत्साह राहित्यंकुर्यात्।नीचत्वंअधमवृत्त्याजीवनंपितृतोमातृतोपिअभिभवःक्लेशः । **अथ चंद्रफलमाह**—चंद्रइतिस्पष्टम्॥३॥ **अथभौमादीनांफलमाहश्लोकद्वयेन**— भौमइति । स्पष्टम् ॥ ४ ॥ ५ ॥**अथलग्नफलमाह**—लग्नमिति । लग्नंवर्ष लग्नं पापग्रहैर्युतंसौम्यैःशुभग्रहैरदृष्टंअसहितंतदानृणांमनुष्याणांविवादमित्यादि फलंविंदतिप्राप्नोति ॥ ६ ॥

जन्माब्दांगपरंध्रपाब्दमुथहानाथाबलाढ्यास्तदारम्यं वर्षमुशंतिसर्वमतुलंसौख्यंयशोऽर्थागमः॥ षष्ठाष्टांत्यगतानचेदिहपुनस्तेदुःखभीतिप्रदानिर्वीर्यायदिवर्षमेतदशुभंवाच्यंशुभेक्षांविना ॥७॥ सूतौधनप्रदःखेटोधनाधीशश्चतौयदि॥ वर्षेनष्टौवित्तनाशान्यनिक्षेपापवाददौ ॥ ८ ॥ एवंसमस्तभावानांसूतौनाथाश्चपोषकाः॥ अब्देनष्टबलास्तेषांनाशायोह्याविचक्षणैः ॥ ९ ॥ इतिप्रथमभावविचारः ॥ ॥ अथधनभावविचारः ॥ ॥ वित्ताधिपोजन्मनिवित्तगोब्देजीवोयदालग्नपतीत्थशाली ॥ तदाधनाप्तिःसकलेपिवर्षेक्रूरेसराफेधनधान्यहानिः ॥ १ ॥

अथाधिकारिणिबलिष्ठेसतिफलमाह—जन्माब्दांगेति । जन्मलग्नस्वामीवर्षलग्नस्वामीवा वर्षलग्नादष्टमस्थानस्वामीवा वर्षीयमुथहास्वामीवा एतेबलिष्ठाश्चेत् षष्ठाष्टमांत्यगतानस्युस्तदाअतुलंसर्ववर्षरम्यमुशंतिवदंति सौख्यंयशोर्थागमश्चस्यात् । एतेबलिष्ठाःसंतःषष्ठाष्टमांत्यगतायदिस्युस्तदादुःखप्रदाइत्यर्थसिद्धम् । इहपुनस्तेचत्वारोनिर्वीर्याःबलरहिताःसंतःषष्ठाष्टमांत्यगताःस्युस्तदादुःखभीतिप्रदाःस्युः शुभेक्षांविनायदिएतेचत्वारःशुभग्रहैर्नदृष्टास्तदाएतद्वर्षमशुभंवाच्यम् । यदिशुभग्रहाः पश्यंतितदापूर्वोक्तंशुभंवाच्यमिति ॥ ७ ॥

अथधननाशयोगमाह—सूताविति । सूतौजन्मकालेजन्मलग्नेधनप्रदःखेटोधनप्राप्तिकर्तायोग्रहःधनस्थानाधीशश्चतौद्वौग्रहौयदिवर्षेनष्टबलौभवतस्तदावित्तनाशोभवति । अन्यस्यापितद्द्रव्यस्यअभिशापंददाति दत्तेपिनत्वयादत्तमित्यभिशापंददातीत्यर्थः । अर्थाद्यदिद्वौबलिष्ठौतदाधनप्राप्तिकरौ भवतइत्यर्थः ॥ ८ ॥. **अथान्यदाह**—एवमिति । एवमुक्तरीत्यासूतौजन्मकालेसमस्तभावानांनाथास्तत्तद्भावफलदातारोग्रहास्तत्तद्भावस्वामिनश्चयदिवर्षेबलिष्ठास्युस्तदातत्तद्भावपोषकाःपुष्टिकराभवंति । यदावर्षेनष्टबलाःस्युस्तदातेषांतत्तद्भावानांनाशायविचक्षणैर्दैवज्ञैरूह्याः स्वयमेवज्ञातव्याः ॥ ९ ॥ इतितनुभावः ॥

॥ **अथधनभावः** ॥ वित्ताधिपइति । जन्मनिजन्मकालेजीवोबृहस्पतिर्वित्ताधि

Indira Gandhi National Centre for the Arts

जन्मन्यर्थावलोकीज्योऽब्देह्यब्देशोबलवान्यदा ॥ तदाधनाप्तिर्बहुलाविनायासेनजायते ॥ २ ॥ एवंयद्भावपोजन्मन्यब्देतद्भावगोगुरुः ॥ लग्नेशेनेत्थशालीचेत्तद्भावजसुखंभवेत् ॥ ३ ॥ तथाजनुषियंपश्येद्भावमब्देऽब्दपोगुरुः ॥ तदातद्भावजंसौख्यमुक्तंताजिकवेदिभिः ॥ ४ ॥ जन्मषष्ठाधिपःसौम्यःषष्ठोऽब्देस्वल्पलाभदः ॥ पापार्दितेगुरौरंध्रेऽर्थेवादंडःपतेद्ध्रुवम् ॥ ५ ॥ गुरुर्वित्तेशुभैर्दृष्टयुतोवाराज्यसौख्यदः ॥ जन्मन्यब्देचमुथहाराशिंपश्यन्विशेषतः ॥ ६ ॥

पोधनभावस्वामीअब्देवर्षेवित्तगोद्वितीयस्थानस्थितःसन्लग्नपतीत्थशालीवर्षलग्नस्वामिनासहमुथशिलयोगंकरोति तदासकलेऽपिसंपूर्णेपिवर्षेधनाप्तिर्धनप्राप्तिः स्यात् । यदाबृहस्पतिर्लग्नस्वामिव्यतिरिक्तेनक्रूरेसराफेपापग्रहेणईसराफयोगंकरोति तदासंपूर्णवर्षेधनादीनांहानिःस्यात् ॥ १ ॥ **अथद्वितीयंधनलब्धियोगमाह**-जन्मनीति । जन्मकालेबृहस्पतिरर्थावलोकीअर्थंद्वितीयभावमवलोकयतीतितादृशःसन् अब्देवर्षेअब्देशोवर्षस्वामीभूत्वायदाबलवान्बलिष्ठोभवेत् तदातस्मिन्वर्षेधनाप्तिर्बहुलाबहुप्रकारिकाविनायासेनप्रयत्नेनविनाधनाप्तिर्जायते॥ २ ॥ **अथपूर्वोक्तमर्थंसर्वभावेषुअतिदिशति**--एवमिति। एवममुनाप्रकारेणजन्मनिजन्मकालेगुरुर्बृहस्पतिर्यद्भावपोयद्यत्सहजादिभावस्वामी अस्ति । तादृशःसन्अब्देवर्षेतत्तद्भावगश्चेल्लग्नेशेनेत्थशालीलग्नस्वामिनासहमुथशिलीस्यात्तदातद्भावजंसुखंलभेत् ॥ ३ ॥ **अथपुनस्तदेवाह**-तथेति। तथातद्वज्जनुषिजन्मकालेगुरुर्बृहस्पतिर्यंभावंपश्येत्तादृशःसन्अब्देवर्षेअब्दपोगुरुर्बृहस्पतिस्तदातद्भावजंतद्भावसंबंधिसौख्यंताजिकवेदिभिरुक्तम् ॥ ४ ॥ **अथाल्पधनप्राप्तियोगंदंडयोगंचाह**-जन्मषष्ठाधिपइति। जन्मकालेषष्ठाधिपःषष्ठभावस्वामीसौम्योबुधःअब्देवर्षेलग्नेषष्ठःषष्ठभावगतस्तदास्वल्पफलदःस्यात् । गुरौपापार्दितेपापग्रहैःपीडितेसतिरंध्रेवर्षलग्नादष्टमभावगतेअथवाधनस्थेसतिध्रुवंनिश्चयेनदंडःराजकृतःपतेत् ॥ ५ ॥ **अथान्यधनलाभयोगमाह**-गुरुरिति। वित्तेधन

एवंसितेऽब्दपेभूरिद्रव्यंधान्यंचजायते ॥ वित्तलग्नेशसंयोगोवित्तसौख्यविनाशदः ॥ ७ ॥ एवंविधेसवीर्येस्याल्लिपिज्ञानोद्यमैर्धनम् ॥ जन्मलग्नगताःसौम्यावर्षेऽर्थेधनलाभदाः ॥ ८ ॥ मालसद्मनिवित्तेवाबुधेज्यसितसंयुते॥तैर्वादृष्टेधनंभूरिस्वकुलेराज्यमाप्नुयात्॥९॥

स्थानेगुरुर्बृहस्पतिःशुभैःशुभग्रहैर्दृष्टोयुक्तोवास्यात्तदाराज्यार्थसौख्यदःस्यात् । अयमेकोयोगः॥**अथान्यः**॥जन्मनिजन्मलग्नेअब्देचवर्षलग्नेमुथहाराशिंमुथहाक्रांतराशिंशुभग्रहःपश्यन्विशेषतःराज्यसौख्यदःस्यात् ॥ ६ ॥ **अथशुक्रयोगेनधनयोगंचाह**—एवमिति । पूर्वोक्तप्रकारेणासितःशुक्रःअब्दपोवर्षस्वामीसन्धनस्थानेशुभग्रहैर्दृष्टोयुतोवास्यात्तदाभूरिधनंधान्यंचजायतेभवतीत्यर्थः । तथाजन्मलग्नेवर्षलग्नेचमुथहाक्रांतराशौशुक्रेणदृष्टेयुक्तेवासतितदाविशेषतोधनधान्यंबहुतरंभवति ॥ **अथधननाशयोगः** ॥ धनभवनेधनभवनस्वामिवर्षलग्नस्वामिनौअनयोःसंयोगेएकराशाववस्थितौसतिवित्तसौख्यविनाशदःस्यात्। ननुइदमयुक्तंधनभवनलग्नेशयोर्धनभवनेसंयोगस्यशुभफलत्वेनोक्तत्वादितिचेदत्रायमाशयः। एकराशिसंयोगस्त्रिप्रकारकःतत्रएकःमुथशिलकृतयोगः द्वितीयःईसराफयोगःमुथशिलईसराफयोगभावेकेवलराशियोगस्तृतीयोयोगःएवंयोगत्रयमध्येकेवलराशियोगोमुथशिलयोगश्चशुभःवित्तसौख्यदःग्रंथांतरेशुभफलत्वेनोक्तत्वात् । अस्मिन्ग्रंथेप्यग्रेवक्ष्यामिउर्वरितस्तुईसराफस्तस्याशुभफलत्वादयंयोगस्त्वशुभउक्तइति ॥ ७ ॥ **अथान्योधनप्राप्तियोगावाह**—एवमिति । एवमुक्तरीत्याबुधेवर्षस्वामिनिसवीर्येबलिष्ठेधनभावस्थितेशुभग्रहैर्दृष्टेयुतेवातथाजन्मलग्नेवर्षलग्नेचमुथहाक्रांतराशौबुधेनदृष्टेयुतेवासतिलिपिज्ञानोद्यमैर्धनंस्यादयमेकोयोगः॥**अथान्यः**॥ जन्मकालीनलग्नगताःसौम्याःशुभग्रहाश्चेत्स्युस्तदावर्षेवर्षलग्नेअर्थेधनभावस्थाभवंतितदातेधनलाभदाःस्युः ॥ ८ ॥ **अथबहुधनप्राप्तियोगमाह**—मालसद्मनीति। यवनभाषयामालशब्देनधनं सद्मशब्देनसहमंएवं धनसहमेवित्तेवाधनभवनेवाबुधगुरुशुक्रसंयुतेअथवातैर्बुधगुरुशुक्रैर्दृष्टेसतिधनंभूरिस्वकुलेराज्यमाप्नुयात् ॥९॥

अथार्थसहमेशौचेच्छुभैर्मित्रदृशेक्षितौ ॥ बलिनोसुखतोलाभप्रदौ यत्नादरेर्दृशा ॥ १० ॥ मित्रदृष्ट्यामुथशिलेऽर्थांगयोःसुखतोधनम् ॥ तयोर्मुसरिफेवित्तनाशदुर्नयभीतयः ॥ ११ ॥ जन्मनीज्योऽस्तियद्राशौसराशिर्वर्षलग्नगः ॥ शुभस्वामीक्षितयुतोनैरुज्यस्वाम्यवित्तदः ॥ १२ ॥ सूतौलग्नेरविर्वर्षेधनस्थोधनसौख्यदः ॥ शनौवित्तेकार्यनाशोलाभोऽल्पोऽथधनव्ययः ॥ १३ ॥ भ्रातृसौख्यंगुरुयुतेभूतयःस्युःशुभेक्षणात् ॥ क्रूरयोगेक्षणात्सर्वंविपरीतंफलंभवेत् ॥ १४ ॥

अथापरंधनलब्धियोगमाह–अर्थार्थेति । अर्थार्थसहमेशौधनभवनस्वामिधनसहमस्वामिनौचेच्छुभैःशुभग्रहैर्मित्रदृष्ट्यादृष्टौतदासुखतोलाभप्रदौस्याताम् । यदाअरेर्दृशाशत्रुदृष्ट्यादृष्टौ तदालाभोयत्नाद्भवतीतिवाच्यम् ॥ १० ॥ **अथान्यौधनयोगौतन्नाशयोगावाह**–मित्रदृष्ट्येति । अर्थांगयोःअर्थशब्देनधनभावः । अंगशब्देनवर्षलग्नम् । अनयोःस्वामिनौतयोर्मित्रदृष्ट्यामुथशिलयोगेसतिसुखतःयत्नेनविनाधनंभवति । अथतयोर्धनाधीशलग्नाधीशयोःमूसरीफयोगेवित्तनाशःदुर्नयेनदुष्टनीत्याभीतिर्भवति अयमर्थस्तुपूर्वमेवव्यक्तीकृतः ॥ ११ ॥ **अथान्यंधनयोगमाह**–जन्मनीति । जन्मनिजन्मलग्नेईज्योबृहस्पतिःयद्राशौयस्मिन्राशौअस्तिसराशिर्यदिवर्षलग्नगःसन्शुभग्रहैःस्वामिनावादृष्टोयुक्तोवास्यात्तदानैरुज्यंस्वामित्वंवित्तंचस्यात् ॥ १२ ॥ **अथान्यौधनलाभधननाशयोगावाह**–सूताविति । सूतौजन्मकालेजन्मलग्नेरविःवर्षेधनभावस्थस्तदाधनसौख्यदःस्यात् । वित्तेधनभावेशनिश्चेत्तदाकार्यनाशादिकंस्यात् ॥ १३ ॥ **अथशनिदोष्टचापवादधननाशयोगावाह**–भ्रातृसौख्यमिति । धनभावस्थेशनौगुरुयुतेसतिभ्रातृजनितंसौख्यंस्यात् शुभेक्षणात् । तादृशंशनिंशुभग्रहाःपश्यंतितदाभूतयःऐश्वर्याणिस्युः । पूर्वोक्तसर्वेषुधनलाभयोगेषुधनयोगकारकान्ग्रहानतिक्रूरयोगेक्षणात्पापग्रहयोगेसति अथवादृष्टेसतितदाविपरीतं

वित्तेशोजन्मनिगुरुवर्षेवर्षेशतांदधत् ॥यद्भावगस्तमाश्रित्यलाभदो लग्नआत्मनः ॥ १५ ॥ वित्तेसुवर्णरूप्यादेर्भ्रात्रादेःसहजर्क्षगः ॥ पितृमातृक्षमादिभ्योवित्तंसुहृदिपंचमे ॥ १६ ॥ सुहृत्तनयतःष ष्ठेऽरिवर्गाद्धानिभीतिदः ॥ स्त्रीभ्योद्यूनेऽष्टमेमृत्युरर्थहेतुःपथोऽक गे ॥ १७ ॥ खेनृपादेर्नृपकलादायेंऽत्येव्ययदोभवेत् ॥ इत्थंविमृ श्यसुधियावाच्यमित्थंपरेजगुः ॥ १८ ॥ इतिधनभावविचारः ॥ ॥ ॥ अथसहजभावविचारः ॥ अब्देशेऽर्केसितेवापिसबलेपापव र्जिते ॥ सौख्यंमिथःसोदराणांव्यत्ययाद्व्यत्ययंवदेत् ॥ १ ॥

सर्वफलंभवेत् धनहानिरित्यर्थः ॥ १४ ॥ अथजन्मकालेधनभावाधिशस्यगुरोर्व र्षलग्नादिद्वादशभावस्थानफलंश्लोकचतुष्टयेनाह—वित्तेशइति । यदिजन्म निजन्मलग्नेगुरुर्बृहस्पतिर्वित्तेशोधनभावस्वामीसन्वर्षेवर्षकालेवर्षेशतांवर्षस्वामि तांदधत्प्राप्तःसन्यद्भावगःयस्मिन्भावेतिष्ठातितंभावंआश्रित्यलाभदोभवति तद्भा वफलंददातीत्यर्थः । तदेवविशदयति । लग्नइति । लग्नेवर्तमानःसन्आत्म नःशरीरस्यपुष्टिंकरोति ॥ १५ ॥ वित्तेधनभावेसुवर्णरूप्यादेर्वृद्धिः । सहज र्क्षगस्तृतीयभावगोभ्रात्रादेःसुखंकरोति सुहृदिचतुर्थभावेपितृमातृक्षमाक्षेत्रं आदि शब्देनग्रामादिकमेतज्जनितंसुखम् । पंचमेपंचमभावे ॥ १६ ॥ सुहृत्तनयतः सुखं षष्ठेषष्ठभावेऽरिवर्गात् शत्रुसमूहाद्धानिः । अतिभीतिदः । द्यूनेसप्तमभ वनेस्त्रीभ्यःसुखम् अष्टमेअष्टमभावेमृत्युः अंकगेवर्षभावेअर्थहेतुःधनार्जकःपथो मार्गः ॥ १७ ॥ खेदशमभावेनृपादेःराज्ञःसकाशात्भाग्यवृद्धिः आयेएकाद शभावेनृपकुलाद्धनवृद्धिः अंत्येद्वादशभावेव्ययदोभवेत् । सुधियाइत्थममुना प्रकारेणविमृश्यविचार्यवाच्यंवक्तव्यमित्यपरेआचार्याजगुरुक्तवंतः ॥ १८ ॥ इतिधनभावविचारः ॥ ॥अथतृतीयभावविचारः॥ तत्रसहजसंबंधिशुभा शुभफलमाह—अब्देशेऽर्केइति । अब्देशेवर्षस्वामिनिअर्केसूर्येसतिसितेवाशुक्रे वासतिसबलेबलिष्ठेसतिपापवर्जितेपापग्रहयोगदृष्टिरहितेसतिसोदराणामेकोदरप्र सूतानांभ्रातॄणांमिथःपरस्परंसौख्यंस्यात् । व्यत्ययादिति । व्यत्ययादुक्तवैपरी

दग्धेकलिःसहजपेऽब्दपतौतयोर्वाजीवेबलेनरहितेसहजेसहोत्थैः॥ वैरंतृतीयभवनाधिपतीसराफे मांद्यंकलिंस्वजनसोदरतश्चविंद्यात् ॥ २ ॥ यदेत्थशालःसहजेश्वरेणगुरुस्तृतीयेसहजात्सुखाप्तिः ॥ सारेविधौस्यात्कलहस्तृतीयेदृष्टौयुतौनोगुरुणायदातौ ॥ ३ ॥ सहजेसहजाधीशेऽधिकारिणिसमापतेः ॥ लग्नपोवामुथशिलेमिथः सौख्यंसहोत्थयोः ॥ ४ ॥ क्रूरेसराफेकलहःशनौभौमर्क्षगेरुजः ॥ ज्ञर्क्षेस्त्र्यनुजेमांद्यंवदेत्सहजगेस्फुटम् ॥ ५ ॥

स्यात् तद्यथासूर्येशुक्रेवावर्षस्वामिनिनिर्बलेसतिपापग्रहैर्युतेदृष्टेवासातिऽयत्स्ययंभ्रातृणांपरस्परंविरोधादिकंवदेत्कथयेत् ॥ १ ॥ **अथान्यदाह**—दग्धेकलिरिति । सहजपेतृतीयभावस्वामिनिअब्दपतौवर्षस्वामिनिसातिदग्धेअस्तंगतदुष्टस्थानादिदोषसहितेसातिकलिर्युद्धादिनाकलहःस्यात् । तयोर्वेतितयोःसूर्यशुक्रयोर्वामध्येकश्चिदेकोवर्षस्वामीभूत्वादग्धश्चेद्भवति उदाकलिःस्यात् । जीवइति सहजेतृतीयभावेबलेनरहितेनिर्बलेजीवेगुरौसति सहोत्थैर्भ्रातृभिःसहवैरंस्यात् । तृतीय इति वर्षस्वामीतृतीयभावस्वामिनासहइसराफयोगंचेत्करोति । तदामांद्यंशरीरे कष्टंस्वजनतःसुहृद्वर्गतः सोदरतःसाक्षाद्भ्रातृतः कलिंविंद्यादाप्नुयात् ॥ २ ॥ **अथान्यदाह**—यदेति । यदावर्षलग्नस्वामिनावर्षस्वामिनावासहजेश्वरेणतृतीयभावस्वामिनासहइत्थशालः मुथशिलयोगश्चेत्तदासहजात्भ्रातुःसकाशात्सुखाप्तिःस्यात् । अथवा गुरुर्बृहस्पतिस्तृतीयेतदापिभ्रातृतःसुखाप्तिः । सारइति तृतीयेतृतीयभावेविधौचंद्रेसारेआरेणभौमेनसहविद्यमानेसारेभौमयुक्तेचंद्रेसतिगुरुणायुक्तौदृष्टौवानभवतः तदाभ्रातृभिःसहकलहःस्यात् ॥ ३ ॥ **अथान्यौभ्रातृसौख्ययोगावाह**—सहजइति । सहजेतृतीयभावेस्वामिसंयुक्तेसहजस्वामिनासंयुक्तेअधिकारिणिपंचाधिकारिणांमध्येएकाधिकारीभूत्वासहजभावंस्वामीसन्सहजभावेतिष्ठतीत्यर्थः । तादृशेनसहजसमापतेर्वर्षस्वामिनोलग्नपोवावर्षलग्नस्वामिनोवामुथशिलयोगश्चेत्करोति तदासहोत्थयोर्भ्रात्रोर्मिथःपरस्परंसौख्यंस्यात् ॥ ४ ॥ **अथभ्रातृदौष्ट्ययोगावाह**—क्रूरेसराफइति । क्रूरेपापग्रहेईसराफेसहजभाव

मंदर्क्षगेऽसृजिबुधेकुजर्क्षेसहजेशुभैः ॥ युतेक्षितेसोदराणांमिथः सौख्यंसुखंबहु ॥ ६ ॥ जन्माब्दपौबुधसितौसबलौतृतीयेसोदर्य बंधुगणसौख्यकरौगुरुश्च ॥ वीर्यान्वितेंदुगृहगोभृगुजोऽधिकारी सूत्यब्दयोःसहजबंधुगणस्यवृद्ध्यै ॥ ७ ॥

स्वामिनासहईसराफयोगंचेत्करोति तदाभ्रातृणांपरस्परंकलहःस्यात् । तथाशनौ भौमर्क्षगेमेषवृश्चिकराशिस्थितेसहजभावेसति भ्रातरिरुजोरोगाःस्युः । तथा असृजिभौमेज्ञर्क्षमिथुनकन्याराशिस्थितःसन्सहजगेसहजभावस्थितेसति अनुजेभ्रातरिस्फुटंनिःशंकंमांद्यंरोगादिकंभवेत्कथयेत् ॥ ५ ॥ **अथान्यद्भ्रातृसौख्ययोगमाह**–मंदर्क्षगइति । असृजिभौमेमंदर्क्षगेमकरकुंभराशिस्थितःसन्सहजेभ्रातृभावेसतितथाबुधेकुजर्क्षेमेषवृश्चिकराशिस्थेसति । सहजभावगेएवंयोगद्वयेपिशुभैःशुभग्रहैर्युतेईक्षितेवादृष्टेसतिसोदराणामेकोदरप्रसूतानांभ्रातृणांमिथः परस्परंबहुसुखंस्नेहश्चस्यात् । अयमेकोयोगइतियेवदंतितन्नसंभवति । मंदकुजयोर्भिन्नराशिस्थयोरेकस्थानस्थितत्वासंभवात् ॥ ६ ॥ **अथान्यंभ्रातृसौख्ययोगद्वयंचाह**–जन्माब्दपानिति । जन्मकालवर्षकालयोर्बुधशुक्रौसबलौसहजभावगौचेत्स्यातां गुरुश्चतथागुरुबृहस्पतिःबलिष्ठःसन्सहजभावेतिष्ठतितदासोदर्यौभ्राताबंधुगणस्तद्भिन्नाःपितृव्यपुत्रादयस्तेषांसौख्यकरौसौख्यकरश्चस्यात् ॥ अयमेकोयोगः ॥ वस्तुतस्तुजन्मनिलग्नेऽथबुधेत्वधिकारिणीतिसमरवाक्येजन्मनि अर्थात्जन्मलग्नेवर्षलग्नेबुधेशुक्रेवाधिकारवतिगृहहद्दाद्यधिकारवतिसोदरेषुवृद्धिः अतएवजन्माब्दयोर्बुधसितौसबलेतृतीयेतियुक्तःपाठः ॥ उक्तंचसमरसिंहेन जन्मनिलग्नेऽथबुधेत्वधिकारिणिसोदरेषुवृद्धिःस्यात् । योगसुधानिधौ उभयत्रबुधेऽधिकारयुक्तेसहजस्थेप्यथबंधुवृद्धिरुक्ताइति । जन्माब्दपाइतिपाठमंगीकृत्यव्याख्यातंतत्रजन्माब्दपौजन्मलग्नवर्षलग्नस्वामिनौतन्नशब्दार्थाभावात् तादृगर्थेसंमतेरभावात् ॥ **अथान्यः** ॥ सूत्यब्दयोर्जन्मकालवर्षकालयोरधिकारीसन्भृगुजः शुक्रोबलिनश्चंद्रस्याधिष्ठितराशौस्थितः सहजबंधुगणस्यवृद्ध्यैभवति ॥ ७ ॥

पापान्वितेतुसहजेसहमेशभावनाथेक्षणेनरहितेसहजस्यदुःखम् ॥ एवंसहोत्थसहमेऽपिवदेत्तदीशौदग्धौयदासहजनाशकरौविचिंत्यौ ॥ ८ ॥ तृतीयपादब्दपतौद्युनस्थेलग्नेश्वरेवासहजैर्विवादः ॥ तृतीयपोजन्मनितादृगब्देशुभेक्षितस्तत्रसहोत्थतुष्टचै ॥ ९ ॥ इतिसहजभावविचारः ॥ ॥ अथचतुर्थभावविचारः ॥ तुर्येरवींदू पितृमातृपीडापापान्वितौपापनिरीक्षितौच ॥ जन्मस्थसूर्यर्क्षगतेऽर्कपुत्रेऽवमाननावैरकलीचपित्रा ॥ १ ॥

अथसहजेदुःखकरयोगानाह–पापान्वितइति । सहजेसहजभावेपापान्विते युक्तेसतिसहमेशः भ्रातृसहमस्वामीभावनाथसहजभावस्वामीअनयोरीक्षणेनरहितेतयोर्दृष्टचभावेसतिसहजस्यदुःखंस्यात् एवमिति । एवममुनाप्रकारेणसहोत्थसहमेपिभ्रातृसहमेपापग्रहैर्युक्तेभ्रातृसहमस्वामीभ्रातृभावस्वामीचाभ्यामदृष्टेसतिसहजेदुःखंवदेत् तदीशाविति । तदीशौभ्रातृसहमस्वामिनौभ्रातृभावस्वामिसहमस्वामिनौयदादग्धौअस्तंगतादिदोषसहितौस्यातां तदाभ्रातृणांनाशकरौविचिंत्यौ॥८॥

अथसहजानामशुभाशुभयोगावाह–तृतीयपादिति । तृतीयपात्सहजभावस्वामिनःसकाशात्अब्दपतौवर्षस्वामिनिद्युनस्थेसप्तमस्थे अथवालग्नेश्वरेवर्षलग्नस्वामिनिसहजभावस्वामिनःसकाशात्सप्तमस्थेसति सहजैःसहविवादःकलहःस्यात् ॥ अयमशुभयोगः ॥ **अथशुभयोगः** ॥ जन्मनिजन्मकालेतृतीयपःतृतीयभावस्वामीतत्रसहजभावेस्थितःसन्शुभेक्षितेशुभग्रहैर्दृष्टेसति तादृगब्देवर्षलग्नेसहजभावेस्थितःसन् शुभेक्षितश्चेत्तदासहोत्थतुष्टचै सोदराणांसंतोषायभवति ॥९॥ इतिसहजभावविचारः ॥ **अथचतुर्थभावविचारः** ॥ तुर्यइति । तुर्ये चतुर्थभावेरविःपापग्रहैर्युतः पापदृष्टोवातदापितुःपीडा एवंविधुश्चंद्रश्चेत्तदामातुःपीडास्यात्द्वयोःस्थित्याउभयोरपिपीडास्यादित्यर्थः । अयमेकोयोगः ॥अथान्यः॥ जन्मस्थसूर्यर्क्षगतेऽर्कपुत्रेजन्मकालेसूर्योयस्मिन्राशावस्तितस्मिन्राशौवर्षेशनिश्चेत्तदाअवमाननालोकेभ्यःपितुर्मानहानिःस्यात् । पित्रासहवैरकलीस्याताम् ॥१॥

चंद्रेजनन्यैवमुशंतिबंधौसुखाधिपेप्रीतिसुखानिपित्रोः ॥ तुर्याधिपेलग्नपतीत्थशालेवीर्यान्वितेसौख्यमुशंतिपित्रोः ॥ २ ॥ सौख्याधिपोजनुषिनष्टबलोऽब्दसूत्योःपित्रोरनिष्टकृदथोसहमेतयोस्तु ॥ दग्धेतुरीयगृहगेचयदींथिहायांनाशस्तयोःसहमयोरपिदग्धयोःस्यात् ॥ ३ ॥ जन्मन्यंबुगृहंयच्चतत्पतिस्तत्पदोपगौ ॥ शन्यारौक्लेशदौपित्रोर्नचेत्सौम्यनिरीक्षितौ ॥ ४ ॥ मातुःपितुश्चसहमेतनुपेत्थशालेतुर्येपिचेत्थमवगच्छसुखानिपित्रोः ॥ चेदष्टमाधिपतिनाकृतमित्थशालंपित्रोर्विपद्भयमनिष्टकृतेसराफे ॥ ५ ॥

अथान्यदाह ॥ एवमनयारीत्याचंद्राक्रांतराशौशनौसतिजनन्यामात्रासहवैरकलीस्याताम् । अथबंधौचतुर्थस्थानेसुखाधिपेचतुर्थभावस्वामिनिसतिमातापित्रोः प्रीतिसुखान्युशंतिवदंति । अथतुर्याधिपेचतुर्थभावस्वामिनिवीर्यान्वितेबलिष्ठेवर्षलग्नस्वामिनासहमुथशिलेसतिपित्रोःसौख्यमुशंति ॥ २ ॥ **अथपित्रोरनिष्ठयोगानाह**–सौख्येति । जनुषिजन्मकालेसौख्याधिपःचतुर्थभावस्वामीअब्दसूत्योर्वर्षकालजन्मकालयोःनष्टबलःचतुर्थभावस्वामीनष्टबलश्चेत्तदापित्रोर्मातापित्रोरनिष्टकृत्दुःखंकरोति अथोइति। तयोर्मातापित्रोःसहमेदग्धेक्रूरग्रहैःपीडितेसति यदिमुथहायाःसकाशात्तुरीयगृहेचतुर्थस्थानस्थेसतितदातयोर्मातापित्रोर्नाशः स्यात । तथातयोर्मातापित्रोःसहमयोरपिदग्धयोरस्तंगतादिदोषाक्रांतयोःसतोःपित्रोर्नाशःस्यात्॥ ३॥ **अथपित्रोःक्लेशयोगावाह**–जन्मनीति। जन्मनिजन्मकालेयदंबुगृहंचतुर्थस्थानंयश्चतत्पतिश्चतुर्थस्थानपतिश्चतुर्थस्थानचतुर्थस्थानस्वामिनौतत्पदोपगौशन्यारौतयोः पदंस्थानंतत्रगतौशनिभौमौशुभग्रहैर्युतौदृष्टौवाचेन्नतदा पित्रोःक्लेशदौ ॥ ४ ॥ **अथशुभाशुभयोगावाह**--मातुरिति । मातुःपितुश्चसहमेतनुपेत्थंशालेवर्षलग्नस्वामिना इत्थशालेमुथशिलयोगेकृतेसति पित्रोःसुखान्यवगच्छजानीहि इत्थमसुनाप्रकारेणतुर्येपिचतुर्थभावेवर्षलग्नस्वामिनाकृतेमुथशिलयोगेसतिपितुःसुखान्यवगच्छ ॥ अयमेकोयोगः ॥ **अथशुभयोगः** ॥ मातृपितृसहमेअष्टमाधिपतिनावर्षलग्नादष्टमभावस्वामिनाचेत्कृतमित्थशालंमुथशिल

इतिचतुर्थभावः ॥ ॥ अथपंचमभावविचारः ॥ पुत्रायगोवर्षपतिर्गुरुश्चेत्सूर्यारसौम्योशनसोऽथवेत्थम् ॥ सत्पुत्रसौख्यायखलार्दिता स्तेदुःखप्रदाःपुत्रतएवचिंत्याः ॥ १ ॥ पुत्रेसुतस्यसहमेसबलेसुताप्तिःसौम्येक्षितेऽप्यतिसुखंयदितत्रवर्षेट् ॥ सौम्येक्षितःसुतगृहेसकुजोबुधश्चेत्पुत्रायगःसुतसुखंविबलःसुतार्तिम् ॥ २ ॥ जीवोजन्मनियद्राशावब्देसौसुतगोबली ॥ पुत्रसौख्यायभौमोज्ञोवर्षेशोऽत्र सुताप्तिदः ॥ ३ ॥

योगेकृतेसातिपित्रोर्विपत्स्यात् । अनिष्टखगेसराफेयदिमातृपितृसहमेशत्रुकृतईसराफयोगेसतिपित्रोर्विपत्स्यात् ॥ ५ ॥ इतिचतुर्थभावः ॥ **अथपंचमभावः॥**

अथपुत्रसंबंधिशुभाशुभफलमाह--पुत्रायगइति । चेद्वर्षपतिवर्षस्वामीगुरुर्बृहस्पतिःपुत्रायगःपंचमैकादशस्थानस्थितश्चेत्तदासत्पुत्रसौख्यायभवेत् । अथवा सूर्यःआरोभौमःसौम्योबुधःउशनाशुक्रःएषांमध्येयःकश्चिद्वर्षस्वामीग्रहःसन्पंचमैकादशस्थानस्थितोवास्यात्तदेत्थंसत्पुत्रसौख्यकरइत्यर्थः । अथतेग्रहाःगुरुसूर्यभौमबुधशुक्राःखलैःपापग्रहैरर्दिताःपीडिताश्चेत्स्युस्तदापुत्रतएवदुःखप्रदाश्चिंत्याः ॥ १ ॥ **अथपुत्रप्राप्तियोगावाह**--पुत्रइति । पुत्रेपंचमभावेसुतस्यसहमेपुत्रसहमेसबलेबलिष्ठेसतिसुताप्तिःपुत्रप्राप्तिःस्यात् ॥ यदितत्रपंचमभावेवर्षेट्वर्षस्वामीसौम्येक्षितोपिशुभग्रहैर्दृष्टेसतिअतिसुखंस्यादयमेकोयोगः ॥ **अथान्यः॥** सकुजेबुधःभौमयुक्तोबुधश्चेत्शुभग्रहेशुभग्रहाणांचंद्रबुधगुरुशुक्राणांराशौकर्कमिथुनकन्याधनुर्मीनतुलानांमध्येयस्मिन्कस्मिंश्चिद्राशौस्थितःसन्सौम्येक्षितशुभग्रहैर्दृष्टःसन्पुत्रायगःपंचमैकादशस्थानस्थितःसुतसुखंपुत्रसुखंकरोति । चेद्भौमयुक्तेबुधोविबलोनिर्बलःप्रोक्तस्थानेषुचेन्नतदासुतार्तिःसुतस्यपुत्रस्यआर्तिंरोगंकरोति ॥२॥ **अथान्यौपुत्रप्राप्तियोगावाह**-जीवइति । जन्मनिजन्मकालेजीवोबृहस्पतिर्यद्राशौयस्मिन्राशौवास्तिसराशिरब्देवर्षकालेसुतगःपंचमस्थानेस्थितःसन्बलीबलिष्ठश्चेद्भवतितदापुत्रसौख्यायभवति॥ अयमेकोयोगः॥ **अथान्यः॥**भौमोबुधोवाव

Indira Gandhi National Centre for the Arts

यत्रेज्योजनुषिगृहेविलग्नमेतत्पुत्राप्त्यैबुधसितयोरपीत्थमूह्यम् ॥ यद्राशौजनुषिशनिःकुजश्चसोऽब्देपुत्रार्तिंतनुसुतगःकरोतिनूनम् ॥ ४ ॥ पुत्रेपुण्यस्यसहमंपुत्राप्त्यैशुभदृष्टियुक् ॥ लग्नपुत्रेश्वरौपुत्रेपुत्रदौबलिनौयदि ॥ ५ ॥ चंद्रोजीवोऽथवाशुक्रःस्वोच्चगःसुतदःसुते ॥ वक्रीभौमःसुतस्थश्चेदुत्पन्नसुतनाशनः ॥ ६ ॥ सुताधिपोजन्मनिभार्गवोऽब्देपुत्रेविलग्नाधिपतीत्थशाली ॥ पुत्रप्रदोमंदपदस्थपुत्रेपापाधिकारीक्षितआत्मजार्तिः ॥ ७ ॥

षेशःसन्अत्रपंचमभावेसतितदासुतातिदः॥३॥**अथपुत्रप्राप्तिपुत्रदौष्टययोगावाह**--यत्रेज्यइति।जनुषिजन्मकालेयत्रयस्मिन्स्थानेईज्योबृहस्पतिरस्ति तत्स्थानंवर्षकालेविलग्नगृहंचेत्लग्नस्थानंचेत्स्यात् तदापुत्राप्त्यैपुत्रप्राप्त्यैभवति इत्थमनुनाप्रकारेणबुधसितयोरप्यूह्यम्।यथाबुधःशुक्रोवायस्मिन्राशौतिष्ठतिसराशिर्वर्षकालेलग्नस्थोभवेत्तदापुत्राप्त्यैभवति॥अयंशुभयोगः॥**अथाशुभयोगः**॥जनुषिजन्मकालेयद्राशौयस्मिन्राशौशनिःकुजश्चस्यात्सराशिरब्देवर्षकालेतनुसुतगोभवेत् । तद्यथा–जन्मकालीनशन्याक्रांतराशिर्जन्मकालीनभौमाक्रांतराशिर्वा वर्षेलग्नगोभवति अथवावर्षलग्नात्पंचमस्थानेजन्मकालीनशन्याक्रांतराशिभौमाक्रांतराशिर्वास्यात्अथवाद्वयोरेकत्रावस्थानंस्यात्तदानूनंनिश्चयेनपुत्रार्तिंपुत्रपीडांकरोति॥ ४ ॥ **अथान्यंसुतप्राप्तियोगमाह**--पुत्रइति । पुत्रेवर्षलग्नात्पंचमस्थानेपुण्यस्यसहमंशुभग्रहैर्दृष्टंयुक्तंवास्यात्तदापुत्राप्त्यैपुत्रप्राप्तयेभवति ॥अयमेकोयोगः ॥ **अथान्यः**॥ पुत्रेवर्षलग्नात्पंचमस्थानेवर्षलग्नस्वामिपंचमभावस्वामिनौयदिबलिनौचेत्तिष्ठतस्तदापुत्रदौभवतः॥५॥**अथशुभाशुभयोगावाह**–चंद्रइति । सुतेवर्षलग्नात्पंचमस्थानेचंद्रोबृहस्पतिर्वाशुक्रोवास्वोच्चगतःसन्चेत्तिष्ठति तदासुतदःपुत्रप्राप्तिंकरोति । अयंशुभयोगः ॥ **अथाशुभयोगः** ॥ वक्रीति । वक्रीभौमःसुतस्थःवर्षलग्नात्पंचमस्थानेचेत्तिष्ठतितदाउत्पन्नसुतनाशनः ॥६॥ **अथपुत्रप्राप्तितन्नाशयोगावाह**–सुताधिपइति । जन्मनिजन्मकालेसुताधिपः पंचमभावस्वामीभार्गवःशुक्रःअब्देवर्षकालेपुत्रेपंचमस्थानेसन् विलग्नाधिपतीत्थशालःवर्षल

यद्राशिगोग्रहःसूतौसराशिस्तत्पदाभिधः ॥ बलीजन्मोत्थसौख्यायवर्षेतद्दुःखदोऽन्यथा॥८॥ इतिपंचमभावः ॥ ॥ अथषष्ठभावविचारः॥मंदेऽब्दपेऽनृजुगतौपतितेरुगार्तिःस्यात्सन्निपातभवभीररिगेऽत्रशूलम् ॥ गुल्माक्षिरोगविषमज्वरभीर्गुरौतुपापार्दितेऽनिलरुजोपिकबूलशून्ये ॥ १ ॥ स्यात्कामलाख्यरुगपीत्थमसृज्यसृग्भीःपित्तंचरिःफगरवौदृशिशूलरोगः ॥ पित्तंपुनारिपुगृहेऽत्रभृगौनृभेऽरौश्लेष्माभयेक्षितयुतेऽपिकफोऽरिगेंदौ ॥ २ ॥

मस्वामिनासहमुथशिलयोगश्चेत्तदापुत्रदोभवति ॥ अयंसुतप्राप्तियोगः ॥ **अथाशुभयोगः** । जन्मकालेमंदपदस्थपुत्रेमंदःशनिःतस्यपदंस्थानंअत्रवर्षेचेत्पंचमंभवेत् । पापाधिकारीपापग्रहःपंचाधिकारिणांमध्येवर्तमानःसन्नईक्षितदृष्टेसति आत्मजार्तिःआत्मजःपुत्रस्तस्यार्तिःपीडास्यात् ॥ ७ ॥ **अन्यदाह**—यद्राशिग इति । सूतौजन्मकालेयद्राशिगोग्रहःयोग्रहःयस्मिन्राशौतिष्ठति सराशिस्तस्य पदाभिधःस्थानवाच्यः । **फलमाह**—बलीति । सराशिर्वर्षेतद्भावगःसन्बली चेत्तदाजन्मोक्तसौख्यायजन्मकालीनतद्भावोत्थशुभफलदोभवति अन्यथातद्दुःखदःवर्षेउक्तस्थानस्थितराशिर्निर्बलश्चेत्तदातद्भावजनितशुभमशुभंस्यादित्यर्थः ॥ ८ ॥ इतिपंचमभावविचारः ॥ **अथषष्ठभावविचारः** ॥ मंदेऽब्दपइति । मंदेशनौअब्दपेवर्षस्वामिनि । अनृजुगतौवक्रिणिपतितेपापग्रहैःपीडितेअरिगेषष्ठस्थानगतेसतिरुगार्तिःरोगेणआर्तिःपीडास्यात् सन्निपातोवातपित्तकफात्मकःएवं युगपदेवदोषत्रयस्यउत्पत्तिस्तदुद्भवाभीर्मरणंशूलंशूलपीडागुल्ममुदररोगः । अक्षिरोगोविषमज्वरःएभ्योरोगेभ्योभीर्भयंस्यात् । एवंगुरौवर्षस्वामीभूत्वाषष्ठस्थानगेवक्रिणिपापार्दितेसत्यपिकंबूलशून्येचंद्रमसासहकंबूलयोगरहितेसत्यनिलरुजोवातरोगाःस्युः ॥ १ ॥ **अथान्यदशुभफलमाह**—स्यादिति । स्यात्कामलाख्यरुगपीतिपूर्वेणसंबंधः इत्थमिति । अमुनाप्रकारेणअसृजिभौमेवर्षस्वामिनिषष्ठगेपतितेवक्रिणिसतिअसृग्भीःरक्तविकाराख्योरोगः । रवाविति रवौवर्षस्वामिनिषष्ठस्थेपतितेपित्तंस्यात् । रिःफगरवौताद्दशरवौद्वादशस्थेदृशिनेत्रेशूलरोगःस्यात् तथा

एवंबुधेपापयुतेऽब्दपेऽरौवातोत्थरोगोजनिलग्ननाथः ॥ पापोऽब्दपेनक्षुतदृष्टिदृष्टोरोगप्रदोमृत्युकरःसपापः ॥ ३ ॥ सूत्यार्किभेलग्नगतेरुक्षशीतोष्णरुग्भयम्॥शनीक्षितेयाप्यतास्यात्सपापेमृत्युमादिशेत् ॥ ४ ॥ एवंभौमेक्षुतदृशारक्तपित्तरुजोऽग्निभिः ॥ ततोऽन्येबहुलारोगाःशुभदृष्टौरुगल्पता ॥ ५ ॥ लग्नाधिपाब्दपतिषष्ठपतीत्थशालेरोगप्रदःखचरधातुविकारतःस्यात् ॥ कांदर्पिकामयभयंपतितेसितेऽर्कस्थानेऽथषष्ठइहरुक्सहमंसपापम् ॥ ६ ॥

तादृशेभृगौशुक्रेरिपुगतेषष्ठस्थेपुनःपित्तरोगः स्यात् । यदानृभेनरराशौअरौषष्ठेतत्रास्थितेशुक्रेभयेक्षितयुतेपिभयेनषष्ठभावस्वामिनादृष्टेयुक्तेपिश्लेष्माख्योरोगःस्यात् एवंविधेचंद्रेऽरौषष्ठस्थानगेसतिकफसंबंधीरोगःस्यात् ॥ २ ॥ **अथबुधस्यफलमाह**–एवामिति । एवममुनाप्रकारेणबुधेऽब्दपेवर्षस्वामिनिभूत्वा अरौषष्ठस्थानेपापग्रहैर्युक्तेवक्रिणिसतिवातजानितरोगःस्यात् । जनीति जनिलग्ननाथः जन्मकालीनलग्नस्वामीपापग्रहःसन्अब्दपेनवर्तमानवर्षस्वामिनाक्षुतदृष्टिदृष्टश्चतुर्थदशमैकसप्तमदृष्ट्यादृष्टस्तदारोगप्रदःस्यात् सपापोमृत्युकरःसजन्मकालीनलग्नस्वामीपापग्रहःसन्वर्षकालेपापग्रहयुक्तोवर्षस्वामिनाक्षुतदृष्ट्यादृष्टोमृत्युप्रदःस्यादित्यर्थः ॥३॥ **अथशनिकृतारिष्टयोगमाह**–सूत्यार्किभइति । सूतौजन्मकालेआर्किभेशन्याक्रांतराशौलग्नगतेवर्षकालीनलग्नस्थेसतिरुक्षशीतोष्णरुग्भयंस्यात् यदिजन्मकालीनशन्याक्रांतराशौवर्षकालेशनिनाक्षुतदृशादृष्टेसतिमृत्युमादिशेत् ॥ ४ ॥ **अथभौमकृतारिष्टयोगमाह**–एवमिति । एवममुनाप्रकारेण जन्मकालेभौमोयस्मिन्राशौतिष्ठतिसराशिर्यदिवर्षेवर्षकालीनलग्नगतोभवेत् भौमक्षुतदृशाभौमेनक्षुतदृष्ट्यादृष्टश्चेत्तदारक्तेत्यादिरोगाःइत्यंतंफलंस्पष्टम् । सलग्नगतराशिःशुभग्रहैर्दृष्टश्चेत्तदारोगाल्पतास्यात् ॥५॥ **अथान्यदरिष्टयोगमाह**–लग्नाधिपेति । लग्नाधिपःवर्षलग्नस्वामी अब्दपतिर्वर्षस्वामी षष्ठपतिःषष्ठभावस्वामी अनयोःपरस्परमित्थशालोमुथशिलयोगश्चेत्तदाखचरग्रहयुक्तेचेत्स्यात्तदापिमदनसंबंधीरोगःस्यात् । जन्मकालेशुक्रोयस्मिन्राशावस्तिसराशिर्वर्षकाले

सपापेगुरौरंध्रगेलग्नआरेसतंद्रास्तिमूर्च्छांगनाशःसचंद्रे ॥ खलाः सूतिकेंद्रेऽब्दलग्नेरुगाप्त्येकफोद्यंघ्रिगैरीक्ष्यमाणेसितेस्यात् ॥ ७॥ दिनेऽब्दप्रवेशोविलग्नेऽब्दसूत्योर्यदादृक्कहद्दागृहाद्योऽधिकारः ॥ रवेर्वाकुजःस्यात्रपीडाज्वरात्स्याद्दृशासौम्यखेटोत्थयान्तेसुखाप्तिः ॥ ८ ॥ निशिसूतौवर्धमानेचंद्रेभौमेत्थशालतः ॥ रुग्नश्येदेधतेमंदेत्थशालाद्व्यत्ययोऽन्यथा ॥ ९ ॥

षष्ठोभावःस्यात्तस्मिन्भावेसूर्येसति तथाशुक्रेपतितेषष्ठाष्टमद्वादशस्थानान्यतमस्थे सति कांदर्पिकामयभयंमदनसंबंधीरोगःस्यात् । अयमर्थोमूलवाक्यानुसारेण तद्वाक्यंच शुक्रस्थानइत्यादि ॥ ६ ॥ अथान्यौरोगोत्पत्तियोगावाह-सपापइति । सपापेपापग्रहयुक्तेगुरौरंध्रगेवर्षलग्नादष्टमस्थानेसति आरेभौमेलग्नेसति सतंद्रास्ति । मूर्छातंद्राआलस्यंतत्सहितामूर्छाचेष्टाराहित्यंभवति सचंद्रे चंद्रयुक्तभौमेलग्नस्थे पुनश्चंद्रयुक्तपापयुक्तगुरावष्टमस्थेसति अंगनाशःकुत्रचिदंगस्यविशेषेणनाशःस्यादयमेकोयोगः ॥ अथान्यः ॥ सूतिकेंद्रंसूतौजन्मकालेयानिचत्वारिकेंद्राणितेषुखलाःपापग्रहाःस्युस्तेअब्देलग्नेवर्षकालीनलग्नेस्युः । तदारुगाप्त्यैरोगप्राप्त्यैभवंति तथासितेशुक्रेद्व्यंघ्रिगैर्नरराशिस्थितैःपापग्रहैरीक्षमाणेदृष्टेसतिकफोत्पात्तिःस्यात्॥ ७ ॥ अथान्यदाह-दिनइति । दिनेदिवसेप्रवेशोवर्षप्रवेशःस्याद्यदाविलग्नेऽब्दसूत्योर्वर्षकालजन्मकालयोर्लग्नस्थस्यरवेःसूर्यस्य वाकुजस्यभौमस्यवादृक्कोद्रेष्काणःहद्दास्वगृहाधिकारःप्राप्तःस्यात्तदात्रवर्षेज्वरात्पीडास्यात् । अयमर्थः पंचाधिकारिणांमध्येअधिकारीभूत्वासूर्येभौमेवालग्नेसति ज्वरात्पीडास्यादित्यर्थः । दृशासौम्यखेटोत्थयात्रतादृशिलग्नेशुभग्रहैर्दृष्टेसतिअंते परिणामेसुखाप्तिःस्यात् ॥ ८ ॥ अथरोगनाशरोगोत्पत्तियोगावाह-निशीति । निशिरात्रौसूतौजन्मचेत्स्यात्तत्रवर्धमाने शुक्लपक्षीयउपचीयमानेचंद्रेवर्षकालीनभौमेनसहइत्थशालतोमुथाशिलयोगेसातिरुक्रोगःनश्येत्नाशंप्राप्नोतियदि शुक्लपक्षस्थोपचीयमानेचंद्रेमंदेत्थशालात्शनिनासहमुथशिलयोगेसतिरुक्रोगः एधतेवृद्धिंप्राप्नोति । व्यत्ययोन्यथेति दिवसेजन्मस्यात्कृष्णपक्षस्थचंद्रेभौमेनसह

रवावीदृशिवित्केतुयुतेऽब्दंनिखिलंगदाः ॥ अधिकारीबलीसूता
वब्देकेतुज्ञयुक्तथा ॥ १० ॥ चतुर्थेऽस्तेचमुथहाक्षुतदृष्ट्याशनीक्षि
ता॥ शूलपीडापापखगैर्दृष्टेतत्परिणामजम् ॥ ११॥ जन्मस्थजीव
सितराशिगतेमहीजेसूर्यांशुगेपिटकशीतलिकादिमांद्यम्॥ शीतो
ष्णगंडभवरुक्सबुधेचसैंदौकुष्ठंभगंदररुजोऽपिसगंडमालाः ॥ १२॥
जन्मलग्नेथिहानाथौषष्ठौपापान्वितेक्षितौ ॥ निर्बलौज्वरपीडांग
वैकल्याद्यतिकष्टदौ ॥ १३ ॥

मुथशिलयोगेसतिरोगवृद्धिःस्यात । पुनस्तादृशेचंद्रेशनिनासहमुथशिलयोगेस
तिरोगनाशःस्यादित्यर्थः ॥ ९ ॥ अथान्ययोगद्वयमाह--रवाविति ।
केतुबुधयुतेरवावीदृशिभौमेनसहमुथशिलयोगेसति अब्दंनिखिलंसंपूर्णवर्षंगदोरो
गःस्यादयमेकोयोगः ॥ अथान्यः ॥ सूतौजन्मकालेकश्चिद्ग्रहःअधिकारीवाब
लीसन्सग्रहःअब्देवर्षकालेकेतुबुधयुक्तश्चेत्तदासंपूर्णरोगप्रदंस्यात ॥ १० ॥
अथशूलयोगमाह–चतुर्थइति । वर्षलग्नेचतुर्थस्थानेअस्तेसप्तमस्थानेवामुथ
हास्यात् शनिनाक्षुतदृष्ट्याशत्रुदृष्ट्याचतुर्थदशमैकसप्तमदृष्ट्याईक्षितादृष्टासती
तदाशूलपीडास्यात । तादृशीमुथहापापग्रहैर्दृष्टासतीतत्परिणामजातस्यपरिणामः
शूलस्यनाशःततोजाताशूलनाशोत्तरंशूलपीडास्यादित्यर्थः ॥ ११ ॥ अथस
कलग्रहवशेनपिटिकादियोगमाह–जन्मस्थेति । जन्मकालेजीवसितरा
शिगतेमहीजेजीवोबृहस्पतिःसितःशुक्रोवायस्मिन्राशावस्तिवर्षेतस्मिन्राशौमही
जेभौमश्चेत्स्यात् । कीदृशोभौमः सूर्यांशुगेअस्तंगतोभवेत्तदापिटकशीतलिका
दिमांद्यंशीतोष्णगंडभवरुक्चस्यात बुधेचसैंदौएवंजन्मकालिकजीवसिताधिष्ठित
राशौचंद्रयुक्तबुधेसतिकुष्ठंभगंदररुजोपिसगंडमालाख्यारोगाःस्युः ॥ १२ ॥
अथान्यनियोगमाह–जन्मेति । जन्मलग्नेथिहानाथौजन्मलग्नस्वामिमुथहा
स्वामिनौवर्षलग्नात्षष्ठौपापान्वितेक्षितौपापग्रहैर्युतौदृष्टौवानिर्बलौस्यातां तदाज्वरपी
डांगवैकल्याद्यतिकष्टदौभवेताम् ॥ १३ ॥

Indira Gandhi National Centre for the Arts

मुथहालग्नतन्नाथाःपापांतःस्थास्तुरोगदाः ॥ षष्ठेशेषष्ठगेसौम्येस्त्रियःप्राप्तिरितीर्यते ॥१४॥ रोगकर्तायत्रराशावंशेस्यादनयोर्बली ॥ तत्स्थानंतस्यरोगस्यवाच्यंराशिस्वरूपतः ॥ १५ ॥ जन्मषष्ठाधिपेभौमेवर्षेषष्ठगतेरुजा ॥ क्रूरेत्थशालेविपुलःशुभदृग्योगतस्तनुः ॥१६॥ इतिषष्ठभावः ॥ ॥ अथसप्तमभावः ॥ ॥ बलीसितोऽब्दाधिपतिःस्मरस्थः स्त्रीपक्षतःसौख्यकरोविचिंत्यः ॥ ईज्येक्षितोऽत्यंतसुखंकुजेनाधिकारिणाप्रीतिकरोमिथःस्यात् ॥ १ ॥

अथरोगप्राप्तिस्त्रीप्राप्तियोगावाह--मुथहालग्नंचतन्नाथौतयोर्मुथहालग्नयोर्नाथौएतेचत्वारःपापांतःस्थाःपापग्रहमध्येस्थिताःस्युस्तदारोगदाःस्युः । अनयोर्मध्येकश्चिदेकःपापग्रहमध्यगतस्तदारोगप्रदःस्यात् । अयमशुभयोगः ॥ अथशुभयोगः ॥ षष्ठेशेषष्ठभावस्वामिनिसौम्येशुभग्रहःसन्षष्ठगेषष्ठस्थानेसतितदास्त्रियाःप्राप्तिःइतीर्यतेज्ञायते अस्मिन्नर्थेवामनः ॥ षष्ठाधिपेशुभेषष्ठस्थितेप्राप्तिःस्त्रियाभवेदितिकेचित् ॥ तन्न यतोऽत्ररोगप्रकरणाद्वामिन्यारोगप्राप्तिरुचिता नतुकेवलंतत्रस्त्रियाःप्राप्तिर्बाधितत्वात् । एतदर्थेसमरसिंहोपि षष्ठाधिपेचषष्ठंप्राप्तेसौम्येभवेत्स्त्रियांगदप्राप्तिरिति ॥ १४ ॥ अथरोगस्थानमाह–रोगकर्तेति । पूर्वोक्तरोगकर्ताग्रहोयत्रराशावंशेस्यात् । यस्मिन्राशावंशेनवमांशेस्यादनयोर्बलीराशिनवमांशयोर्मध्येयोबलीसराशिस्तस्यरोगस्यराशिस्वरूपतःवातपित्तकफप्रयुक्तैःकृत्वातत्स्थानंवाच्यम् ॥ १५ ॥ अथान्यदाह–जन्मेति । जन्मषष्ठाधिपेजन्मकालीनषष्ठभावस्वामिनिभौमेसतिवर्षेषष्ठगतेषष्ठस्थानेचेत्तदारुजंरोगंकरोति । क्रूरेत्थशाले पापग्रहेणसहमुथशिलयोगेसतिविपुलोभूयान्रोगःस्यात् शुभदृग्योगतःशुभग्रहैर्दृष्टःयुक्तोवातदातनुःस्वल्पोरोगःस्यात् ।इतिषष्ठभावः ॥ १६ ॥ अथसप्तमभावः ॥ बलीसितइति । बलीसितःशुक्रःअब्दाधिपोवर्षस्वामीसन्स्मरस्थःसप्तमस्थानेचेत्तदास्त्रीपक्षतःसौख्यकरोविचिंत्यःज्ञेयः ईज्येक्षितएतादृशःशुक्रोबृहस्पतिनादृष्टस्तदाअत्यंतंसौख्यंकरोति । कुजेनभौमेनअधिकारिणापंचाधिकारिणांमध्येअधिकारीभूत्वादृष्टस्तदामिथःपरस्परंप्रीतिकरःस्या

बुधेक्षितेजारतस्याल्लघ्व्यामंदेनवृद्धया ॥ गुरुदृष्ट्यानवाभार्यासंततिस्त्वरितंततः ॥ २ ॥ जन्मलग्नाधिपेऽस्तस्थेदारसौख्यंबलान्विते ॥ जन्मशुक्रर्क्षमस्तेऽब्देस्त्रीलाभायसितेऽब्दपे ॥ ३ ॥

त् ॥ १ ॥ **अथजारताविवाहयोगावाह**–बुधेक्षितइति । तस्मिन्शुक्रेवर्षस्वामिनिसप्तमस्थेसति बुधेक्षितेबुधेनदृष्टेसति लघ्व्याअल्पवयस्कयासहजारतास्यात् परविवाहितांभुंक्तइत्यर्थः । तादृशेशुक्रेमंदेनशनिनादृष्टेसतिवृद्धयानार्यासहजारतास्यात् । तादृशेशुक्रेगुरुदृष्ट्याबृहस्पतिनादृष्टेनवाभार्यानवीनाविवाहितास्त्रीभवति । ततस्तस्याःसकाशात्त्वरितंशीघ्रंसंततिःस्यात् एवंसतिगुरुदृष्ट्याइतिपाठःप्रामादिकः ईज्येक्षितइति पूर्वपद्येउक्तत्वादितितत्त्वम् अत्रगुरुयुक्तेनवाभार्येतिपाठःसाधुःपूर्वग्रंथानुरोधात् । उक्तंचजातकसारे संयुक्तेसुरपूजितेनववधूप्राप्तिश्चसद्वंशतइति ॥ **वामनः** ॥ गुरुयुक्तेनवाभार्यासंततिस्त्वरितंततः ॥ ताजिकयोगसुधानिधौ गुरुयुतेपिचनूतनवल्लभाभवतितत्रचसंततिराशुनहिइति ॥ २ ॥ **अथस्त्रीसौख्यविवाहयोगावाह**–जन्मेति । जन्मलग्नाधिपेजन्मलग्नस्वामिनिवर्षबलान्वितेबलिष्ठेअस्तस्थेसप्तमस्थानेसति दारसौख्यंस्त्रीजनितंसुखंस्यात् । जन्मकालेशुक्रर्क्षंशुक्रोयस्मिन्राशौतिष्ठतिसराशिरब्देवर्षकालेअस्तेसप्तमस्थानेसतिसितेशुक्रेअब्दपेवर्षस्वामिनिसतितदास्त्रीलाभायस्त्रीप्राप्तयेभवति इदमवधेयम् । जन्मशुक्रर्क्षमित्यत्रजन्मशुक्रर्क्षमस्तेतत्र चेच्छुक्रोऽब्दपोवर्षस्वामी तदास्त्रीसुखमित्यत्रसंमतेरभावः ॥**यथासमरसिंहः**॥जातकलग्नाधिपतौवर्षस्थेबलिनिदारसुखम् ॥ शुक्रस्थानेवर्षेपरिणयतिगृहस्थतांयातीति ॥ ताजिकालंकारे जनुर्लग्नाधीशेशरदिमदसंस्थेबलयुतेभृशंयोषित्तोषःसितयुतगृहेस्यात्परिणयः ॥ ताजिकयोगसुधानिधौ ॥ जननलग्नपतौशरदस्तगेबलयुतेप्रमदासुखमीरितम् ॥ जननशुक्रगराशिगतेजनुस्तनुपतौसबलेपरिणायनम् ॥ **वामनः** ॥ जन्मलग्नाधिपेवर्षेलग्नात्सप्तमगेसति ॥ उदितेसबलेचैवंदारसौख्यंप्रजायते ॥ शुक्रोजन्मनियद्राशौवर्षेलग्नेश्वरोयदि ॥ तद्राशौसप्तमस्थेपिपुंसःपरिणयस्तदेति । अत्रपूर्वपरामर्शाल्लग्नेश्वरोजन्मलग्नेश्वरइति ॥ नचवर्षेश्वरोयदीतिपाठः पूर्वश्लो

लग्नास्तनाथयोरित्थशालेस्त्रीलाभमादिशेत् ॥ सहमेशोभावपो वाविनष्टःकष्टदःस्त्रियः ॥ ४ ॥ नष्टेन्दौशुक्रपदगेमैथुनंस्वल्पमादिशेत् ॥ जन्मशुक्रर्क्षगोभौमःस्त्रीसुखोत्सवकृद्बली ॥ ५ ॥ जन्मास्तपेऽब्दपसितेनयुगीक्षितेस्यात्स्त्रीसंगमोबहुविलाससुखप्रधानः ॥ केंद्रत्रिकोणगगुरौजनिशुक्रभस्थेस्त्रीसौख्यमुक्तमितिहद्दविवाहयोश्च ॥ ६ ॥

कविरोधात् तादृगर्थैसंमतेरभावाच्च एवंसतिमूलंनिर्मूलमितिमंतव्यम् ॥ ३ ॥ अथस्त्रीलाभयोगंस्त्रीकष्टयोगंचाह–लग्नेति । लग्नंवर्षलग्नं अस्तंसप्तमभावः अनयोर्नाथयोःस्वामिनोरित्थशालेमुथशिलयोगेसति । स्त्रीलाभंविवाहादिद्वारास्त्रीप्राप्तिमादिशेत् कथयेत् । सहमेशइति । सहमेशःस्त्रीसहमस्वामीभावपो वा । सप्तमभावस्वामीवाविनष्टश्चेत्तदाःस्त्रियाःकष्टदोदुःखदोभवति॥ विनष्टग्रहलक्षणंवामनेनोक्तम्–क्रूराक्रांतःक्रूरयुतःक्रूरदृष्टश्चयोग्रहः ॥ विरश्मितांप्रपन्नश्चसविनष्टोबुधैःस्मृतः इति ॥ ४ ॥ अथस्त्रीस्वल्पसुखमहत्सुखयोगावाह–नष्टेंदाविति । शुक्रपदगेशुक्राधिष्ठितराशिस्थितेवर्षेनष्टेप्रागुक्तविनष्टलक्षणाक्रांतेइंदौचंद्रेसति स्वल्पमैथुनमादिशेत्कथयेत् । तथाजन्मशुक्रर्क्षगोभौमःजन्मकालेशुक्रोयस्मिन्राशावस्तितस्मिन्राशौवर्षकालेभौमोबलीभवेत्तदास्त्रीसुखोत्सवकृत् ॥ ५ ॥ अथस्त्रीसौख्ययोगचतुष्टयमाह–जन्मास्तपइति । जन्मकालीनलग्नात्सप्तमस्थानस्वामिनि अब्दपसितेनवर्षस्वामीशुक्रस्तेनयुगीक्षितेयुक्तोदृष्टोवा तदास्त्रीसंगमोबहुविलाससुखप्रधानःस्यात् ॥ अयमेकोयोगः ॥ केंद्रेति–जन्मकालेशुक्रभस्थेशुक्राधिष्ठितराशिस्थितेवर्षकालीनगुरौकेंद्रत्रिकोणगतेसतिस्त्रीसौख्यमुक्तम् ॥ अयंद्वितीयोयोगः ॥ इतिहद्दाविवाहयोश्चेति । अमुनाप्रकारेणवर्षलग्नेयआगतोहद्दास्वामीसजन्मकालीनशुक्राक्रांतराशिगतःसन्केंद्रत्रिकोणगोभवेत्तदा स्त्रीसौख्यंस्यात्अयंतृतीयोयोगः ॥ तथावर्षकालेयद्विवाहसहमंतत्स्वामीवाजन्मकालीन शुक्राधिष्ठितराशिगतःसन्केंद्रत्रिकोणगोभवेत्तदापिस्त्रीसौख्यंस्यात् ॥

अधिकारिपदस्थेऽर्केस्त्रीभ्योऽव्याकुलताऽनिशम् ॥ इंथिहाधिकृत स्थानेगुरुदृष्ट्याविवाहकृत् ॥ ७ ॥ इंथिहाकारयुग्द्यूनेक्रूरितेसह मेस्त्रियाः ॥ स्त्रीपुत्रेभ्योभवेत्कष्टंपापदृष्ट्याविशेषतः ॥ ८ ॥ सू तौद्यूनाधिपःशुक्रोऽब्देद्यूनेबलवान्भवेत् ॥ लग्नेशेनेत्थशालश्चे त्स्त्रीलाभंकुरुतेध्रुवं ॥ ९ ॥ भौमेऽब्दपेसितदृशाशुक्रेऽब्देशेकुजे क्षया ॥ तद्दृष्टेदारसहमेस्त्रीलाभोभवतिध्रुवम् ॥ १० ॥

अयंचतुर्थोयोगः ॥ केंद्रमित्यत्रलग्नंविहायचतुर्थसप्तमदशमान्युक्तानिसमरसिंहेन तद्वाक्यंच। शुक्रस्थानेवास्यान्नवमेऽस्तेपंचमेचतुर्थेखेजीवेसतिपूर्णफलंविवाहयेद्ध द्दनाथेच। फलसाम्याद्युक्तिलाघवात्ग्रंथकृतालग्नमुक्तमितिबोध्यम॥६॥अथस्त्री क्लेशविवाहयोगावाह-अधिकारीति।पंचाधिकारिणांमध्येयस्यकस्यचिदधिका रिणःपदस्थेस्थानेअर्केसूर्येसतिस्त्रीभ्योऽनिशंनिरंतरंव्याकुलतास्यात् एवंइंथिहाधि कृतस्थानेइंथिहामुथहाअधिकृतस्थानेअधिकारिग्रहस्यस्थानेगुरुदृष्ट्यागुरुणादृष्टा सतीविवाहकर्त्रीस्यात्॥७॥ अथस्त्रीक्लेशयोगावाह-इंथिहेति । द्यूनेवर्षलग्ना त्सप्तमस्थानेइंथिहामुथहाअर्कारयुक् अर्कःसूर्यःआरोभौमस्तेनयुक्ताचेत्तदास्त्रीपु त्रेभ्यःकष्टंभवेत्पापग्रहदृष्ट्याविशेषतःकष्टंस्यादयमेकोयोगः॥अथान्यः॥ स्त्री सहमेक्रूरितेपापाक्रांतेवर्षलग्नात्सप्तमस्थानेसतिस्त्रीपुत्रेभ्यःकष्टंस्यात् पापग्रहैर्दृष्टेस तिविशेषतःकष्टंस्यात् केचित्तुक्रूरितेइत्यस्ययोगद्वयेप्यन्वयः। क्रूरितेद्यूनेइंथिहा कारयुगितिवदंति तन्न अर्कारयुगित्यनेनैवद्यूनस्यक्रूरितत्वोपपत्तेः । अन्यथा योगद्वयकल्पनमपिव्यर्थंस्यादिति ॥८॥ अथविवाहयोगमाह-सूताविति । सूतौजन्मकालेद्यूनाधिपःसप्तमभावस्वामीशुक्रः अब्देवर्षकालेबलवान्बलिष्ठःस न्द्यूनेसप्तमस्थानेभवेल्लग्नेशेनेत्थशालश्चेत्वर्षलग्नस्वामिनासहमुथशिलयोगश्चेत्त दास्त्रीलाभंसुखंचकुरुते ॥ ९ ॥ अथत्रीन्स्त्रीप्राप्तियोगानाह-भौमइति । भौमेअब्दपेवर्षस्वामिनि सितदृशाशुक्रेणदृष्टेसतिलाभयोगएकः । तथाशुक्रेब्दे शेवर्षस्वामिनिकुजेक्षयाभौमेनदृष्टेसतिस्त्रीलाभयोगोद्वितीयः । अथवादारसहमे वर्षीयस्त्रीसहमेतद्दृष्टेताभ्यांशुक्रभौमाभ्यांदृष्टेसतिध्रुवंनिश्चयेनस्त्रीलाभोभवति। तृ

सूतौवादारसहमेतद्दृष्टेयोषिदाप्यते ॥ स्वामिदृष्टंस्त्रीसहमंशुक्रदृष्टं विवाहकृत् ॥ ११ ॥ सूतौद्यूनाधिपेवर्षसहमेशेस्त्रियाःसुखम् ॥ जन्मास्तपेंथिहानाथवर्षेशःखेद्युनेतथा ॥ १२ ॥ मुथहातोद्यून संस्थःस्वगृहोच्चगतःशशी ॥ विदेशगमनंकुर्यात्क्लेशःपापेक्षणाद्भवेत् ॥ १३ ॥ इतिजायाभावविचारः ॥ ॥ अथाष्टमभावविचारः॥ भौमेऽब्दपेक्रूरहतेऽयसाघातोबलोज्झिते ॥ अग्निभीरग्निभेक्रूरनराद्विपदभेमृतिः ॥ १ ॥

तीयोयोगः ॥ १० ॥ **अथपुनर्विवाहयोगद्वयमाह**—सूताविति । वाप्रकारांतरेण सूतौजन्मकालेदारसहमेस्त्रीसहमेतदृष्टे शुक्रभौमाभ्यांदृष्टेसतियोषित्स्त्रीप्राप्यते । उक्तंचसमरसिंहेन जन्मनिदृष्टौसत्यांस्त्रीसहमातौचपरिवारः ॥ अयमर्थः । यथावर्षकालेस्त्रीसहमंतथैवजन्मकालेप्रश्नकालेचस्त्रीसहमंकार्यमितिसंज्ञातंत्रे सहमप्रकरणेउक्तमस्ति ॥ अयमेकोयोगः ॥अथान्यः॥ स्त्रीसहमंस्वामिनादृष्टं शुक्रदृष्टंतदाविवाहकृत् ॥ ११ ॥ **अथस्त्रीसुखप्राप्तियोगावाह**—सूताविति । सूतौजन्मकालेद्यूनाधिपेसप्तमभावस्वामिनि वर्षेवर्षकालेसहमेशेस्त्रीसहमस्वामी भवेत्तदास्त्रियःसुखंस्त्रीतःसुखंस्यात् ॥ अयमेकोयोगः ॥ अथान्यः ॥ जन्मास्तपेजन्मकालीनसप्तमभावस्वामी इंथिहानाथःवर्षकालीनमुथहास्वामी वर्षेशोवर्षस्वामीएतेखेदशमस्थाने तथाद्यूनेसप्तमस्थानेस्युस्तदास्त्रीतःसुखंस्यात् । उक्तंच ताजिकयोगसुधानिधौ ॥ जन्मास्तनाथेऽब्दपतौचमुंथेशेऽस्तंगतेव्योमगतेऽपितद्वत् ॥ अतएववर्षेशाश्चेत्द्यूनेतथेतिपाठकल्पनमपिनिरस्तम् ॥ १२ ॥ अथसप्तमस्थानस्यमार्गस्थानत्वा**द्विदेशगमनयोगमाह**—मुथहातइति । वर्षेस्वगृहस्वोच्चगतःशशीचंद्रोमुथहाधिष्ठितस्थानात् द्यूनस्थःसप्तमस्थानेस्यात्तदा विदेशगमनंकुर्यात् । एतादृशश्चंद्रःपापेक्षणात् पापग्रहैर्दृष्टश्चेत्तदाक्लेशदोभवेत् ॥ १३ ॥ इतिसप्तमभावविचारः ॥ ॥ **अथअष्टमभावविचारः**—भौमइति । भौमेअब्दपेवर्षस्वामिनिसतिक्रूरहतेयुद्धादिनापीडितेबलोज्झितेनिर्बलेयत्किंचित्स्थानगतेसति अयसालोहेनघातोभवेत् । तथाभौमेअग्निभेवह्निराशौसंज्ञातंत्रो

वियत्यवनिपामात्यरिपुतस्करजंभयम् ॥ तुर्येमातुःपितृव्याद्वामा तुलात्पितृतोगुरोः ॥ २ ॥ लग्नेंथिहापतिसमापतयोमृतीशाश्चे दित्थशालिनइमेनिधनप्रदाःस्युः ॥ चेत्पाकरिष्टसमयेमृतिरेवतत्र सार्केकुजेनृपभयंदिवसेऽब्दवेशे ॥ ३ ॥ सूर्येमूसरिफेसितेनजनने वर्षेधिकारीतथाकेंद्रेराजगदाद्भयंचरुगसृक्स्थानेऽधिकारींदुजे ॥ सौम्येक्रूरदृशाकुजस्यरुगसृग्दोषोदिनांशुस्थितेदग्धेबंधमृतीविदेश तइतिप्राहुर्बुधेतादृशे ॥ ४ ॥

त्तमेषसिंहधनुष्याख्येस्थितेसतिअग्निभीर्वह्निसंबंधाद्भीतिर्भयंभवति ॥ तथाभौमे द्विपदभेमिथुनकन्याधनुःपूर्वार्धराशिस्थेक्रूरनरात् उग्रस्वभावमनुष्याच्चौरादितो मृतिर्मरणंस्यात् ॥१॥अथतादृशस्य**भौमस्यविशेषस्थानगतस्ययोगावाह–** वियतीति । वर्षस्वामिनीभौमेनिर्बलेक्रूरहतेएतादृशेयदिवियति दशमस्थानगतेस ति तदा अवनिपामात्यात्राजप्रधानतोरिपुतःशत्रुतःतस्करतश्चौरतोभयंवक्तव्य म्।अथतादृशेभौमेतुर्येचतुर्थस्थानस्थेसतिमातुःपितृव्याद्वा मातुलात्पितृतःगुरोः पितुःसकाशाद्गुरोःसकाशाद्भयंवाच्यम् ॥ २ ॥ **अथमहामृत्युयोगानाह–** लग्नेंथिहापतिसमापतयोमृतीशाइति । वर्षलग्नस्वामी मुथहास्वामी वर्षस्वामी एतेत्रयोमृतीशाश्चेदित्थशालिनः अष्टमभावस्वामिनासहमुथाशिलयोगश्चेत्तदानि धनप्रदामरणप्रदाःस्युः ॥ चेत्पाकरिष्टस्यदशारिष्टस्यसमयेमृतिरेवस्यात् ॥ अयमर्थः ॥ जन्मकालिकपापग्रहदशायांपापग्रहस्यांतर्दशाचेद्भवतितदामरणमे वस्यादित्यर्थः । **अन्यदाह--** तत्रेति । तत्रवर्षकालेदिवसेऽब्दवेशेदिवावर्षप्र वेशेसतिसार्केकुजेसूर्यसहितेभौमेसतिनृपभयंराज्ञःसकाशाद्भयंस्यात् ॥ ३ ॥ **अथचतुरोमृत्युयोगानाह--**सूर्यइति । सूर्येजननेजन्मकालेसितेनशुक्रेणस हमूसरिफयोगेसति तथावर्षेअधिकारीपंचाधिकारिणांमध्येअधिकारीभवति केंद्रे सति राजगदाद्भयंचराज्ञःसकाशात् तथारोगाद्भयंस्यात् । अयमेकोयोगः ॥ **अथद्वितीयः ॥** जन्मकालेअसृक्स्थानेभौमाक्रांतराशौअधिकारिणिवर्षपंचाधि कारिणांमध्येअधिकारिणिइंदुजेबुधेसतिरुक्रोगःस्यात् ॥ **अथतृतीयः॥** अथवा

भौमस्थानेऽधिकारींदौगुप्तंनृपभयंरुजः ॥ मंदोऽधिकारीखेलोहह
तेपीडाकरःस्मृतः ॥ ५ ॥ भौमेऽष्टमेभयंवह्नेःप्रहारोवानृपाद्भयम्
आरेखस्थेचतुष्पद्भ्यःपातोदुःखंरुजोसृजा ॥ ६ ॥

सौम्येबुधेअधिकारिणिसतिक्रूरदृशाकुजस्यभौमस्यक्रूरदृशाचतुर्थदशमैकसप्तमदृष्ट्यादृष्टेसतिअसृक्दोषादिनारक्तविकारजनितदोषादिनारुक्रोगःस्यात् ॥ अथ चतुर्थोयोगः ॥ पुनरपितादृशेबुधेअधिकारिणिक्रूरदृष्ट्याभौमेनदृष्टेअंशुस्थिते अर्थात्कुजस्यांशुस्थितेकुजरश्मिस्थितेदग्धेसतिकुजेनयुद्धादिनापीडितेइत्यर्थः । तदाविदेशतःपरदेशेबंधनमृतीस्यातामितिबुधाःप्राहुः । उक्तंचसमरसिंहेन । दग्धेचरश्म्यधःस्थात्परदेशबंधनंमरणमिति । ताजिकालंकारे-सौम्येक्रूरदृशाक्षतिःकुजदृशादग्धंचतद्रश्मिभिर्निर्बंधेहननंविदेशमरणंमृत्योर्लभेन्निश्चितमिति । केचित्तुइनांशुस्थितेसूर्यसान्निध्येनास्तंगतेसूर्यमंडलगतेइत्यर्थः ॥ दग्धेपापाक्रांते कुजपदसान्निध्येनकुजयुक्तइत्यर्थः अतएववामनः भौमयुक्तेबुधेसार्कैविदेशेबंधनंमृतिरिति तन्न भिन्नराशिस्थितस्यापिबुधस्यास्तंगतत्वेनसार्कत्वाभावात्समरवाक्येसूर्यपदसांनिध्याभावेनसूर्यस्याप्रसक्त्यासूर्यरश्म्यधःस्यादित्यर्थकल्पनस्यान्याय्यत्वाच्च । नचवामनवाक्यस्यकागतिरितिवाच्यम् । भौमयुक्तेबुधेइत्यस्यस्वोक्तार्थविरुद्धार्थत्वाभावेनसार्कैत्यस्याधिकोक्त्याविरोधाभावादिति॥ ४ ॥ अथरोगयोगावाह-भौमस्थानइति । जन्मकालेभौमस्थाने भौमोयस्मिन् राशावस्तितस्मिन्राशौवर्षेअधिकारिणिइंदौचंद्रेसतिगुप्तमप्रकाश्यंनृपभयंराज्ञः सकाशाद्भयंरुजोरोगाःस्युः ॥ अयमेकोयोगः ॥ अथान्यः ॥ मंदःशनैश्वरः । अधिकारिपंचाधिकारिणांमध्येअधिकारीभूत्वाखेदशमस्थानेचेत्स्यात्तदालोहहते लोहप्रहारात्पीडाकरःस्मृतः ॥ ५ ॥ अथाल्पमृत्युयोगावाह-भौमइति । वर्षलग्नादष्टमस्थानेभौमेसतिवह्नेःसकाशात्भयंप्रहारोवाशस्त्रादिनाघातोवा नृपात् राज्ञःसकाशाद्भयंवास्यात् । अयमेकोयोगः ॥ अथान्यः ॥ आरेभौमेखस्थे दशमस्थानेसतिचतुष्पाद्भ्यश्चतुष्पदेभ्यः पातःपतनंदुःखंअसृजः रक्तविकारजनितरुजोरोगाःस्युः ॥ ६ ॥

Indira Gandhi National Centre for the Arts

वित्ताष्टगेज्योधनहायद्यब्देशोऽशुभेक्षितः ॥ मंदेद्यूनेदुर्वचनापवाद कलिभर्त्सनम् ॥ ७ ॥ पतितेज्ञेक्रूरदृशाऽऽरेत्थशालेमृतिंवदेत् ॥ कुजहद्दास्थितेनाशःसौम्यदृष्टयाशुभंभवेत् ॥ ८ ॥ लग्नाधिपेनष्ट दग्धेयोषिद्वादोऽशुभान्विते ॥ जन्मन्यष्टमगोजीवोनाधिकारीक लिःपृथुः ॥ ९ ॥ जयःशुक्रेक्षणादुक्तःप्रत्युत्तरवशेनतु ॥ भौमें ऽत्यगेधनेसूर्येवादात्क्लेशंविनिर्दिशेत् ॥ १० ॥ रिपुगोत्रकलिर्भी तिःसंख्येकुजहतेऽब्दपे ॥ दग्धोजन्मांगपोवर्षेऽष्टमोरोगकली दिशेत् ॥ ११ ॥

अथधननाशविवादयोगावाह—वित्ताष्टगेति।यदिअब्देशःवर्षेशः ईज्योगुरुः वित्ताष्टगःद्वितीयेअष्टमस्थानेवासन् अशुभेक्षितःपापग्रहदृष्टस्तदाधनहाधननाश कर्तास्यात्॥ अयमेकोयोगः॥ **अथान्यः**॥मंदेशनौद्यूनेसप्तमस्थानेसतिदुर्वचनाप वादकलिभर्त्सनंधिक्कारंप्राप्नोति ॥ ७ ॥ **अथमहाल्पमृत्युयोगावाह**— प तितइति । पतितेज्ञेबुधेक्रूरदृशाचतुर्थदशमैकसप्तमदृष्टयाआरे भौमेत्थशाले मुथशिलयोगं करोति तदामृतिंवदेत् ॥ अयमेकोयोगः ॥ **अथान्यः** ॥ तादृशे बुधेकुजहद्दास्थिते भौमहद्दायांस्थितेनाशःद्रव्यस्यस्यादित्यपरोयोगः शुभदृष्टया तादृशेबुधेयोगद्वयेपिदृष्टश्चेत्शुभंवदेत् ॥ ८ ॥ **अथझकटयोगावाह**—लग्ना धिपइति । लग्नाधिपेवर्षलग्नस्वामिनिनष्टदग्धेनष्टेहीनबले दग्धेअस्तंगतेअशु भान्वितेअशुभैः पापग्रहैरन्वितेयुक्तेसति योषिद्भिःअन्यस्त्रीभिःसहवादःकलहः स्यात् । अयमेकोयोगः॥ **अथान्यः**॥जन्मनिजन्मकालेअष्टमगोऽष्टमस्थानेजी वोबृहस्पतिश्चेत्सवर्षेनाधिकारी पंचाधिकारिणांमध्येअधिकारीनस्यात्॥तदापृथुर्म हान्कलिःकलहःस्यात् ॥९॥ **अथजयवादयोगावाह**—जयइति । प्रागुक्त तादृशेगुरौशुक्रेक्षणात्शुक्रेणदृष्टेसतिस्त्रीविवादेप्रत्युत्तरवशेनजययुक्तःकथितः ॥ अयमेकोयोगः ॥ **अथान्यः** ॥ भौमेंऽत्यगेभौमेअंत्यगेवर्षलग्नाद्द्वादशस्थानेस तिधनेद्वितीयस्थानेसूर्येसति तदावादात्क्लेशंविनिर्दिशेत्॥१०॥**अथान्यौकलि रोगयोगावाह**—रिपुगइति । अब्दपेवर्षस्वामिनिकुजहतेभौमेनपीडितेसति

सूत्यब्दयोरधिकृतोभौमस्थानेगुरुर्हतः ॥ पापैर्वादःस्फुटोप्येवंता
दृशींदौशनेःपदे ॥ १२ ॥ सूत्यब्दयोरधिकृतेचंद्रेबुधपदेहते ॥
क्रूरैर्विदेशगमनंवादःस्याद्विमनस्कता ॥ १३ ॥ मेषेसिंहेधनुष्यारे
वृषेरंध्रेऽसितोभयम् ॥ मृतौमृतीशलग्नेशौमृत्युदौपापदृग्युतौ
॥ १४ ॥ यत्रर्क्षेजन्मनिकुजःसोऽब्दलग्नोपगोयदा ॥ बुधोवर्षप
तिर्नष्टबलस्तत्रनशोभनम् ॥ १५ ॥ सार्केशनौभौमयुतेखाष्टस्थेवा
हनाद्भयम् ॥ सार्केभौमेऽष्टमस्थेतुपतनंवाहनाद्भवेत् ॥ १६ ॥

रिपुभिःशत्रुभिर्गोत्रैःस्ववंशस्थैः सहकलिःस्यात् संख्येसंग्रामेभीतिर्भयंचस्यात्
अयमेकोयोगः ॥ अथान्यः॥जन्मांगपोजन्मकालीनलग्नस्वामीवर्षेदग्धोऽस्तंग
तःसन्नष्टमाऽष्टमस्थानेचेद्भवति तदारोगकलीदिशेत्कथयेत् ॥११॥ अथकलह
योगावाह–सूत्यब्दयोरिति। गुरुर्बृहस्पतिः सूत्यब्दयोर्जन्मकालवर्षकालयोरधि
कृतोअधिकारीभूत्वा भौमस्थानेजन्मकालिकभौमाक्रांतराशिस्थःसन्हतःपापैःग्र
हैर्हतश्चेद्भवतितदालोकैःसहस्फुटोवादःस्यादयमेकोयोगः ॥अथान्यः॥शनेःपदे
जन्मकालिकशन्याक्रांतराशौतादृशि जन्मकालवर्षकालयोराधिकारिणिपापग्रहैश्च
हतेइंदौचंद्रेतिष्ठतिसतिएवमेवंफलःस्फुटःकलहःस्यात् ॥१२॥अथविदेशगम
नादियोगमाह–सूत्यब्दयोरिति । सूत्यब्दयोर्जन्मकालवर्षकालयोःअधिकृते
अधिकारंप्राप्तेचंद्रेबुधपदेजन्मकालीनबुधाक्रांतराशौस्थितेहतेक्रूरैः पापग्रहैर्हतेस
तिविदेशगमनंवादःविमनस्कतावास्यात् ॥१३॥ अथाल्पमृत्युयोगावाह–
मेषइति । आरेभौमेमेषेसिंहेधनुषिवृषेरंध्रेअष्टमस्थानेसतिअसितःखड्गाद्भयं
स्यात् । अयमेकोयोगः ॥ अथान्यः॥मृतौअष्टमस्थानेमृतीशलग्नेशौअष्टम
स्थानस्वामिवर्षलग्नस्वामिनौपापदृग्युतौपापग्रहैर्दृष्टौयुतौवासत्यांमृत्युदौमरणदौभ
वतः ॥ १४ ॥ अथसामान्यवर्षयोगमाह–यत्रर्क्षइति । जन्मनिजन्मका
लेकुजोभौमःयत्रर्क्षेयस्मिन्राशौस्यात्सराशिर्यदाअब्दलग्नोपगःवर्षलग्नेभवेत्तत्रबु
धोवर्षपतिर्वर्षस्वामीसन्नष्टबलोभवेत्तदानशोभनंशुभफलदोनस्यात् ॥ १५ ॥
अथवाहनाद्भयपतनयोगावाह–सार्कइति । सार्केशनौसूर्ययुक्तशनौभौ

सारेऽब्दपेऽष्टमेमृत्युश्चंद्रेंऽत्यारिमृतौमृतिः ॥ उदितेमृतिसद्मेशेनि र्बलेजीवितेमृतिः ॥ १७ ॥ पुण्यसद्मेश्वरःपुण्यसहमादष्टगोयदा ॥ सूत्यष्टमेशःपुण्यस्थोमृतिदःपापदृग्युतः ॥ १८ ॥ सूत्यष्टमगतो राशिःपुण्यसद्मनिनाथयुक् ॥ अब्दलग्नाऽष्टमर्क्षेवाचेदित्थंस्यान्मृ तिस्तदा ॥ १९ ॥ पुण्यसद्माशुभाक्रांतंमृतीशोंऽत्यारिरंध्रगः ॥ मुथहेशोऽब्दपोवापिमृत्युंतत्रविनिर्दिशेत् ॥ २० ॥

मयुतेसभौमेखाष्टस्थेदशमाष्टमस्थानस्थेसतिवाहनाद्भयंभवति ॥ अयमेकोयो गः ॥ अथान्यः ॥ सार्केभौमेसूर्ययुक्तभौमेऽष्टमस्थानस्थेसतिवाहनात्पत नंवदेत्कथयेत् ॥ १६ ॥ **अथमहामृत्युयोगावाह**—सारेब्दपइति । सारेऽब्दपेआरेणभौमेनसहवर्तमानेसारेएतादृशेअब्दपे वर्षस्वामिनिअष्टमेसतिमृ तिर्मरणंस्यात् तथाअंत्यारिमृतौद्वादशषष्ठाष्टमस्थानेषुचंद्रेसतिमृतिर्मरणम् ॥ अयमेकोयोगः ॥ अथान्यः ॥ मृतिसद्मेशेमृत्युसहमस्वामिनिउदितेउदयं प्राप्तेनिर्बलेबलरहितेसतिजीवितेमृतिःस्यात् ॥ १७ ॥ **अथान्यौमहा मृत्युयोगावाह**—पुण्यसद्मेश्वरइति । पुण्यसद्मेश्वरःपुण्यसहमस्वामीपुण्यस हमस्थानादष्टमस्थानस्थःपापदृग्युतःपापग्रहैर्दृष्टोयुक्तोवास्यात्तदामृतिःस्यात्अय मेकोयोगः ॥ अथान्यः॥ सूत्यष्टमेशःसूतौजन्मकालेअष्टमेशः अष्टमस्थानस्वा मीपुण्यस्थः पुण्यसहमस्थानस्थः पापग्रहेणदृष्टोयुतोवास्यात्तदामृतिर्मरणंस्यात् ॥ १८ ॥ **अथान्यौमृत्युयोगावाह**—सूत्यष्टमगतइति। सूत्यष्टमगतोराशिः सूतौजन्मकालिकलग्नादष्टमराशिर्वर्षकालीनपुण्यसद्मनि पुण्यसहमस्थानस्थोभव न्नाथयुक्स्वस्वामिनायुक्तश्चेत्तदामृत्युःस्यात् । अयमेकोयोगः ॥ अथान्यः॥ तथाअब्दलग्नाद्वर्षलग्नादष्टमर्क्षे अष्टमोराशिरित्थंपुण्यसहमस्थस्वामिनायुक्तश्चेत्त दामृत्युःस्यात् ॥ १९ ॥ **अथान्यमृत्युयोगावाह**—पुण्यसद्मेति । पुण्यस द्मंपुण्यसहमंअशुभाक्रांतंपापग्रहैर्युक्तंस्याद्यदिमृतीशःअष्टमस्थानस्वामीअंत्यारिरं ध्रगःद्वादशषष्ठाष्टमस्थानस्थश्चेद्भवतितदामृत्युंवदेत् । अयमेकोयोगः ॥ अथा न्यः ॥ मुथहेशःमुथहास्वामीअब्दपोवावर्षस्वामीवातत्रतथैवपापाक्रांतःद्वादशष

सक्रूरेजन्मपेमृत्यौमृतिश्चेदिंथिहार्कियुक् ॥ भौमक्षुतेक्षणेतत्रमृत्युःस्यादात्मघाततः ॥ २१ ॥ मंदोऽष्टमेमृतीशेत्थशालान्मृत्युकरःस्मृतः ॥ शुभेत्थशालात्सर्वेऽपियोगानाशुभदायकाः ॥२२॥ सूतिरंध्रपतिर्मंदोऽष्टमोऽब्देलग्नपेनचेत् ॥ इत्थशालीक्रूरदृशात्त्कालंमृत्युदायकः ॥ २३ ॥ पुण्यसद्मनिविधुस्तनौतथाऽस्तेखलेमृतिरथार्थरिप्फगौ ॥ मृत्युदौखलखगावथोजनुर्वर्षवेशतनुपौमृतौमृतिः ॥ २४ ॥ इत्यष्टमभावः ॥ ॥ अथभाग्यभावविचारः ॥ भौमेऽब्दपेत्रिनवगेक्रूरायुक्तेबलान्विते ॥ गुणावहस्तदामार्गश्चिरंकार्यंस्थिरंततः ॥ १ ॥

ष्टाष्टमस्थानश्चेत्तदामृत्युंविनिर्दिशेत् ॥ २० ॥ **अथमहामृत्युयोगानाह**-सक्रूरइति। जन्मपेजन्मलग्नस्वामिनिसक्रूरेवर्षेपापग्रहयुक्तेमृत्यौअष्टमस्थानस्थेसतिमृतिर्मरणंस्यात् । चेदिंथिहामुथहायत्रकुत्रापिस्थितःआर्कियुक्ताशनियुक्तातदामृतिः ॥ भौमक्षुतेक्षणात्भौमेनक्षुतदृष्टयाचतुर्थदशमैकसप्तमदृष्टयादृष्टासतीत्रईदृशेयोगेआत्मघाततोमृत्युःस्यात् ॥ २१ ॥ **अथमहामृत्युयोगंसर्वमृत्युयोगपरिहारंचाह**-मंदइति । मंदःशनैश्चरःअष्टमेवर्षलग्नादष्टमस्थानेस्थितः । मृतिशेत्थशालात् मृतीशःअष्टमभावस्वामी तेनसहमुथशिलयोगान्मृत्युकरःस्मृतःकथितः॥**अथैतद्योगानामपवादमाह**-सर्वेपिमृत्युयोगाःशुभेत्थशालात् यद्यरिष्टकारकाणांग्रहाणांशुभग्रहैःसाकंमुथशिलयोगस्तर्हिअशुभदायकाअनिष्टदायकानभवंति ॥ २२ ॥ **अथमहामृत्युयोगमाह**-सूतिरंध्रपतिरिति । सूतौजन्मकालेरंध्रपतिःअष्टमभावस्वामीमंदःशनिःअब्देवर्षेवर्षलग्नादष्टमस्थानस्थःसन् लग्नपेनवर्षलग्नस्वामिनाचेत्क्रूरदृशाचतुर्थदशमैकसप्तमदृष्टयाइत्थशालीमुथशिलयोगंकरोति तदातत्कालेतस्मिन्समयेमृत्युदायकोभवति॥इतिअष्टमभावविचारः ॥ २३ ॥ २४ ॥ **अथनवमभावविचारः** ॥ तत्रनवमभावेमार्गधर्मविचारस्तावद्गमनयोगमाह-भौमेइति।भौमेऽब्दपे भौमेवर्षस्वामि

त्रिधर्मस्थोऽब्दपःसूर्यःकंबलीमार्गसौख्यदः ॥ अन्यप्रेषणयानं स्यात्सचेन्नाधिकृतोभवेत् ॥ २ ॥ शुक्रेऽब्दपेत्रिनवगेमार्गेसौख्यं विलोमगे ॥ अस्तेवाकुगतिःसौम्येदेवयात्रातथाविधे ॥ ३ ॥ क्रूरार्दितेकुयानंस्याद्गुरावेवंविचिंतयेत् ॥ इत्थशालेलग्नधर्मपत्यो र्यात्रास्त्यचिंतिता ॥ ४ ॥ लग्नेशोधर्मपंयच्छन्स्वंमहाश्चिंतिता ध्वदः ॥ एवंलग्नाब्दयोर्योगेमुथहागपयोरपि ॥ ५ ॥

नि त्रिनवगेतृतीयगेनवमस्थानेवाक्रूरायुक्तेक्रूरैःपापग्रहैरयुक्ते योगरहितेबलान्विते बलिष्ठेसतितदामार्गःगमनंगुणावहःलाभादिसुखकरः ॥ चरंकार्यंत्वरयासाध्यम विकार्यं ततःतस्मात्स्थिरंविलंबसाध्यंभवति ॥ १ ॥ **अथान्यदाह**–त्रिधर्मस्थइ ति । सूर्यःअब्दपःवर्षस्वामीभूत्वाकंबूलीकंबूलयोगवान्सन्त्रिधर्मस्थः तृतीयनव मस्थानस्थस्तदामार्गसौख्यदः सचेन्नाधिकृतःपंचाधिकारिणांमध्येअधिकारीनभ वेत्तदाअन्यप्रेषणेनयानंगमनंस्यात् ॥ २ ॥ **अथान्यान्गमनयोगान्सार्धश्लो केनाह**–शुक्रइति । क्रूरार्दितइति । शुक्रेऽब्दपेवर्षस्वामिनित्रिनवगेतृतीयनव मस्थानेसति मार्गेगमनंमार्गेसौख्यंस्यात् । अथतादृशेशुक्रेविलोमगेवाक्रिणिअस्ते वा अस्तंगतेवासतिकुगतिःकुत्सितगतिःकुगमनंकार्यसिद्धिर्नस्यादित्यर्थः । तथा बुधेतादृशेवर्षस्वामिनिसबलेत्रिनवगेसौम्येबुधेसति देवयात्रादेवोद्देशेनयात्रास्या त् इदंतीर्थयात्रादेरप्युपलक्षणम् । तादृशेशुक्रेबुधेक्रूरार्दितेपापग्रहैःपीडितेयुक्ते वासति कुयानंकुत्सितगमनंस्यात् । एवममुनाप्रकारेणवर्षस्वामिनित्रिनवगेगुरौस तिदेवयात्रांविचिंतयेत्कथयेत् तस्मिन्गुरौक्रूरार्दितेतुकुयानंस्यात् ॥ ३ ॥ **अथचिंति तयात्रायोगमुत्तरार्धेनाह**–इत्थशालइति । लग्नधर्मपत्योःवर्षलग्नस्वामिनासहनव मभावस्वामिनःइत्थशालेमुथाशिलयोगेसतिअचिंतिताअकस्मात्यात्रास्यात् ॥ ४ ॥ **अथविपरीतंमुथशिलस्यान्यत्रातिदेशमाह**–लग्नेशइति । लग्नेशोवर्षलग्न स्वामीधर्मपेननवमभावस्वामिनामुथशिलयोगंकरोति तदाचिंतितगमनम् । एव ममुनाप्रकारेणलग्नाब्दपयोर्योगेवर्षलग्नस्वामीअनयोर्योगेसतितथामुथहस्वामी अं

Indira Gandhi National Centre for the Arts

गुरुस्थानेकुजेधर्मेसद्यात्राभृत्यवित्तदा ॥ ज्ञस्थानेलग्नपोभौमोदृष्टःसद्यानसौख्यदः ॥ ६ ॥ स्वस्थानगोवाबलवान्लग्नदर्शीसुयानदः ॥ जन्माधिकारीज्ञोमंदस्थानेक्रूरयुतोयदा ॥ ७ ॥ पंथारिपोर्झकटकाद्गुरुरध्वेंदुजीवयोः ॥ धर्मेशनिर्नाधिकारीपंथानमशुभंवदेत् ॥ ८ ॥ इत्थंगुरौदूरयात्रान्टपसंगस्ततोगुणः ॥ कुजेऽब्दपेनष्टबलेस्वजनाद्दूरतोगतिः ॥ ९ ॥

गपोवर्षलग्नस्वामीअनयोर्योगेसतिमुथशिलंपूर्वोक्तंस्यात् ॥ ५ ॥ **अथसद्यात्रायोगावाह**-गुरुस्थानइति । गुरुस्थानेजन्मकालेगुरुर्बृहस्पतिर्यस्मिन्राशावस्ति तस्मिन्राशौवर्षकालीनेकुजेभौमेधर्मेनवमस्थानगतेसति सद्यात्रासमीचीनायात्रा। भृत्यःसेवकःवित्तंभृत्यद्रव्यप्राप्तिकारिकास्यात् । अयमेकोयोगः ॥ **अथान्यः**॥ ज्ञस्थानेजन्मकालेबुधोयस्मिन्राशावस्ति तस्मिन्राशौवर्षकालीनेभौमेलग्नपेलग्नस्वामिनादृष्टःसन्सद्यानसौख्यदःस्यात् ॥ ६ ॥ **अथान्यंसद्यात्रायोगंश्लोकार्धेनाह**-स्वस्थानगइति । जन्मकालेभौमःस्वस्थानगोमेषवृश्चिकगतोवर्षेपिमेषवृश्चिकराशिगतःसन् नवमेबलवान्स्यात् लग्नदर्शीलग्नंपश्यति तदासुयानदःशुभगमनंभवेत् ॥ **अथशुभयात्रायोगान्**सार्धश्लोकेनाह-जन्माधिकारीति । ज्ञोबुधःजन्माधिकारीजन्मकालेअधिकारीभूत्वा मंदस्थानेजन्मकालीनशन्याक्रांतराशिगतःसन्वर्षेनवमस्थानगतःक्रूरयुतःपापग्रहयुक्तोयदाभवेत्तदारिपोःशत्रोर्झकटकात् कलहप्रसंगात्पंथाःमार्गगमनंस्यात् गुरुरध्वेति इंदुजीवयोः जीवोबृहस्पतिः अमुनाप्रकारेणजन्मकालेअधिकारीभूत्वाजन्मकालीनशन्याक्रांतराशिगतःसन्वर्षेनवमस्थानगतयोःपापग्रहयुतयोःसतोःशत्रुकलहाद्गुरुर्भूयानध्वामार्गःस्यात् धर्मेइति । वर्षेनाधिकारीपंचाधिकारीरहितः शनिर्धर्मेनवमस्थानेसन्नशुभंपंथानंवदेत्कथयेत् ॥ ७ ॥ ८ ॥ **अथदूरयात्रायोगावाह**-इत्थमिति । इत्थममुनाप्रकारेण वर्षे अधिकाररहितेनवमस्थानगतेगुरौसतिदूरयानंस्यात् नृपसंगःराज्ञासहमेलनंस्यात् । ततोगुणःततःराज्ञःसकाशाद्गुणःद्रव्यप्राप्तिश्चस्यात् । अयमेकोयोगः ॥ **अथान्यः** ॥ कुजेभौमेअब्दपेवर्षस्वामिनिनष्टबलेनवमस्थानगतेसतिस्वजननात्स्वकीय

द्यूनेंथिहाधर्मेइंदौसबलेऽध्वाविदेशगः ॥ वर्षेशोबलवान्पापायुतः केंद्रेऽधिकारवान् ॥ १० ॥ अधिकारोगतिःसंख्येसेनापत्येऽपि वावदेत् ॥ एवंबुधेकुजेजीवयुतेऽर्कान्निर्गतेपुनः ॥११॥ परसैन्योपरिगतिर्जयःख्यातिसुखावहः ॥ जीवान्नवमगेभौमेशुभायात्रानृणांभवेत् ॥ १२ ॥ इतिनवमभावविचारः ॥ ॥ अथदशमभावविचारः ॥ सबलेऽब्दपतौखस्थेराज्यार्थसुखकीर्तयः ॥ स्थानांतराप्तिरन्यस्मिन्केंद्रेगृहसुखाप्तयः ॥ १ ॥ इत्थंबलीरविर्भूस्थः पूर्वार्जितपदाप्तिकृत् ॥ एकादशेऽस्मिन्सख्यंस्यान्नृपामात्यगणोत्तमैः ॥ २ ॥

कुटुंबवर्गाद्दूरेगतिर्गमनंस्यात् ॥ ९ ॥ अथप्रबलविदेशयात्रायोगंश्लोकपूर्वार्धेनाह–द्यूनेंथिहेति। द्यूनेसप्तमस्थानेइंथिहामुथहा धर्मेइंदौधर्मेनवमस्थानेइंदौ चंद्रेसबलेबलिष्ठेसतिविदेशगः परदेशगमनप्रयोजकःअध्वामार्गोभवति। अथ वर्षाधीशस्य केंद्रगतत्वेनविशेषफलमेतच्छ्लोकोत्तरार्धाग्रिमश्लोकपूर्वार्धाभ्यामाह–वर्षेशइति।वर्षेशोवर्षस्वामीबलवान्बलिष्ठः पापायुतःपापग्रहैर्नयुतः अधिकारवान्पंचाधिकारिणांमध्येअधिकारीभूत्वाकेंद्रेसति अधिकारोगतिःप्राप्तिःस्यात्संख्येसंग्रामेसेनापत्यंवदेत्। अथान्यदाह–एवमिति। एवमुक्तप्रकारेणबुधेकुजेभौमेवाबलयुते अर्कान्निर्गतेउदितेजीवयुतेबृहस्पतियुतेकेंद्रवर्तिनिसतिपुनःपरसैन्योपरिगतिर्गमनंस्यात् । तत्सकाशाज्जयःख्यातिसुखावहःस्यात् । अथोत्तरार्धेनविशेषफलमाह–जीवादिति। जीवात्गुर्वाक्रांतराशेःसकाशान्नवमगेनवमस्थानेभौमेसतिनृणांमनुष्याणांयात्राशुभाभवेत् ॥१०॥११॥१२॥ इतिनवमभावविचारः ॥ अथदशमभावविचारः॥सबलइति। सबलेबलिष्ठे अब्दपतौवर्षस्वामिनि खस्थेदशमस्थानस्थेसति राज्यार्थसुखकीर्तयोभवंति। अयमेकोयोगः॥अथान्यः॥ अन्यस्मिन्केंद्रेदशमव्यतिरिक्तस्थानेस्थानांतराप्तिःगृहसुखाप्तयश्चभवंति ॥ १ ॥ अथस्थानविशेषेणवर्षस्वामिनःसूर्यस्यविशेषफलमाह–इत्थमिति । इत्थममुनाप्रकारेणवर्षस्वामीभूत्वाबलीबलिष्ठोरविःसूर्यः

Indira Gandhi National Centre for the Arts

रविस्थानेंथिहालग्नेखेवाराज्याप्तिसौख्यदा ॥ नीचेऽर्कःपापसंयु क्तोभूपाद्बंधवधंदिशेत् ॥३॥ सिंहेरविर्बलीखस्थःस्थानलाभोनृपा श्रयः ॥ स्थानांतराधिकाराप्तिरिंदुरारपदेबली ॥ ४ ॥ खेशलग्ने शवर्षेशेत्थशालेराज्यदायकः ॥ वर्षेशेराज्यसहमेऽर्केत्थशालेम हान्नृपः ॥ ५ ॥ शनिस्थानेकुजःपश्यन्मुथहापापकर्मतः ॥ नृप भीतिंवित्तनाशंदद्याद्दशमगोयदि ॥ ६ ॥

भूस्थःचतुर्थस्थानस्थःपूर्वार्जितपदाप्तिकृत् अस्मिन्नेतादृशेसूर्येएकादशस्थानस्थे सतिनृपामात्यगुणोत्तमैःसख्यंस्यात् ॥ २ ॥ **अथराज्यप्राप्तियोगंनृपाद्बंध नयोगंचाह**—रविस्थानेंथिहेति । रविस्थानेजन्मकालीनसूर्याधिष्ठितराशौ वर्षका ले इंथिहामुथहाभवेत् लग्नेवर्षलग्नेखेदशमस्थानेवाराज्यप्राप्तिसौख्यदास्यात् ॥ अयमेकोयोगः ॥ **अथान्यः** ॥ तथा अर्कःसूर्यःनीचेनीचराशिगतःपापसंयु क्तःपापग्रहयुक्तःसन्दशमस्थानगतश्चेत्तदाभूपाद्राज्ञःसकाशाद्बंधःबंधनंहननंच दिशेत्कथयेत् ॥ ३ ॥ **अथान्यौस्थानप्राप्तियोगावाह**—सिंहइति । सिंहे रविःमूलवाक्यानुरोधाज्जन्मनीतिपदमत्राध्याहार्यम् ॥ जन्मकालेसिंहराशिगतः सूर्योवर्षकालेबलीबलिष्ठःसन्खस्थःदशमस्थानस्थश्चेत्तदास्थानंपदं तस्यलाभो नृपाश्रयःराजाश्रयश्चस्यात् । अयमेकोयोगः ॥ **अथान्यः** ॥ एवंजन्मका लेआरपदेभौमाक्रांतराशौ वर्षे तद्राशिगतःइंदुश्चंद्रःबलीचेत्तदास्थानांतरेअधि कारप्राप्तिःस्यात् ॥ ४ ॥ **अथान्यौराज्यप्राप्तियोगावाह**—खेशइति । खेशःवर्षकालीनदशमस्थानस्वामी लग्नेशःवर्षलग्नस्वामी वर्षेशः एतेषांइत्थ शालेपरस्परमुथशिलयोगेसतिराज्यदायकःराज्यप्रदोभवति ॥ अयमेकोयोगः ॥ **अथान्यः** ॥ वर्षेशेवर्षस्वामिनिराज्यसहमेराज्यसहमस्थानगतेसतिअर्केत्थ शालेसूर्येणसहमुथशिलयोगेसतिमहान्नृपोराजास्यात् ॥ ५ ॥ **अथान्यंद्रव्य नाशयोगमाह**—शनिस्थानइति । जन्मकालेशनिस्थानेशन्याक्रांतराशौवर्ष कालेकुजोभौमःदशमगःसन्यदिमुथहापश्यति तदापापकर्मतःनृपभीतिंवित्तना शंचदद्यात् ॥ ६ ॥

ईदृशेत्रिनवस्थेऽस्मिन्नूदग्धनष्टेऽघसंचयः ॥ मंदोऽब्दपोधिकारी त्रिधर्मगोधर्मवृद्धिदः ॥ ७ ॥ तस्मिन्दग्धेविनष्टेचपापकृद्धर्मनिंदकः ॥ ईदृशीदृक्फलंसूर्येगुरावित्थंनयार्थभाक् ॥ ८ ॥ तत्रस्थामुथहापुण्यागमंपापंखलाश्रयात् ॥ सूतौखेशेरवौखस्थेवर्षेमुथशिलंयदि ॥ ९ ॥ लग्नाधिपेनराज्याप्तिरुक्तावीर्यानुमानतः ॥ धर्मकर्माधिपौदग्धौधर्मराज्यक्षयावहौ ॥ १० ॥

अथपापपुण्यवृद्धियोगावाह–ईदृशइति । ईदृशेजन्मकालीनशन्याक्रांतराशौवर्षेत्रिनवस्थेतृतीयनवमस्थानस्थेऽस्मिन्भौमेदग्धेऽस्तंगतेनष्टेहीनबलेअघसंचयःअघस्यपापस्यसंचयोवृद्धिःस्यात् । अयमेकोयोगः ॥ **अथान्यः** ॥ मंदःशनैश्चरःअब्दपःवर्षस्वामीअधिकारीपंचाधिकारिणांमध्येअधिकारीभूत्वात्रिधर्मगःतृतीयनवमस्थानस्थश्चेत्स्यात्तदाधर्मवृद्धिदोभवति ॥ ७ ॥ **अथदुष्टयोगौशुभयोगंचाह**–तस्मिन्निति । तस्मिन्वर्षस्वामिनिशनौअधिकारिणिदग्धेवाविनष्टेवासतिपापकृद्धर्मनिंदकश्चभवेत् ॥ अयमेकोयोगः ॥ **अथान्यः** ॥ ईदृशिसूर्येवर्षस्वामिन्यधिकारिणित्रिनवगेदग्धेवाविनष्टेवासति ईदृक्फलंपापकृद्धर्मनिंदकश्चपुरुषःस्यात् । **अथशुभयोगः**॥गुरावित्थमिति । इत्थममुनाप्रकारेणवर्षस्वामिन्यधिकारिणितृतीयनवमगेदग्धेवाविनष्टेवागुरौसतिनयार्थभाक् नयेननीतिमार्गेणार्थंद्रव्यंप्राप्नोति ॥ ८ ॥ **अथमुथहासंबंधिशुभाशुभफलंश्लोकपूर्वार्धेनाह**–तत्रस्थेति । तत्रस्थातृतीयनवमस्थानस्थामुथहापुण्यागमनंकरोति । **अथराज्यप्राप्तियोगमाह**–सूताविति । सूतौजन्मकालेखेशेदशमभावस्वामिनिरवौसूर्ये वर्षेवर्षकालेखस्थेदशमस्थानेस्थितःसन्यदिलग्नाधिपेनवर्षलग्नस्वामिनासहमुथशिलंमुथशिलयोगोभवेत्तदावीर्यानुमानतःसूर्यस्यविश्वात्मकबलानुमानेनराज्याप्तिःराज्यप्राप्तिरुक्ताकथिता । **अथधर्मराज्यनाशयोगौश्लोकस्योत्तरार्धेनाह**–धर्मेति । धर्मकर्माधिपौनवमभावस्वामीदशमभावस्वामीएतावुभौदग्धौस्यातांतदाधर्मराज्यक्षयावहौनाशकर्तारौभवतः । नवमभावस्वामीदग्धबलश्चेत्तदाधर्मनाशः दशमभावाधीशश्चेद्दग्धबलस्तदाराज्यनाशः ॥ ९ ॥ १० ॥

इतिराज्यभावविचारः॥ ॥अथाऽऽयभावविचारः॥ अब्दपेज्ञेऽर्थगे लाभोवाणिज्याच्छुभदृग्युते ॥ सैंथिहेऽस्मिन्लग्नगतेलाभःपठन लेखनाद् ॥ १ ॥ अस्मिन्षष्ठाष्टांत्यगतेसक्रूरेनीचकर्मकृद् ॥ क्रूरेक्षणेनवालाभोऽस्तंगतेलिखनादितः ॥ २ ॥ जीवेऽब्दपेक्रूरह तेलग्नेहानिर्भयंनृपाद् ॥ अस्मिन्नधिकृतेद्यूनेव्यवहाराद्धनामयः ॥ ३ ॥ लग्नायेशेत्थशालेस्याल्लाभःस्वजनगौरवम् ॥ सर्वेपिलाभे वित्ताप्त्यैसबलानिर्बलानतु ॥ ४ ॥ सवीर्योज्ञःसमुथहोलग्नेऽर्थे सहमेशुभाः ॥ तदानिखातद्रव्यस्यलाभःपापदृशानतु ॥ ५ ॥

इतिदशमभावविचारः ॥ अथायभावविचारः ॥ तत्रलाभयोगमाह— अब्दपेज्ञइति । अब्दपे वर्षस्वामिनिज्ञे बुधेऽर्थगेधनभावगेशुभदृग्युतेशुभग्रहै र्दृष्टेयुक्तेसतिवाणिज्याल्लाभःस्यात् ॥ अयमेकोयोगः ॥ अथान्यः ॥ अस्मि न्बुधेवर्षस्वामिनि शुभग्रहैर्दृष्टयुक्तेसैंथिहाइंथिहायुक्तःलग्नगतेवर्षकालीनलग्नगते सतिपठनलेखनाल्लाभः ॥ १ ॥ अथाशुभंफलमाह—अस्मिन्निति । अस्मिन्बुधेवर्षाधीशेषष्ठाष्टांत्यगतेषष्ठाष्टमद्वादशस्थानगते सक्रूरे पापग्रहयुक्तेस ति नीचकर्मकृत् पुरुषःस्यात् । तादृशोबुधोवर्षस्वामीसन्षष्ठाष्टांत्यगेक्रूरेक्षणे पापग्रहैर्दृष्टेसतिलाभोनास्तीतिवाच्यम् ॥ २ ॥ वाअस्तगतेसति लिखनादि तःलेखनतःलाभोनास्ति ॥ अथाशुभशुभयोगावाह—जीवइति । जीवेगुरौ अब्दपेवर्षस्वामिनिक्रूरहतेपापग्रहपीडितेलग्नेवर्षलग्नेसतिहानिर्द्रव्यनाशःनृपात् राज्ञःसकाशात्भयंचस्यात॥अयमेकोयोगः॥अथान्यः॥ अस्मिन्गुरौअधिकृतेपं चाधिकारिणांमध्येअधिकारीसन् द्यूनेसप्तमस्थानेसतिव्यवहाराद्वाणिक्कर्मणाधना मयःद्रव्याप्तिःस्यात् ॥३॥ अथप्राप्तियोगावाह—लग्नायेशेत्थशालइति।वर्षल ग्नस्वामीआयेशःलाभभावस्वामी अनयोरित्थशालेपरस्परमुथशिलयोगेसतिला भःस्यात् स्वजनेषुगौरवंचस्यात् ॥ अयमेकोयोगः ॥ ॥ अथान्यः ॥ सर्वे पिसर्वग्रहाःसबलाःसंतःलाभेएकादशस्थानेसन्तोवित्ताप्त्यैद्रव्यप्राप्त्यैभवंति यदि लाभस्थाःसर्वेग्रहाःनिर्बलास्तदाद्रव्यप्राप्त्यैनभवंति ॥ ४ ॥ अथनिखातद्र व्यप्राप्तियोगमाह—सवीर्यइति । ज्ञोबुधःसवीर्यःबलयुक्तः पुनःकीदृशःसमु

इत्यायभावविचारः ॥ ॥ अथव्ययभावविचारः ॥ लग्नाब्दपौहत बलौव्ययषण्मृतिस्थौयद्राशिगौतदनुसारिफलंविचिंत्यम् ॥ षष्ठेऽब्दपेभृगुसुतेऽथविनष्टवीर्येदृष्टेखलैःक्षुतदृशाद्विपदर्क्षसंस्थे ॥ १ ॥ भृत्यक्षतिस्तुरगहाचतुरंघ्रिभस्थेऽन्यस्मिन्नपीदमुदितं फलमब्दनाथे ॥ स्वस्थेकुजेशशियुतेतुरगादिनाशःस्याद्व्याकुलत्वमशुभोपहतेव्ययेवा ॥ २ ॥

थहामुथहायुक्तोलग्नेवर्षलग्नेस्यात् बलिष्ठोमुथहासहितोबुधोवर्षलग्नेस्यादित्यर्थः। अर्थसहमेद्रव्यसहमेपिशुभाःशुभग्रहालग्नेचेत्स्युस्तदानिखातद्रव्यस्यगर्तस्थापित द्रव्यस्यलाभोभवेत् । पापदृशाएतादृशलग्नस्थयोगेपापग्रहैर्दृष्टेसतिनिखातद्रव्यस्यलाभोनस्यान्नास्त्येव॥५॥इत्यायभावविचारः ॥ ॥**अथव्ययभावविचारः॥**

अथसार्धश्लोकेनव्ययविचारमाह-लग्नाब्दपाविति। लग्नाब्दपौवर्षलग्नस्वामीव र्षस्वामिनौ हतबलौनिर्बलौ व्ययषण्मृतिस्थौद्वादशषष्ठाष्टमस्थानगतौसंतौयद्राशिगौयस्मिन्राशावास्थितौस्यातम् तदातदनुसारिफलंतस्मिन्स्थानेयादृशंफलमुक्तं तादृशंफलंविचिंत्यंज्ञातव्यम् । यथावर्षस्वामीषष्ठगतःसचतुष्पदराशिगतश्चेत्त दाचतुष्पदनाशोवाच्यः एवमष्टमद्वादशस्थयोरपीत्यर्थः । **अथषष्ठस्थानस्थितस्यशुक्रस्यविशेषमाह**-शुक्रइति । भृगुसुतेशुक्रेऽब्दपेवर्षस्वामिनिषष्ठेषष्ठस्थाने । विनष्टवीर्येहीनबलेस्वलैःपापग्रहैःक्षुतदृशाचतुर्थदशमैकसप्तमदृष्ट्या दृष्टे द्विपदर्क्षसंस्थेनृराशिसंस्थेसतिभृत्यक्षतिःसेवकानांनाशःस्यात् । तादृशेशुक्रेचतुरंघ्रिभस्थेचतुष्पदराशिगतेसतितुरगहाअश्वहानिकरःस्यात् अश्वइत्युपलक्षणम् । अन्यचतुष्पदहानिरपिद्रष्टव्या । एवमन्यस्मिन्नपि अब्दनाथेवर्षस्वामिनिषष्ठाष्टमद्वादशस्थानेपुनरपितद्राशिगेसति इदमुदितंपूर्वोक्तभृत्यनाशादिफलंवाच्यम् । अथवर्षस्वामीभौमस्तस्यस्थानविशेषेफलंश्लोकस्योत्तरार्धेनाह स्वस्थइति । वर्षस्वामिनिकुजेभौमे शशियुतेचंद्रयुक्ते खस्थेदशमस्थानस्थेसति अश्वादीनांनाशः मनसिव्याकुलत्वंचस्यात् । अथतादृशेचंद्रयुक्तेवर्षस्वामिनि

षष्ठेरवौखलहतेचतुरंघ्रिभस्थेभृत्यैःसमंकलिरथाष्टमरिःफगेऽपि ॥ मंदेऽब्दपेबलयुतेरिपुरिःफसंस्थे भूवासनद्रुमजलाशयनिर्मितिश्च ॥ ३ ॥ स्वर्क्षोच्चगेकर्मणिसूर्यपुत्रेनैरुज्यमर्थाधिगमश्चजीवे ॥ सूर्येन्नृपाद्बाहुबलात्कुजेऽर्थोबुधेभिषग्ज्योतिषकाव्यशिल्पैः ॥ ४ ॥

भौमेअशुभोपहतेपापग्रहहतेव्ययेद्वादशस्थानस्थेसतिअश्वादीनांनाशादिफलंवाच्यम् । अत्रशशियुतेइतिपाठः । स्वबुद्ध्याग्रंथकर्त्राकृतः । वस्तुतस्तु खस्थेकुजेशनियुतइतिपाठःपूर्वग्रंथानुरोधात् । **उक्तंचसमरसिंहेन**—शनियुजि कुजेगगनगेबाहुकुल्यंतुरंगनाशश्चेति । **ताजिकालंकारे**—भौमेमंदयुतेस्थितेच दशमेस्यादाकुलत्वंमनस्यश्वानांक्षतिरेवेति ॥ तथाच खस्थेकुजेशनियुतेतुरगादिनाशः आकुलत्वंच ॥ अयमेकोयोगः ॥ **अथान्यः** ॥ कुजेअशुभोपहते व्ययेसतीत्यर्थः । अथवापापाक्रांतेव्ययभवनेसति तुरगादिनाशइत्यादि ॥ १ ॥ ॥ २ ॥ **अथसूर्यशन्योरप्यब्दपयोरशुभस्थानगतयोःफलमाह**—षष्ठे इति । रवौसूर्ये वर्षस्वामिनिषष्ठेषष्ठस्थानेखलहते पापग्रहाक्रांतेचतुरंघ्रिभस्थे चतुष्पदराशिसंस्थे अथाष्टमरिःफगेपि अष्टमस्थानगतेऽथवाद्वादशस्थानगतेसति भृत्यैःसेवकैःसहकलिःकलहःस्यात् । अथमंदेशनौअब्दपेवर्षस्वामिनिबलयुते रिपुरीःफस्थे षष्ठद्वादशस्थानसंस्थेसति भूवासनंउज्जटभूमौग्रामनिर्मितिःतस्मिन् भूमौद्रुमाणांजलाशयानांकूपतडागानांनिर्मितिश्चस्यात् ॥ ३ ॥ **अथस्थानांतरगतानांग्रहाणांफलमाह**—स्वर्क्षोच्चगइति । सूर्यपुत्रेशनौवर्षस्वामिनिस्वर्क्षे स्वराशौमकरकुंभसंस्थे स्वोच्चेतुलाराशौस्थिते कर्मणिदशमस्थानेसति नैरुज्यंशरीरेआरोग्यमर्थाधिगमःद्रव्यप्राप्तिश्चस्यात् एतादृशेजीवेगुरौवर्षस्वामिनिधनुर्मीन कर्कस्थेदशमगतेसतिआरोग्यंद्रव्यप्राप्तिश्चस्यात् तादृशेसूर्येसिंहमेषस्थेसतिदशमस्थेराज्ञोनृपात्सकाशादर्थप्राप्तिः। एतादृशेकुजेभौमेवर्षस्वामिनिमेषवृश्चिकमकरगतेसतिदशमस्थेस्वबाहुबलाद्द्रव्यप्राप्तिःस्यात् । एतादृशेबुधेवर्षस्वामिनिमिथुनकन्यास्थेसतिदशमस्थेभिषक्ज्योतिषकाव्यशिल्पैःकृत्वाद्रव्यप्राप्तिःस्यात् ॥ ४ ॥

मंदेऽब्दपेगतबलेनैराश्यंदौःस्थ्यमादिशेत् ॥ सूर्येऽब्देशेशशिस्था नेमंदेऽब्दजनुषोर्हते ॥ ५ ॥ सर्वकर्मसुवैकल्यंवक्रेऽस्तेचतथापुनः ॥ कर्मकर्मेशसहमनाथाःशनियुतेक्षिताः ॥ ६ ॥ षडष्टव्ययगेऽब्देशेकर्मेशेचबलोज्झिते ॥ सूतावब्देचनशुभंतत्राऽब्देमृतिपेतथा ॥ ७ ॥ यत्रभावेशुभफलोदुष्टोवाजन्मनिग्रहः ॥ वर्षेतद्भावगस्तादृक्तत्फलंयच्छतिध्रुवम् ॥ ८ ॥

अथनिर्बलशनेः**फलंश्लोकपूर्वार्धेनाह**—मंदइति।मंदेशनैश्चरेअब्दपेवर्षस्वामिनिगतबलेनिर्बलेदशमस्थितेसतिनैराश्यंआशाराहित्यंदौःस्थंचंचलचित्तत्वमादिशेत्कथयेत्। **अथवर्षेशसूर्यस्यफलमाह**—श्लोकोत्तरार्धोत्तरश्लोकपूर्वार्धाभ्याम्। सूर्येऽब्देशेवर्षस्वामिनिसतिमंदेशनैश्चरेअब्दजनुषोःअब्देवर्षकालेजनुषिजन्मकालीनराशिस्थानेचंद्राक्रांतराशिगते तथाहतेवर्षकालजन्मकालयोर्हतेपापग्रहैःपीडितेसतिसर्वकर्मसु वैकल्यंज्ञानादिराहित्यंस्यात्। तथातादृशेपुनःशनौवक्रेअस्तंगतेवासतिसर्वकर्मसुवैकल्यंस्यात्। अथकर्मभावकर्मेश्वरकर्मसहमेश्वराणांशनियुतिदृष्टिभ्यामशुभफलमुत्तरार्धेनाह—कर्मेति । कर्मभावकर्मेशकर्मभावस्वामिसहमनाथाःकर्मसहमाधीशाःशनियुतेक्षिताःशनिनायुक्तादृष्टाश्चेद्भवंतितदासर्वकर्मसुवैकल्यंस्यात ॥५॥६॥ **अथदुष्टस्थानस्थस्यवर्षेशस्यफलमाह**-षडष्टव्ययगइति । अब्देशेवर्षस्वामिनिषडष्टव्ययगेषष्ठगेऽष्टमगतेद्वादशगतेवासति तथाकर्मेशेच्चदशमभावस्वामिनिसूतावब्देचसूतौजन्मकालेअब्देवर्षकालेचबलोज्झितेनिर्बलेनशुभंस्यात् । तत्राऽब्देतस्मिन्वर्षेमृतिपेअष्टमभावस्वामिनितथातद्वत्षष्ठाष्टमद्वादशगतेनिर्बलेवासतिनैवशुभंस्यात् ॥ ७ ॥ **अथवर्षेसामान्यतःशुभाशुभफलमाह**—यत्रभावइति । जन्मनिजन्मकालेयत्रयस्मिन्भावेशुभफलदोदुष्टफलदोवायःकश्चिद्ग्रहोऽस्तिसग्रहोवर्षेऽपितद्भावगःसन् तादृशस्तत्फलंशुभाशुभफलंध्रुवंनिश्चितंयच्छतिददाति ॥ ८ ॥

Indira Gandhi National Centre for the Arts

येजन्मनिस्युःसबलाविवीर्यावर्षेशुभंप्राक्चरमेत्वनिष्टम् ॥ दद्यु
र्विलोमंविपरीततायांतुल्यंफलंस्यादुभयत्रसाम्ये ॥ ९ ॥
॥ इतिव्ययभावविचारः ॥ ॥ श्रीगर्गान्वयभूषणोगणितविच्चिं
तामणिस्तत्सुतोऽनंतोऽनंतमतिर्व्यधात्खलमतिध्वस्त्यैजनुःपद्ध
तिम् ॥ तत्सूनुःखलुनीलकंठविबुधोविद्वच्छिवानुज्ञयासत्तुष्ट्यै
व्यदधाद्विवेचनमिदंभावेषुसत्ताजिकात् ॥ १० ॥ ॥ २ ॥
॥ अथदशाक्रमविचारः ॥ स्पष्टान्सलग्नान्खचरान्विधायरा
शीन्विनात्यल्पलवंतुपूर्वम् ॥ निवेश्यतस्मादधिकाधिकाश्चक्र
मादयंस्यात्तुदशाक्रमोऽब्दे ॥ १ ॥ न्यूनंविशोध्याधिकतःक्रमेणां
शाद्यंविशुद्धांशकशेषकैक्यम् ॥ सर्वाधिकांशोन्मितमेवतत्स्याद्दने
नवर्षस्यमितिस्तुभाज्या ॥ २ ॥ शुद्धांशकास्तान्गुणयेद्दनेनल
ब्धध्रुवांकेनभवेद्दशायाः ॥ मानंदिनाद्यंखलुसद्ग्रहस्यफलान्यथासां
निगदेत्तुशास्त्रात् ॥ ३ ॥

अथवर्षेग्रहाणांफलपाककालमाह–येजन्मनिस्युरिति । जन्मनिजन्म
कालेयेग्रहाःसबलाःबलिष्ठाःस्युस्तेग्रहाःवर्षेविवीर्यानिर्बलाःस्युस्तदातेग्रहाःप्राग्व
र्षस्यपूर्वार्धेसुखंदद्युः चरमेवर्षस्योत्तरार्धेत्वनिष्टंअशुभफलंदद्युः । अथविपरी
तायांउक्तवैपरीत्येविलोमं विपरीतंफलंदद्युः तद्यथा येग्रहाःजन्मकालेनिर्ब
लाःवर्षकालेसबलास्तेवर्षपूर्वार्धेअनिष्टंफलंदद्युः । वर्षोत्तरार्धेसुखंदद्युःउभय
त्रसाम्येतुल्यंफलंस्यात् तद्यथा येग्रहाजन्मकालेवर्षकालेपिबलिष्ठास्तेसंपूर्ण
वर्षेशुभंफलंदद्युः।येग्रहाजन्मकालेवर्षकालेचनिर्बलास्तेसंपूर्णेवर्षेदुःखमेवदद्युःग्र
हजनितंसर्वंफलंतत्तद्ग्रहदशायामंतर्दशायांवाच्यमितितत्वम् ॥ ९ ॥ इतिव्यय
भावविचारः ॥ **अथाधिकारोपसंहारमाह**–श्रीगर्गेति । स्पष्टम् ॥ १० ॥
इतिदिवाकरविरचितवर्षतंत्रटीकायांद्वादशभावविचारःसमाप्तः ॥ ॥ **अथदशा**
ध्यायोव्याख्यायते। तत्रदशासाधनंपूर्वमेवोक्तम्॥ **अथदशाफलान्याह**॥
तत्रपूर्णमध्याधमनष्टबलानांग्रहाणांफलपद्यानिस्पष्टार्थानि॥ १ ॥ २ ॥ ३ ॥

शुद्धांशसाम्येबलिनोदशाद्याबलस्यसाम्येऽल्पगतेस्तुपूर्वा॥ साम्ये
विलग्नस्यखगेनचिंत्याबलाधिकालग्नपतेर्विचिंत्या॥ ४ ॥ हेममु
क्ताफलद्रव्यलाभमारोग्यमुत्तमम् ॥ कुरुतेस्वामिसन्मानंदशाल
ग्नस्यशोभना॥५॥ लाभंदृष्टेनवित्तस्यमानहीनस्यसेवनम् ॥ मन
सोविकृतिंकुर्याद्दशालग्नस्यमध्यमा ॥ ६ ॥ विदेशगमनंक्लेशबु
द्धिनाशंकदव्ययम् ॥ मानहानिंकरोत्येवकष्टालग्नदशाफलम्॥७॥
क्रूरलग्नदशामध्यासौख्यंस्वल्पंधनव्ययम् ॥ अंगपीडांत्वपुष्टिंच
करुतेमृत्युविग्रहम् ॥ ८ ॥ दशारवेःपूर्णबलस्यलाभांगजाश्वहे
मांबररत्नपूर्णम् ॥ मानोदयंभूमिपतेर्ददातियशश्चदेवद्विजपूजना
देः ॥९॥ दशारवेर्मध्यबलस्यपूर्वमिदंफलंमध्यममेवदत्ते ॥ ग्रामा
धिकारव्यवसायधैर्यैःकुलानुमानाम्नसुखादिलाभः ॥ १० ॥
दशारवेरल्पबलस्यपुंसांददातिदुःखंस्वजनैर्विवादात् ॥ मतिभ्रमं
पित्तरुजंस्वतेजोविनाशनंधर्षणमप्यरिभ्यः ॥ ११ ॥ दशारवेर्नष्ट
बलस्यपुंसांनृपाद्रिपोर्वाभयमर्थनाशम् ॥ स्त्रीपुत्रमित्रादिजनैर्विवा
दंकरोतिबुद्धिभ्रममामयंच ॥ १२ ॥ लग्नाद्रविःषट्त्रिदशायसं
स्थोनिंद्योपिदत्तेशुभमर्धमेव ॥ मध्यत्वमूनःशुभताचमध्योयाती
स्थमत्यंतशुभःशुभःस्यात् ॥ १३ ॥

॥४॥५॥६॥७॥८॥९॥१०॥११॥१२॥ अथसूर्यस्यस्थान
विशेषावस्थित्याफलतारतम्येनदशाफलमाह—लग्नादिति । लग्नाद्रविःसूर्यःनिं
द्योपिनष्टबलोपित्रिदशायसंस्थःषष्ठतृतीयदशमैकादशस्थानसंस्थःसन्नर्धमेवशुभ
फलंस्वदशायांदत्तेददातीत्यर्थः । एवंषट्त्रिदशायसंस्थोरविरूनःहीनबलोपिस
न्मध्यत्वंमध्यमफलदःस्यात् एवमुपचयस्थानगतोमध्योमध्यमबलेपिशुभतांच
शुभफलंददाति । इत्थममुनाप्रकारेणोपचयस्थानगःशुभःपूर्णबलःअत्यंतंशुभः
स्यात् एतत्स्थानरहितोरविःअन्यस्मिन्स्थानेयथोक्तफलदःस्यात् । एवंसर्वत्र
व्याख्या ॥ १३ ॥

॥अथचंद्रदशाफलम्॥ इंदोर्दशापूर्णबलस्यदत्तेशुक्लांबरस्रङ्मणिमौक्तिकाद्यम् ॥ स्त्रीसंगमंराज्यसुखंचभूमिलाभंयशःकांतिबलाभिवृद्धिम्॥ १४ ॥ इंदोर्दशामध्यबलस्यसर्वमिदंफलंमध्यममेवदत्ते ॥ वाणिज्यमित्रांबरगेहसौख्यंधर्मेमतिंकर्षणतोऽन्नलाभम् ॥ १५ ॥ इंदोर्दशास्वल्पबलस्यदत्तेकफामयंकांतिविनाशमाहुः ॥ मित्रादिवैरंजननंकुमार्याधर्मार्थनाशंसुखमल्पमत्र॥ १६ ॥ इंदोर्दशानष्टबलस्यलोकापवादभीतिंधनधर्मनाशम् ॥ शीतामयंस्त्रीसुतमित्रवैरंदोस्थ्यंचदत्तेविरसान्नभुक्तिम् ॥ १७ ॥ षष्ठाष्टमांत्येतरराशिसंस्थोनिंद्योपिदत्तेऽर्धसुखंदशायाम् ॥ मध्यत्वमूनःशुभतांचमध्योयातीत्थमिंदुःसुशुभःशुभःस्यात् ॥ १८ ॥ ॥ अथभौमदशाफलम् ॥ दशापतिःपूर्णबलोमहीजःसेनापतित्वंतनुतेनराणाम् ॥ जयंरणेविद्रुमहेमरत्नवस्त्रादिलाभंप्रियसाहसत्वम् ॥१९॥ दशापतिर्मध्यबलोमहीजःकुलानुमानेनधनंददाति ॥ राजाधिकारोऽप्यथतत्परत्वंतेजस्विताकांतिबलाभिवृद्धिम् ॥२०॥दशापतिःस्वल्पबलोमहीजोददातिपित्तोष्णरुजंशरीरे ॥ रिपोर्भयंबंधनमास्यतोऽसृक्स्रवंचवैरंस्वजनैश्वशश्वत् ॥ २१ ॥ दशापतिर्नष्टबलोमहीजोविवादमुग्रंजनयेद्व्रणंवा ॥ चौराद्भयंरक्तरुजंज्वरंचविपत्तिमन्यस्वहृतिंचखर्जूम् ॥ २२ ॥ त्रिषडायगतोभौमोनष्टवीर्यःशुभार्धदः ॥ मध्योहीनशुभोमध्यःशुभोऽत्यंतंशुभावहः ॥ २३ ॥ अथ बुधदशाफलम् ॥ ॥ दशापतिःपूर्णबलोबुधश्चेद्यशोऽभिवृद्धिंगणितात्सुशिल्पात् ॥ तनोतिसेवांसफलांनृपादेर्दूत्यंचवैदूष्यगणोदयंच ॥२४॥ दशापतिर्मध्यबलोबुधश्चेद्गुरोःसुहृद्भ्योलिपिकाव्यशिल्पैः ॥ धनाप्तिदायीसुतमित्रबंधुसमागमान्मध्यममेवसौख्यम् ॥ २५ ॥

॥१४॥ १५ ॥ १६॥ १७॥ १८ ॥ १९ ॥२०॥२१॥ २२ ॥ २३॥ २४ ॥ २५॥

दशापतौस्वल्पबलेबुधेस्यान्मानस्यनाशःस्वजनापवादः ॥ अर्का
यकोपस्खलनाद्यनिष्टंधनव्ययंरोगभयंचविंद्यात् ॥ २६ ॥
दशापतौहीनबलेबुधेस्यात्स्वबुद्धिदोषोवधबंधभीतिः ॥ दूरेग
तिर्वातकफामयार्तिर्निखातवित्तस्यचनापिलाभः ॥ २७ ॥
षडष्टांत्येतरर्क्षस्थोनष्टोज्ञोऽर्धशुभप्रदः ॥ मध्योहीनःशुभोमध्यः
शुभोऽत्यंतंशुभावहः ॥ २८ ॥ ॥ अथगुरुदशाफलम् ॥
गुरोर्दशापूर्णबलस्यदत्तेमानोदयंराजसुहृद्गुरुभ्यः ॥ कीर्त्यर्थला
भोपचयंसुखानिराज्यंसुताप्तिंरिपुरोगनाशम् ॥ २९ ॥ गुरोर्दशा
मध्यबलस्यधर्मेमतिंसखित्वंनृपमंत्रिवर्गैः ॥ तनोतिमानार्थसुखा
भिलाभंसिद्धिंसदुत्साहबलातिरेकाम् ॥ ३० ॥ दशागुरोरल्पब
लस्यदत्तेरोगंदरिद्रत्वमथारिभीतिम् ॥ कर्णामयंधर्मधनप्रणाशंवै
राग्यमर्थंचगुणंनकिंचित् ॥ ३१ ॥ गुरोर्दशानष्टबलस्यपुंसांददा
तिदुःखानिरुजंकफार्तिम् ॥ कलत्रपुत्रस्वजनारिभीतिंधर्मार्थनाशं
तनुपीडनंच ॥ ३२ ॥ षडष्टरिःफेतरगोगुरुर्निद्योऽर्धसत्फलः॥ म
ध्योहीनःशुभोमध्यःशुभोऽत्यंतंशुभावहः ॥३३॥ ॥ अथशुक्रदशा
फलम्॥ दशाभृगोःपूर्णबलस्यसौख्यंस्रग्गंधहेमांबरकामिनीभ्यः॥
हयादिलाभःसुतकीर्तितोषानैरुज्यगांधर्वरतिःपदाप्तिः ॥ ३४ ॥
दशाभृगोर्मध्यबलस्यदत्तेवाणिज्यतोऽर्थागमनंकृषेश्च ॥ मिष्टान्न
पानांबरभोगलाभंमित्रांश्चयोषित्सुतसौख्यलाभम् ॥ ३५ ॥ द
शाभृगोरल्पबलस्यदत्तेमतिभ्रमंज्ञानयशोऽर्थनाशम् ॥ कदन्नभो
ज्यंव्यसनाम्नायार्तिंस्त्रीपक्षवैरंकलिमप्यरिभ्यः॥ ३६ ॥ दशाभृगो
र्नष्टबलस्यदत्तेविदेशयानंस्वजनैर्विरोधम् ॥ पुत्रार्थभार्याविपदोरु
जश्चमतिभ्रमोपिव्यसनंमहच्च ॥ ३७ ॥

॥ २६ ॥ २७ ॥ २८ ॥ २९ ॥ ३० ॥ ३१ ॥ ३२ ॥ ३३ ॥ ३४ ॥
॥ ३५ ॥ ३६ ॥ ३७ ॥

षडष्टरिःफेतरगोभृगुर्निद्योऽर्धसत्फलः ॥ मध्योहीनःशुभोमध्यः शुभोऽत्यंतंशुभावहः ॥ ३८ ॥ ॥ अथशनिदशाफलम् ॥ दशा शनेःपूर्णबलस्यदत्तेनवीनवेश्माबरभूमिसौख्यम् ॥ आरामतोया श्रयनिर्मितिश्चम्लेंच्छातिसंगान्नृपतेर्धनाप्तिः ॥ ३९ ॥ दशाशने र्मध्यबलस्यदत्तेखरोष्ट्रपाखंडजतोधनाप्तिः ॥ वृद्धांगनासंगमदुर्गर क्षाधिकारचिंताविरसान्नभोगः ॥ ४० ॥ दशाशनेःस्वल्पबलस्य पुंसांतनोतिदुःखेरिपुतस्करेभ्यः ॥ दारिद्यमात्मीयजनापवादंरोगं चशीतानिलकोपमुग्रम् ॥ ४१ ॥ दशाशनेर्नष्टबलस्यपुंसामनेकधा तुव्यसनानिदत्ते ॥ स्त्रीपुत्रमित्रस्वजनैर्विरोधंरोगाभिवृद्धिमरणेन तुल्यम् ॥ ४२ ॥ त्रिषष्ठलाभोपगतोमंदोनिंद्योऽर्धसत्फलः ॥ म ध्योहीनःशुभोमध्यःशुभोऽत्यंतंशुभावहः ॥ ४३ ॥ दशातनोःस्वा मिबलेनतुल्यंफलंददातीत्यपरोविशेषः ॥ चरेशुभामध्यफलाऽध माचद्विमूर्तिभेऽस्माद्विपरीतमूह्यम् ॥ ४४ ॥ अनिष्टमिष्टंचसम स्थिरर्क्षेक्रमाद्दृकाणैःफलमुक्तमाद्यैः ॥ सत्स्वामियोगेक्षणतःशुभं स्यात्पापेक्षणात्कष्टफलंचवाच्यम् ॥ ४५ ॥

॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ ४२ ॥ ४३ ॥ अथलग्नदशाफलं वक्तुकामस्तावल्लग्नस्वामिफलानि चरादिलग्नगतद्रेष्काणवशेनफलतारतम्यंश्लो काभ्यामाह दशातनोरिति । तनोर्लग्नस्यदशास्वामिबलेनतुल्यं स्वस्वामिनो यादृशंबलंतादृशंफलंददाति ॥ ॥ अथलग्नदशायामपरोविशेषः ॥ चरेलग्नेसतिप्रथमेद्रेष्काणेयदितदाशुभाशुभफलदादशास्यात् यदिद्वितीयद्रे ष्काणेलग्नंतदामध्यफलदादशास्यात् यदितृतीयद्रेष्काणेलग्नंतदाअधमफलद शास्यात् द्विमूर्तिभेद्विस्वभावलग्नेअस्माच्चरलग्नाद्विपरीतमूह्यम् । तद्य था-द्विस्वभावराशौलग्नंप्रथमद्रेष्काणेदशाअधमफलदा । द्वितीयद्रेष्काणेतदा दशामध्यमफलदा तृतीयद्रेष्काणेतदाशुभफलदास्यादित्यर्थः ॥ ४४ ॥ अनिष्टमिति स्थिरर्क्षेस्थिरराशौलग्नगतेयदिप्रथमद्रेष्काणस्तदानिष्टमनिष्टफलदा

दशामानंसमामानंप्रकल्प्योक्तेनवर्त्मना ॥ अंतर्दशाःसाधनीयाः प्राक्पात्यांशवशेनतु ॥ ४६ ॥ आदावंतर्दशापाकपतेस्तत्क्रम तोऽपराः ॥ शुभेक्षणान्वयान्मैत्र्यातत्फलंपरिचिंतयेत् ॥ ४७ ॥ चंद्रारजीवाःसौम्येज्यशुक्रारविविधूतथा ॥ मंदेज्यशुक्रासूर्येंदुभौ माःसौम्येज्यसूर्यजाः ॥ ४८ ॥ जीवज्ञशुक्राःसूर्यादेःशुभाअंतर्द शाइमाः ॥ अन्येषामशुभाज्ञयोइतिवामनभाषितम् ॥ ४९ ॥ इतिग्रहदशाफलानि ॥ ॥ अथभावस्थग्रहफलान्युच्यंते ॥सूर्यार मंदास्तनुगाज्वरार्तिंधनक्षयंपापयुगिंदुरित्थम् ॥ शुभान्वितःपु ष्टतनुश्चसौख्यंजीवज्ञशुक्राधनधान्यलाभम् ॥ ५० ॥

दशा यदिद्वितीयोद्रेष्काणस्तदाइष्टंउत्तमफलदादशा यदितृतीयद्रेष्काणस्तदा समंमध्यमफलदादशेत्यर्थः । क्रमादाद्यैःपूर्वाचार्यैर्द्रेष्काणैर्द्रेष्काणवशाल्लग्नदशा याःफलमुक्तम् । **अथापवादमाह**–सत्स्वामीति । तल्लग्नंसत्शुभग्रहःस्वामि नाचयोगेक्षणतःयुतमीक्षितंचेत्स्यात्तदाअशुभफलमपिशुभंस्यात् शुभंचेच्छुभ तरंस्यात् । यदितल्लग्नंपापेक्षणात्पापग्रहैःस्वामिव्यतिरिक्तैर्दृष्टंयुतंवाचेत्स्यात्त दाकष्टफलंवाच्यम् अत्रचतुर्विधग्रहबलवशाद्दशाफलंवाच्यम् । तद्यथा–पंचदश विंशोपकाधिकोग्रहोविंशत्यंशावधिपूर्णबलः दशविंशोपकाधिकोग्रहःपंचदशविं शोपकावधिमध्यबलः पंचविंशोपकाधिकोदशावधिअधमबलः पंचविंशोपकादूने नष्टबलइति । उक्तंचवामनेन पूर्णमध्याधमानष्टान्ग्रहोक्षान्वादशाफलम् ॥ तत्क्रमेणैववक्ष्यामिप्रत्येकंचचतुर्विधामिति । इतिदशाफलानि ॥ ग्रहदशास्वं तर्दशासाधनंपूर्वमेवोक्तम् ॥ ४५ ॥ ४६ ॥ ४७ ॥ ४८ ॥ ४९ ॥ इतिदि वाकरविरचितेदशांतर्दशाध्यायः ॥ **अथसकलभावस्थग्रहफलान्याह**–तत्र तावल्लग्नस्थितसकलग्रहफलमाह सूर्यारेति । सूर्यभौमशनयःप्रत्येकंसामुदायिकं वातनुगालग्नगतायदिस्युस्तदाज्वरार्तिज्वरपीडाधनक्षयंचकुर्युः । इत्थममुनाप्र कारेणपापयुगिंदुःपापग्रहयुक्तइंदुश्चेत्तथापिज्वरार्तिंधनक्षयंचकुर्यात् । यदाचंद्रः पुष्टतनुःवर्धमानतनुःशुभान्वितःशुभग्रहैर्युक्तश्चलग्नगःसन्सौख्यंकरोति तथाजी

चंद्रज्ञजीवास्फुजितोधनस्थाधनागमंराज्यसुखंचदद्युः ॥ पापाधनस्थाधनहानिदास्युर्नृपाद्भयंकार्यविघातमार्किः॥५१॥दुश्चिक्यगाः खलखगाधनधर्मराज्यलाभप्रदाबलयुताःक्षितिलाभदाःस्युः॥ सौम्याःसुखार्थसुतमानयशोविलासलाभायहर्षमतुलंकिलतत्रचंद्रः ॥ ॥५२॥चंद्रःसुखेखलयुतोव्यसनंरुजंचपुष्टःशुभेनसहितःसुखमातनोति॥सौम्यःसुखंविविधमत्रखलाःसुखार्थनाशंरुजंव्यसनमप्यतुलंभयंच॥ ५३ ॥पुत्रवित्तसुखसंचयंशुभाःपुत्रगाभृगुसुतोऽतिहर्षदः ॥ पुत्रवित्तधनबुद्धिहारकास्तस्करामयकलिप्रदाःखलाः ॥ ५४ ॥ षष्ठेपापावित्तलाभंसुखाप्तिंभौमेऽत्यंतंहर्षदःशत्रुनाशम् ॥ सौम्याभीतिंवित्तनाशंकलिंचचंद्रोरोगंपापयुक्तःकरोति ॥ ५५॥ सपापःशशीसप्तमोव्याधिभीतिंखलाःस्त्रीविनाशंकलिंभृत्यभीतिम् ॥ शुभाःकुर्वते वित्तलाभंसुखाप्तिंयशोराजमानोदयंबंधुसौख्यम् ॥५६॥ चंद्रोऽष्टमेनिधनदःखलखेटयुक्तःपापाश्चतत्रमृतितुल्यफलंचविंद्यात् ॥ सौम्याःस्वधातुवशतोरुजमर्थहानिंमानक्षयंमुथशिलेशुभजेशुभंच ॥ ५७ ॥ तपसिसोदरभीःपशुपीडनंखलखगेतिमुदोरविरत्रचेत् ॥ शुभखगाधनधर्मविवृद्धिदाःखलखगेपिशुभान्यपरेजगुः ॥ ५८ ॥

वज्ञशुक्रालग्नगाश्चेत्स्युस्तदाधनराज्यलाभंकुर्युः ॥ ५० ॥ **अथधनभावस्थितसकलग्रहफलमाह**—चंद्रेतिस्पष्टम् । अष्टमभावफलपर्यंतंस्पष्टम् ॥ ५१॥ ॥ ५२ ॥ ५३ ॥ ५४ ॥ ५५ ॥ ५६ ॥ ५७ ॥ **अथनवमभावगतसकलग्रहफलमाह**—तपसीति । तपसिनवमस्थानेखलगेपापग्रहेसतिसोदरभीः पशुपीडनंचस्यात् । अत्रचेद्रविःसूर्यस्तदामुदःहर्षयुक्तोभवति रवेस्तत्रहर्षस्थानस्थितत्वात् । शुभखगाःशुभग्रहानवमस्थानस्थाःधनधर्मविवृद्धिदाः खलखगेपिनवमस्थानस्थेसतिशुभाशुभफलदाइत्यपरेजगुः ॥ ५८ ॥

गगनगोरविजः पशुवित्तहारविकुजौव्यवसायपराक्रमौ॥ धनसुखा
निपरेचधनात्मजाऽवनिपसंगमुखानिवितन्वते ॥५९॥लाभेधनोप
चयसौख्ययशोभिवृद्धिंसन्मित्रसंगबलपुष्टिकराश्चसर्वे ॥ क्रूराबलेन
रहिताःसुतवित्तबुद्धिनाशंशुभास्तुतनुतांस्वफलस्यकुर्युः ॥ ६० ॥
पापाव्ययेनेत्ररुजंविवादंहानिंधनानांनृपतस्करादेः ॥ सौम्याव्ययं
सद्व्यवहारमार्गेकुर्युःशनिर्हर्षविवृद्धिमत्र ॥ ६१ ॥ इतिभावस्थ
ग्रहफलानि ॥ ॥श्रीगर्गान्वयभूषणोगणितविच्चिंतामणिस्तत्सुतो
ऽनंतोऽनंतमतिर्व्यधात्खलमतिध्वस्त्यैजनुःपद्धतिम् ॥ तत्सूनुः
खलुनीलकंठविबुधोविद्वच्छिवानुज्ञयाभावस्थग्रहपाकदौःस्थ्यसु
खतायुक्तंफलंसोऽभ्यधात् ॥ ६२ ॥ ३ ॥

द्वादशपर्यंतंस्पष्टं हर्षविवृद्धिमत्रेतिद्वादशशनेर्हर्षस्थानत्वात्॥५९॥६०॥६१॥
॥६२॥इतिवर्षतंत्रटीकायाभावफलाध्यायः॥ अथमासदिनप्रवेशफलाध्यायः
तत्रसंज्ञातंत्रोक्तप्रकारेणमासदिनप्रवेशकालौनिर्णीयअधिकारिनिर्णयंश्लोकष
ट्केनाह—मासेतिषड्भिः । मासप्रवेशकालेपूर्वोक्तप्रकारेणग्रहान्भावांश्चतन्वादि
द्वादशभावांश्चसाधयेत् तदनंतरंमासपतिनिर्णयार्थंषडधिकारिणोविचार्यास्तद्यथा
तत्रएकःमासतनोर्नाथोमासलग्नस्वामीद्वितीयःमुथहेशोवर्षकालीनमुथहासार्धद्वयां
शगणितगतमाससंख्ययायुतासामासमुथहाज्ञेयातस्याःस्वामी तथातृतीयोजन्म
लग्नस्वामी चतुर्थस्त्रिराशिपःत्रिराशिकस्वामी तथादिनानिशोरवींदुभपतिःपंचमः
दिवसेमासप्रवेशश्चेत्तदासूर्याक्रांतराशिस्वामी रात्रौमासप्रवेशश्चेत्तदाचंद्राक्रांतरा
शिस्वामी तथावर्षप्रवेशलग्नस्वामीषष्ठःएषांषण्णामधिकारिणांमध्येवीर्याधिकःबला
धिकःसन्त्र तनुंलग्नंपश्यन्मासपतिः सएवमासस्वामीज्ञेयः । लग्नमनीक्षमाणेत्या
दिपूर्ववत्ज्ञेयम् इतःमासपतेःसकाशाच्छुभाशुभंफलंवाच्यम् । अत्रपरेआचा
र्याः मासलग्नस्वामिनमेवमासस्वामीत्यूचिरेउक्तवंतः तेषांमतेपूर्वोक्ता
धिकारिणःसंत्येव तथाअन्येषांमतेदिनलग्नेशंदिनप्रवेशलग्नस्वामिनंदिनेशं
विचक्षणाःदैवज्ञाःप्रोचुः । अत्रापिअधिकारिनिर्णयोनास्त्येव । एवंनिर्णीत

Indira Gandhi National Centre for the Arts

अथमासप्रवेशफलानि ॥ मासार्कस्यतदासन्नपंक्तिस्थेनसहांतरम् ॥ कलीकृत्वार्कगत्याप्तंदिनाद्येनयुतोनितम् ॥ १ ॥ तत्पंक्तिस्थंवारपूर्वंमासार्केऽधिकहीनके ॥ तद्वाराद्येमासवेशोद्युवेशोप्येवमेवहि ॥ २ ॥ मासप्रवेशकालेज्ञोग्रहान्भावांश्वसाधयेत् ॥ तत्रमासतनोर्नाथोमुंथहोजन्मपस्तथा ॥ ३ ॥ त्रिराशिपोदिननिशोरवींदूभपतिस्तथा ॥ अब्दप्रवेशलग्नेशएषांवीर्याधिकस्तनुम् ॥ ४ ॥ पश्यन्मासपतिर्ज्ञेयस्ततोवाच्यंशुभाशुभम् ॥ अपरेमासलग्नेशंमासाधिपतिमूचिरे ॥ ५ ॥ दिनेशंदिनलग्नेशंतथाप्रोचुर्विचक्षणाः ॥ मासघस्रेशयोर्वाच्यंफलंवर्षेशवद्बुधैः ॥ ६ ॥ लग्नांशाधिपतिर्विलग्नपनवांशेशेनमैत्रीदृशा दृष्टोवासहितःशशीचयदितौमैत्रीदृशालोकते ॥ तस्मिन्मासितनौसुखंबहुविधंनैरुज्यमित्थंफलं तावद्यावदिमेस्युरित्थमथतान्संचार्यवाच्यंफलम् ॥ ७ ॥ तौचेच्छत्रुदृशामिथश्वशशिनादृष्टौमनोदुःखदौरोगाधिक्यकरौचकश्चिदनयोर्नीचोस्तगोवायदि ॥ कष्टात्सौख्यमिहद्वयंयदिपुनर्नीचास्तगंस्यान्मृतिःसूत्यब्दोद्भवरिष्टतोमृतिसमंस्यादन्यथेत्यूचिरे ॥ ८ ॥

योर्मासदिनप्रवेशस्वामिनोःफलंवर्षेशवद्बुधैर्वाच्यम ॥ १ ॥ २ ॥ ३ ॥ ४ ॥ ॥ ५ ॥ ६ ॥ **अथमासफलमाह**—लग्नांशाधिपतिरिति । लग्नांशाधिपतिःमासलग्नगतनवांशस्वामी विलग्नपनवांशेनमासलग्नस्वामीग्रहाक्रांतराशितन्नवांशस्वामिना शुभग्रहेणपापग्रहेणवा मैत्रिदृशामित्रदृशा तृतीयैकादशनवमपंचमदृष्ट्यादृष्टोवायुक्तश्चेत्स्यात् चपुनःशशीचंद्रः यदितौमासलग्नस्वामीमासलग्ननवांशस्वामिनौ मैत्रिदृशामित्रदृष्ट्याआलोकतेपश्यति तदातस्मिन्मासितनौशरीरेनानाविधंबहुप्रकारंसुखंनीरोगताचस्यात् । इत्थममुनाप्रकारेणमासफलंतावत्कालपर्यंतंस्यात्यावादिमेग्रहाः लग्ननवांशस्वामिलग्नेश्वरांशस्वामिनौचंद्रश्च इत्थमेवंप्रकारकाःस्युः । अयमर्थः । एषांत्रयाणांप्रत्यहंगच्छतांयावत्तद्राशिसंचारस्तावत्कालपर्यंतंशुभफलंवाच्यम ॥ ७ ॥ **अथानिष्टफलमाह**—तौचेच्छत्रुदृशेति । तौलग्नांशनाथलग्नेश्वरांशनाथौचेत्मिथःपरस्परंशत्रुदृशा चतुर्थदशमैक

भावांशाधिपतिःस्वभावपनवांशेशेनमैत्रीदृशादृष्टोवासहितःशशी चयदितौमैत्रीदृशालोकते ॥ तद्भावोत्थसुखंविलोक्यमथतद्व्यत्या सतःकीर्तितंनीचास्तादिफलंचलग्नवदिदंविद्वद्भिरूह्यंधिया ॥ ९ ॥ लग्नेशमासेशसमेश्वरांशनाथायदंशाधिपमित्रदृष्ट्या ॥ दृष्टायुता वाशशिनाचतत्तद्भावोत्थसौख्यायनचेदनिष्टम् ॥ १० ॥

सप्तमदृष्ट्यादृष्टौ पुनस्तादृशौशशिनाचंद्रेणापिशत्रुदृष्ट्यादृष्टौसंतौ मनोदुःखदौ मनसःदुःखकरौरागाधिक्यकरौचस्याताम् । अनयोर्लग्नांशनाथलग्नेश्वरांशनाथ योर्मध्येयःकश्चिन्नीचोनीचराशिगतोऽस्तंगतोवायदिस्यात्तदाकष्टात्सौख्यं कष्टं प्राप्यपश्चात्सौख्यदःस्यात्। इहयदिद्वयंतौद्वावपिपुनःनीचास्तगौनीचगामिनौअ स्तंगतौवाअथवाएकःनीचगःअपरःअस्तंगतोवातदामृतिर्मरणंस्यात्।सूतौजन्मका लेअब्देवर्षकालेचरिष्टयोगोत्पत्तिःस्यात् । अन्यथाजन्मकालवर्षकालयोरिष्टयोगा भावस्तदामृतिसमंकष्टंस्यादित्यूचिरेउक्तवंतः ॥ ८ ॥ **अथमासलग्नसंबंधि शुभाशुभफलमुक्त्वा** इदानींधनभवनादिद्वादशांतेषुभावेषुतादृशमेव**शुभाशु- भफलमाह**–भावांशाधिपतिरिति । भावांशाधिपतिःमासलग्नेयद्भावविचारःक्रि यते तद्भावनवांशस्वामीस्वभाववशेननवांशेन तद्भावस्वामिनामैत्रीदृशामित्रदृ ष्ट्यादृष्टोवासहितोयुक्तोवाभवेत् तत्रशशीचंद्रोपियदितौद्वौभावनवांशस्वामिभाव स्वामिनवांशस्वामिनौमित्रदृष्ट्यालोकतेपश्यति तदातद्भावोत्थसुखंतस्मिन्मासि भवति । अथतद्व्यत्यासतःविलोममिति । तद्यथा–यदातौद्वौग्रहौशत्रुदृष्ट्यादृ- ष्टौयुक्तौवाभवतस्तौचेच्चंद्रोपिशत्रुदृष्ट्यापश्यति तदाविलोमंविपरीतंतद्भावसंबं धिकष्टंतस्मिन्मासिकीर्तितंकथितम् इदंनीचास्तादिफलंचलग्नवत्धियाबुद्ध्या विद्वद्भिरूह्यंज्ञातव्यम् यद्यथा–तयोर्द्वयोर्मध्येएकोनीचगःअस्तगोवाभवेत्तदात द्भावसंबंधिदुःखमनुभूयपश्चात्सुखंप्राप्नोति । यदातुद्वावपिनीचगावस्तगौवातदात स्मिन्मासितद्भावोत्थदुःखप्राप्तिरेवस्यात् ॥ ९ ॥ **अथप्रकारांतरेणतद्भावसौ ख्यमाह**–लग्नेशेति । लग्नेशोवर्षलग्नस्वामी मासेशःमासस्वामी समेश्वरोवर्ष

निर्बलाव्ययषष्ठाष्टांशपाःसत्फलदायकाः ॥ अन्येसवीर्याःशुभदा व्यत्ययेव्यत्ययःस्मृतः ॥ ११ ॥ लग्नेशमासेशसमेशमुंथाधीशाः षडष्टोपगताःसपापाः ॥ दृष्टाःखलैःशत्रुदृशाऽत्रमासेव्याध्यादिविद्विड्भयदुःखदाःस्युः ॥ १२ ॥ केंद्रत्रिकोणायगतास्तुलग्नमासाब्दपावीर्ययुतानराणाम् ॥ नैरुज्यशत्रुक्षयराज्यलाभमानोदयात्यद्भुतकीर्तिदाःस्युः ॥ १३ ॥

स्वामी अंशनाथःमासलग्नस्यांशस्वामी एतेचत्वारोयत्र्यस्ययस्यभावस्यांशाधिपनवांशस्वामिनास्वामिभ्यांस्वामीवामित्रदृष्ट्यादृष्टोयुतोवा तथैतेपुनःशशिनाचंद्रेणमित्रदृष्ट्यादृष्टायुक्तावाचेत्स्युस्तद्भावोत्थसौख्यायतस्यतस्यभावस्य धनसहजादेःसौख्यंस्यात् नचेदनिष्टमिति अनिष्टंभवति ॥ १० ॥ अथकेवललग्ननवांशवशादेवतत्तद्भावजशुभाशुभफलमाह–निर्बलाइति।एषांव्ययषष्ठाष्टांशपाःव्ययभावषष्ठभावाष्टमभावानामनिष्टानामंशपाः नवांशस्वामिनश्चेन्निर्बलाःस्युस्तदासत्फलदायकाःतद्भावेभ्यःशुभफलदायकाःस्मृताः । अन्येउर्वरितभावानांनवांशस्वामिनःसवीर्याबलिष्ठाश्चेत्स्युस्तदातत्तद्भावेभ्यःशुभदाःशुभफलदातारःस्युः। व्यत्ययेव्यत्ययइति यदाव्यत्ययेनषष्ठाष्टमभावनवांशस्वामिनः सबलाश्चेत्स्युस्तदादुष्टफलदातारःस्युः। तथाअन्यभावनवांशस्वामिनश्चेन्निर्बलाःस्युस्तदादुष्टफलदातारइत्यर्थः ॥ ११ ॥ अथाधिग्रहाणांविरुद्धस्थानावस्थित्यानिष्टफलमाह–लग्नेशेति । लग्नेशःवर्षलग्नस्वामी मासेशःमासस्वामी समेशोवर्षस्वामी मुंथाधीशोमुंथास्वामी एतेचत्वारःषडष्टोपगताःषष्ठाष्टमस्थानस्थिताःसंतःसपापाःपापग्रहयुक्ताःखलैःपापग्रहैःशत्रुदृशाचतुर्थदशमैकसप्तमदृष्ट्यादृष्टाअत्रअस्मिन्मासेव्याधिद्विड्भयदुःखंव्याधिशत्रूद्भवदुःखदाःस्युः॥ १२॥ अथैषामेवअधिकारिग्रहाणांविहितस्थानावस्थित्याशुभाशुभफलमाह–केंद्रत्रिकोणायेति । वर्षलग्नेशमासेशवर्षेश्वराःबलिनःकेंद्रत्रिकोणायगताः केंद्राणिलग्नचतुर्थसप्तमदशमस्थानानि त्रिकोणंनवमंपंचमं आयमेकादशं तदन्यतमस्थानस्थिताःक्रमेणान्वयः सर्वेषांशुभस्थानानांसाधारण्यात्। शेषंस्पष्टम् ॥ १३ ॥

इंथिहालग्नपोराशिर्योबलीतत्रहद्दपाः ॥ दशेशाःस्वांशतुल्याहैरि रयुक्तंकैश्विदागमात् ॥ १४ ॥रवींद्वोरसमावेशान्नैतद्युक्तंपरेजगुः॥ दशांतरदशाच्छेदेफलमाब्दंतुयुज्यते ॥ १५ ॥ दिनप्रवेशकाले पिग्रहान्भावांश्चसाधयेत् ॥ चंद्रलग्नांशकाभ्यांतुफलंतत्रवदेद्बुधः ॥ १६ ॥ चतुष्कमिंथिहेशादिदिनमासाब्दलग्नपाः ॥ एषांबली तनुंपश्यन्दिनेशःपरिकीर्तितः ॥ १७ ॥ त्रिकोणकेंद्रायगताः शुभाश्चेच्चंद्रात्तनोर्वाबलिनःखलास्तु ॥ षट्त्र्यायगास्तत्रदिनेसुखा निविलासमानार्थयशोयुतानि ॥ १८ ॥ षडष्टरिःफोपगतादिना ब्दमासेन्थिहेशाःलखखेटयुक्ताः ॥ गदप्रदामानयशोहराश्चकेंद्र त्रिकोणायगताःसुखाप्त्यै ॥ १९ ॥

अथमतांतरमाह—इंथिहालग्नपोरिति । इंथिहामासमुंथहालग्नपयोर्मासलग्नप योर्मध्येबलीराशिः तत्रतस्मिन्राशौयेहद्दांशस्वामिनःतेस्वांशतुल्यैर्दिनैर्दशास्वा मिनोभवंति। पाठक्रमेणएवमागमात्मूलशास्त्रात्कैश्चिदुक्तम् ॥१४॥ **अथान्यैरे तद्दूषितमित्याह**—रवींद्वोरिति । परेआचार्याःएतत्पूर्वमतंसूर्यचंद्रयोःअसमा वेशात्संबंधाभावात्युक्तंसत्नजगुःनेत्याहुः । **अथमासदशांतर्दशयोःफल- माह**—दशांतरदशाच्छेदइति । दशांतर्दशायांवर्षदशांतरदशाविभागरीत्याक्ष तविभागेवर्षोक्तंदशाफलंवक्तुंयुक्तंभवति ॥ १५ ॥ **अथदिनेशफलमाह**— दिनप्रवेशेति । दिनप्रवेशसमयेपिमासप्रवेशकालेनसमुच्चयार्थः खेटान्सूर्या दिग्रहान्लग्नादिद्वादशांशाधिभावान्साधयेत्कुर्यात् । तत्रदिनप्रवेशेचंद्रलग्न योर्नवांशाभ्यांबुधःपंडितःफलंशुभाशुभंकथयेत् ॥ १६ ॥ **अथदिनस्वामि निर्णयमाह**—चतुष्कमिति । इंथिहेशादिचतुष्कंमुथहेशजन्मलग्नेशत्रैराशिके शदिनप्रवेशदिनरात्रीशइति । दिनमासाब्दलग्नपाःदिनलग्नेशमासलग्नेशवर्षल ग्नेशाइतित्रयःइत्येतेषांसप्तानांमध्योयोबली।दिनलग्नंपश्येत्सदिनस्वामिबुधैरुक्तः ॥ १७ ॥ १८ ॥ १९ ॥

Indira Gandhi National Centre for the Arts

लग्नांशकः सौम्यखगैः समेतो दृष्टोपि वा मित्रदृशेंदुनापि ॥ नैरुज्यराज्यादिशरीरपुष्टिर्मासोक्तिवद्दुःखमतोऽन्यथात्वे ॥ २० ॥ यदंशकः सौम्ययुतेक्षितो वा स्निग्धेक्षणाद्भावजसौख्यकृत्सः ॥ दुःखप्रदः प्रोक्तवदन्यथात्वे सर्वेषु भावेष्वियमेव रीतिः ॥ २१ ॥ षष्ठांशकः सौम्ययुतो रोगदः पापयुक्शुभः ॥ व्ययांशे शुभयुग्दृष्टे सद्व्ययः पापतस्त्वसत् ॥ २२ ॥ जायांशः सौम्ययुग्दृष्टः स्वस्त्रीसौख्यविलासकृत् ॥ पापैर्गृहकलिर्दुःखं पापांतस्थे मृतिं वदेत् ॥ २३ ॥ शुभमध्यस्थिते त्र्यंशे बहुलं कामिनीसुखं ॥ स्वस्यां रतिर्गुरावन्यखगेऽन्यासु रतिं वदेत् २४

अथ दिने ग्रहाणां शुभाशुभफलमाह—लग्नांशक इति । लग्नांशकः दिनलग्नांशराशिः सौम्यखगैः शुभग्रहैः समेतो युक्तोऽथवा दृष्टो मित्रदृशा तृतीयैकादशनवमपंचमदृष्ट्या चंद्रेणापि युक्तस्तद्दृष्ट्या दृष्टस्तदा नैरुज्येत्यादि स्पष्टम् अतः अस्मात् कारणात् अन्यथात्वे मासोक्तिवत् चेत्तौ शत्रुदृशेति मासोक्तरीत्या वैपरीत्ये दुःखं स्यात् ॥ ॥२०॥ अथोक्तरीतिभावफलार्थमतिदिशति—यदंशक इति । यदंशकः यस्य भावस्य नवांशराशिः शुभग्रहैर्युक्तः स्नेहदृष्ट्या दृष्टो वा स भावांशः तद्भावजनितसौख्यकृत् स्यात् अन्यथात्वे वैपरीत्ये प्रोक्तवत् पूर्वोक्तरीत्या दुःखदः स्यात् । इयं रीतिः सर्वेषु भावेषु ज्ञेया॥ २१॥ अथ षष्ठद्वादशभावयोर्विशेषमाह—षष्ठांशक इति । षष्ठांशकः षष्ठभावस्य नवांशराशिः सौम्ययुक्तः शुभग्रहयुक्तः रोगदः रोगप्रदः स्यात् पापयुक् पापग्रहयुक्तः शुभः शुभफलदः । व्ययांशे व्ययभावनवांशराशौ शुभदृग्दृष्टे शुभदृष्ट्या तृतीयैकादशपंचमनवमस्थानदृष्ट्या दृष्टस्तदा सद्व्ययः भवेत् पापतः पापग्रहयुक्तदृष्टः असत् असन्मार्गे व्ययः स्यात् ॥ २२ ॥ जायांश इति । जायांशः जायाभावस्य अंशकः शुभयुग्दृष्टः तदा स्त्रीविलासादिसौख्यं स्यात् पापैः युक्दृष्टः गृहकलिर्दुःखं स्यात् पापांतस्थे पापग्रहमध्यवर्ती चेत् तदा मृतिं वदेत् ॥२३॥ अथान्यदाह—शुभमध्यस्थिते त्र्यंश इति । सप्तमभावनवांशराशिः शुभग्रहमध्यस्थितः बहुलं कामिनीसुखं स्यात् त्र्यंशस्थिते गुरौ स्वस्यां स्वकीयकामिन्यां रतिं प्रीतिं वदेत् अन्यखगे त्र्यंशस्थे अन्यासु परकीयकामिनीषु रतिं वदेत् ॥ २४ ॥

मृत्यंशेमृत्युगेसौम्यैर्युग्दृष्टेमरणंरणे ॥ मिश्रैर्मिश्रंखलैःसौख्यंव र्षलग्नानुसारतः ॥ २५ ॥ द्विर्द्वादशेखलाहानिंव्ययेसौम्याः शुभव्ययम् ॥ कर्तरीपापजारोगंकरोतिशुभजाशुभम् ॥ २६ ॥ लग्नेऽष्टमेवाक्षीणेंदुर्मृत्युदःपापदृग्युतः ॥ रोगोवाग्रहणंवापिरिपु तःशत्रुभीरपि ॥ २७ ॥ चंद्रेसभौमेनिधनारिसंस्थेनृणांभयंशस्त्रकृ तंरिपोर्वा ॥पापैर्सुखस्थैःपतनंगजाश्वयानात्तनौस्याद्बहुलाचपीडा ॥ २८ ॥ शुभाद्यूनेविजयदाद्यूतादर्थेसुखावहाः ॥ नवमेधर्मभा ग्यार्थराजगौरवकीर्तिता ॥ २९ ॥ दिनप्रवेशेऽस्तिविधुरवस्थायां तुयादृशि ॥ तदवस्थातुल्यमसौफलंदत्तेनसंशयः ॥ ३० ॥ विहा यराशिंचंद्रस्यभागाद्विघ्नाःशरोधृताः ॥ लब्धंगताअवस्थाःस्युर्भो ग्यायाःफलमादिशेत् ॥ ३१ ॥

अथाष्टमभावफलमाह–मृत्यंशइति । मृत्यंशेअष्टमभावनवांशराशिः मृ त्युगैःसौम्यैःदिनप्रवेशलग्नेअष्टमस्थानस्थितैःशुभग्रहैर्युग्दृष्टेरणेमरणंभवेत् मि श्रैः शुभपापग्रहमिश्रमिश्रितैर्युग्दृष्टंमिश्रितंफलंवदेत् खलैःपापग्रहैर्युग्दृष्टेसौख्यं स्यात् वर्षलग्नानुसारतः॥२५॥ अथकर्तरीयोगफलमाह–द्विर्द्वादशइति। द्वि र्द्वादशेदिनप्रवेशलग्नाद्द्वितीयद्वादशस्थानेखलाःपापग्रहास्तदाहानिंद्रव्यादिनाशः व्ययेद्वादशस्थानेसौम्याःशुभग्रहाःतदाशुभव्ययंसद्व्ययमित्यर्थः । पापजापाप ग्रहजनिताकर्तरीरोगंकरोति शुभजाशुभग्रहजनिताकर्तरीशुभंशुभफलदास्यात् ॥ २६ ॥ अथचंद्रकृदनिष्टफलमाह–लग्नइति। लग्नेअष्टमस्थानेवाक्षीणेंदुः पापदृग्युतःपापग्रहदृष्टियुक्तःमृत्युदः । अन्यत्स्पष्टम् ॥ २७ ॥ अथान्यदाह– चंद्रेसभौमइति । स्पष्टम् ॥ २८ ॥ अथशुभफलमाह–शुभाद्यूनइति । शु भाः शुभग्रहाःद्यूनेसप्तमस्थानेसतिद्यूतात्जयदाजयप्रदाः अर्थेद्वितीयेस्थानेसुखा वहाःनवमेनवमस्थानेधर्मेत्यादिस्पष्टम् ॥२९॥ अथदिनप्रवेशेचंद्रावस्थामा ह–दिनप्रवेशेऽस्तीति । दिनप्रवेशेयादृशिअवस्थायांविधुश्चंद्रःअस्तितदवस्थातु ल्यंफलंअसौदत्तेददाति नसंशयः संदेहोनास्तीत्यर्थः ॥ ३० ॥ अथावस्थान यनमाह–विहायराशिंचंद्रस्येति । चंद्रस्यराशिंविहायत्यक्त्वाशेषभागाद्विघ्नाः

प्रवासःप्रवासोपगेरात्रिनाथेऽर्थनाशस्तुनष्टोपगेमृत्युभीतिः ॥ मृतावस्थितेस्याज्जयायांजयस्तुविलासस्तुहास्योपगेकामिनीभिः ॥ ॥ ३२ ॥ रतौस्याद्रतिःक्रीडितासौख्यदात्रीप्रसुप्तापिनिद्रांकलिंदेहपीडां ॥ भयंतापहानीसुखंस्यात्तुभुक्त्वाज्वराकंपितासुस्थितासु क्रमेण ॥ ३३ ॥ ॥ अथमृगयाविचारः ॥ सवीर्यौकुजज्ञौनृपाखेटसिद्ध्यैनसिद्धिर्यदावीर्यहीनाविमौस्तः॥जलाखेटमाहुःसवीर्यैर्ग्रहर्क्षैर्जलाख्यैर्नगाख्यैर्नगाखेटमाहुः।३४॥लग्नास्तनाथौकेंद्रस्थौनिर्बलौक्लेशदायिनी ॥ मृगयोक्ताशुभफलावीर्याढ्यौयदितौपुनः ॥३५॥

द्विगुणाःकार्याःशरोद्धृतापंचभिर्भक्ताः लब्धाःप्राप्तागताअवस्थाःस्युः याभोग्या एष्यातस्याःफलमादिशेत्कथयेत् ॥ ३१ ॥ **अथश्लोकद्वयेनफलमाह**—प्रवासइति । प्रवासावस्थायांगतेरात्रिनाथेचंद्रेप्रवासःस्यात् । नष्टोपगेनष्टावस्थायां अर्थनाशःद्रव्यनाशः मृतावस्थायांमृत्युभीतिःस्यात् । जयायामवस्थायांजयः हास्योपगेहास्यावस्थायांकामिनीभिर्विलासः रतौरत्यवस्थायांरतिःविषयसौख्यं स्यात् । क्रीडितावस्थासौख्यदात्री प्रसुप्ताप्रसुप्तावस्थानिद्रां कलिंकलहमपिकुरुते । भुक्तावस्थादेहपीडां ज्वरावस्थाभयम् कंपितावस्थातापहानी आसुस्थितासुस्थितावस्थाऽसुखंसुखंक्रमेणस्यादित्यन्वयः ॥ ३२ ॥ ३३ ॥ इतिदिवाकरविरचितेमासदिनप्रवेशादिविचारः ॥ ॥ ॥ ॥ ॥

अथमृगयाविचारः—सवीर्याविति । कुजज्ञौभौमबुधौसवीर्यौबलिष्ठौतदानृपाखेटसिद्ध्यैराज्ञांमृगयासिद्ध्यैभवतः । अथयदातौवीर्यहीनौनिर्बलौतदामृगयासिद्धिर्नस्यात् जलाख्यैःजलसंज्ञकराशिभिःकर्कवृश्चिकमीनाख्यैःजलाखेटमाहुः जलसंबंधिआखेटंमृगयामाहुः पर्वतसंज्ञकराशिभिःमेषसिंहधनुर्धराख्यैःनगाखेटं पर्वतसंबंधिमृगयांप्राहुः ॥ ३४ ॥ **अथान्यदाह**—लग्नास्तनाथाविति । लग्नास्तनाथौलग्नसप्तमभावस्वामिनौकेंद्र १।४।७।१० एतदन्यतमस्थानस्थितौविबलौनिर्बलौतदामृगयाक्लेशदायिनीउक्ताकथिता । पुनर्यदितौवीर्याढ्यौबलिष्ठौ तदामृगयाशुभफला ॥ ३५ ॥

Indira Gandhi National Centre for the Arts

अथभोजनचिंता ॥ लग्नाधिपोभोज्यदातासुखेशोभोज्यमीरितम्॥
बुभुक्षामदपःकर्मपतिर्भोक्तेतिचिंतयेत् ॥ ३६ ॥ लग्नेलाभेचसत्खे
टयुतदृष्टेसुभोजनम् ॥ जीवेलग्नेसितेवापिसुभोज्यंदुःस्थितावपि
॥ ३७ ॥ मंदेतमसिवालग्नेसूर्येणालोकितेयुते ॥ लभ्यतेभोजनं
नात्रशस्त्रभीतिस्तदाक्वचित् ॥ ३८ ॥ रविदृष्टंयुतंवापिलग्नंनयदि
तत्रहि ॥ उपवासस्तदावाच्योनक्तंवापिरसाशनम् ॥ ३९ ॥ चंद्रे
कर्मगतेभोज्यमुष्णंशीतसुखेकुजे ॥ तुर्येखेटस्यवसतोभोज्यान्नेरस
मादिशेत् ॥ ४० ॥ स्निग्धमन्नंसितेतुर्येतैलसंस्कृतमर्कजे ॥ नी
चोपगेकदशनंविरसंनचसंस्कृतम् ॥ ४१ ॥ सूर्यादिभिर्लग्नगतैः
सवीर्यैराजादिगेहेभुजिमामनंति ॥ सुखेसुखेशेसबलेसुभोज्यंचरा
दिकंस्यादसकृत्सकृद्द्विः ॥ ४२ ॥ मूलत्रिकोणगेखेटेलग्नेपितृगृहे
ऽशनम् ॥ मित्रालयेमित्रभस्थेशत्रुगेहेऽरिगेहगे ॥ ४३ ॥ शुभे
क्षितयुतेलग्नेबलाढ्येस्वगृहेभुजिः ॥ गृहराशिस्वभावेनयत्नादन्यत्र
चिंतयेत्॥४४॥ तिलान्नमर्केहिमगौसुतंडुलाभौमेमसूराश्चणकाश्च
भोज्यम् ॥ बुधेसमुद्गाःखलुराजमाषागुरौसगोधूमभुजिःसवीर्ये४५
शुक्रेयवावाजरिकायुगंधराःशनौकुलित्थादिसमाषमन्नम् ॥ भो
ज्यंतृषान्नंशिखिराहुवीर्याच्छुभेक्षणालोकनतःसहर्षम् ॥ ४६ ॥

अथभोजनचिंता—लग्नाधिपइति । लग्नस्वामीभोज्यदाता सुखेशःचतुर्थ स्थानस्वामीभोजनंभोजनवस्तुईरितंउक्तम् मदपःसप्तमस्थानस्वामीबुभुक्षाभोक्तुमिच्छा कर्मपतिःदशमस्थानस्वामीभोक्ताभोजनकर्ताइतिचिंतयेत्विचारयेत् ॥ ३६ ॥ अथान्यदाह—दुःस्थितावपिभोजनप्राप्त्यसंभवज्ञानेपिअकस्मात्सुभोजनप्राप्तिः ॥ ३७ ॥ ३८ ॥ ३९ ॥ ४० ॥ ४१ ॥ स्थिरराशिगतेसति सकृदेकवारंद्विस्वभावराशिगतेद्विवारम् ॥ ४२ ॥ मूलेति यस्मिन्कस्मिंश्चित् खेटेमूलत्रिकोणस्थलग्नस्थेसतिपितृगेहेभोजनम् ॥ ४३ ॥ अन्यदासमासिस्पष्टम् ॥ ४४ ॥ ४५ ॥ ४६ ॥

Indira Gandhi National Centre for the Arts

सूर्येमूलंपुष्पमिंदौकुजेस्यात्पत्रंशाखाचापिशाकंसवीर्यें॥शुक्रेज्यज्ञे
व्यंजनंभूरिभेदंमंदेनेत्थंसामिषंराहुकेत्वोः ॥ ४७ ॥ अथस्वप्न
चिंता ॥ लग्नांशगेऽर्केतनुगेऽपिवास्मिन्दुःस्वप्नमीक्षेतयथार्कबिंब
म् ॥ रक्ताबरंवह्निमथापिचंद्रेशुभ्राश्वरत्नांबरपुष्पवज्रम् ॥ ४८ ॥
स्त्रियःसुरूपाश्वकुजेसुवर्णरक्तांबरस्रङ्मणिविद्रुमाणि॥ बुधेहयस्वर्ग
तिधर्मवार्तागुरौरतिर्धर्मकथासुरेक्षा ॥ ४९ ॥ सद्बंधुसंगश्वसितेज
लानांपारेगतिर्देवरतिर्विलासः ॥ शनावरण्याद्रिगतिश्चनीचःसंग
श्चराहौशिखिनीत्थमेव ॥ ५० ॥ सहजधीमदनायरिपुस्थितोयदि
शशीगुरुभानुसितेक्षितः ॥ नवमकेंद्रगतेषुशुभग्रहेस्वबलयामनुजो
रमतेतदा ॥ ५१ ॥ इतिस्वप्नचिंता ॥ ॥

आसीदसीमगुणमंडितपंडिताग्र्योव्याख्यद्भुजंगपगवीःश्रुतिवित्सु
वृत्तः ॥ साहित्यरीतिनिपुणोगणितागमज्ञश्चिंतामणिर्विपुलगर्ग
कुलावतंसः ॥५२॥ तदात्मजोऽनंतगुणोऽस्त्यनंतोयोऽधोक्रूसद्भुक्तिं
किलकामधेनुम् ॥ संतुष्टयेजातकपद्धतिंचन्यरूपयदुष्टमतंनिरस्य
॥५३॥पद्मांबयासाविनतोविपश्चित्श्रीनीलकंठःश्रुतिशास्त्रनिष्ठः॥
विद्वच्छिवप्रीतिकरंव्यधासीत्समाविवेकंमृगयावतंसम् ॥ ५४ ॥
शाकेनंदाभ्रबाणेंदु-१५०९ मितआश्विनमासके ॥ शुक्लेऽष्टम्यां
समातंत्रंनीलकंठबुधोऽकरोत् ॥ ५५ ॥ इतिश्रीगर्गवंशोद्भवश्रीदै
वज्ञानंतसुतश्रीनीलकंठदैवज्ञविरचितंवर्षतंत्रंसमाप्तम् ॥ २ ॥

॥४७॥ ४८ ॥४९॥ ५० ॥ ५१ ॥५२॥५३॥५४॥५५॥ इतिदिवाकरदै
वज्ञात्मजश्रीविश्वनाथदैवज्ञविरचितायांवर्षतंत्रटीकायांस्वप्नविचारःसमाप्तः ॥

॥ समाप्तमिदंद्वितीयंवर्षतंत्रम् ॥ २ ॥

Indira Gandhi National Centre for the Arts

अथ प्रश्नतंत्रम् ।

अथप्रश्नप्रकरणंनिरूप्यते ॥ तत्रप्रश्नविचारस्यप्रयोजनमाहवराहः ॥ दैवज्ञस्यहिदैवेनसदसत्फलवांछया ॥ अवश्येगोचरेमर्त्यःसर्वःसमुपनीयते ॥ १ ॥ अश्रौषीच्चपुराविष्णोर्ज्ञानार्थेसमुपस्थितः ॥ वचनंलोकनाथोपिब्रह्माप्रश्नादिनिर्णयम् ॥ २ ॥ आदिशब्देनस्वरशकुनादिकम् । तस्मान्नृपःकुसुमरत्नफलाग्रहस्तःप्रातःप्रणम्यवरयेदपिप्राङ्मुखस्थः॥ होरांगशास्त्रकुशलान्हितकारिणश्च संहृत्यदैवगणकान्सकृदेवपृच्छेत् ॥ ३ ॥ उत्पलः-दशभेदंग्रहगणितंजातकमवलोक्यनिरवशेषमपि ॥ यःकथयतिशुभमशुभंतस्यनमिथ्याभवेद्वाणी ॥ ४ ॥ एतच्चप्रश्ननिरूपणंविनीतेभ्योदीयमानंसत्फलंनान्येभ्यइत्युक्तंसमरसारे-विनयावनतायदीयमानाप्रभवेत्कल्पलतेवसत्फलायेति ॥ ५ ॥ श्रुतिरपि-विद्याहवैब्राह्मणमाजगामगोपायमाशेवधिष्टेऽहमस्मि ॥ असूयकायानृजवेयतायनमांब्रूयादवीर्यवतीतथास्यामिति । शेवधिर्निधिः ॥ दीयमानमित्यनेनउपदेशःशिष्येभ्यःप्रष्टृभ्योनिरूपणमुभयमप्युच्यते अतएवश्रुतौनमांब्रूयादितिसामान्येनोक्तम् वचिरत्रप्रतिपादनक्रिया । यस्तत्रप्रष्टाकुटिलःसरलोवेतिज्ञानंप्रश्नतंत्रे-ऋजुरयमनृजुर्वाऽयंप्रष्टापूर्वंपरीक्ष्यलग्नबलात् ॥ नफलंवाच्यंदैवंतच्चित्तगंस्फुरति ॥ १ ॥ लग्नस्थेशशिनिशनौकेंद्रस्थेज्ञेदिनेशरश्मिगते ॥ भौमज्ञयोःसमदृशालग्नगचंद्रेऽऋजुःप्रष्टा ॥२ ॥ लग्नेशुभग्रहयुतेसरलःक्रूरान्वितेभवेत्कुटिलः ॥ लग्नेऽस्तेसौम्यदृशाविधुगुरुदृष्टयाचसरलोऽयम् ॥ ३ ॥ यदिगुरुबुधयोरेकःपश्यत्यस्ताधिपंचरिपुदृष्ट्या ॥ तत्कुटिलःप्रष्टाखल्वनयोरेकस्तयोःसाधूः ॥४ ॥ दशभेदादीप्तादयस्तांश्चसमनंतरमेववक्ष्यामः । अपरेतुमध्यमदेशांतरचरांतरोदयांतरभुजफलस्फुटीकरणवक्रमार्गोदयास्तभेदेनदशभेदत्वमाहुः यदाचरांतरदे

शांतरमध्यगतमेवेतिमतंतदाजीवसंस्कारवशेनदशभेदतोह्या । अथयत्रबहवः प्रश्नायुगपत्संभवंति तत्रनिरूपणप्रकारश्चण्डेश्वरप्रश्नविद्यायाम् **आदिमंलग्नतो ज्ञानंचंद्रस्थानाद्द्वितीयकम् ॥ सूर्यस्थानात्तृतीयंस्यात्तुर्यंजीवगृहाद्भवेत् ॥ १ ॥ बुधभृग्वोर्बलीयःस्यात्तद्गृहात्पंचमंपुन**रित्यादिरुक्तः सतुनयुक्तः सकृदेवपृच्छेदितिवराहवाक्यस्वरसात् नानाकर्तृकानेकप्रश्नेष्वपिगणकस्यानेकनिरूपणनिषेधात् । तदुक्तंज्ञानमुक्तावल्याम् **सम्यग्विचार्यलग्नंब्रूयात्प्रश्नंसकृद्यथाशास्त्रम् । यस्त्वेकंब्रूतेऽसौतस्यनमिथ्याभवेद्वाणी ॥१॥**अत एवचिंतामणौ-**राशिचक्रंसमभ्यर्च्यफलैःपुष्पैःसरत्नकैः ॥ प्रष्टासुभूमौ दैवज्ञानेकंपृच्छेत्प्रयोजनम् ॥ १ ॥ दशभेदंग्रहाणांचगणितंभावजं तथा ॥ विमृश्यैकंचकथयेन्नानेकंप्राहपद्मभूःइति ॥ २ ॥ दीप्ताद्यंदशभेदंचग्रहाणांभावजंफलम् ॥ विचार्यप्रवदेद्यस्तुतस्योक्तंनान्यथाभवेत् ॥ ३ ॥ दीप्तोदीनोऽथमुदितःस्वस्थःसुप्तोनिपीडितः ॥ मुषितः परिहीनश्चसुवीर्यश्चाधिवीर्यकः ॥ ४ ॥ स्वोच्चेदीप्तःसमाख्यातोनीचे दीनःप्रकीर्तितः ॥ मुदितोमित्रगेहस्थः स्वस्थश्चस्वगृहेस्थितः ॥ ५॥ शत्रुगेहस्थितःसुप्तोजितोन्येननिपीडितः ॥ नीचाभिमुखगोहीनोमुषितोऽस्तंगतोग्रहः ॥ ६ ॥ सुवीर्यःकथितःप्रज्ञैःस्वोच्चाभिमुखसंस्थितः ॥ अधिवीर्योनिगदितःसुरश्मिःशुभवर्गजः ॥ ७ ॥ दीप्तैःसिद्धिश्च कार्याणांदीनेदुःखसमागमः ॥ स्वस्थेकीर्तिस्तथालक्ष्मीरानंदोमुदिते महान् ॥ ८ ॥ सुप्तेरिपुभयंदुःखंधनहानिर्निपीडिते ॥ सुपीतेपरिहीनेचकार्यनाशोऽर्थसंक्षयः ॥ ९ ॥ गजाश्वकनकावाप्तिःसुवीर्यैरत्नसंपदः॥अधिवीर्यैराज्यलब्धिर्ग्रहैर्मित्रार्थसंगमः ॥१० ॥ ॥ अथग्रहस्वरूपम् ॥ पूर्वःसत्वंनृपस्तातःक्षत्रंग्रीष्मोरुणश्चलः ॥ मधुदृक्पैत्ति**

---

१ स्वोच्चस्थेदशसूर्येनवचंद्रेपंचभूपुत्रे ॥ पंचेंदुजेतथेज्येसप्ताष्टौभार्गवेशनौपंच ॥ १ ॥ नीचविहीनचक्राच्छुद्धःषण्णवतोयदाऽभ्यधिकः ॥ आत्मीयरश्मिगुणितःषड्भक्ताद्रश्मयोयस्मात् ॥ २ ॥ पंचेंदुतोयथायाधिकास्तथातथाशुभकलादिक्यम् ॥ ३ ॥

कोधातुःसूरःसूक्ष्मकचोरविः ॥ कफोवर्षामृदुर्मातापयोगौरश्चसात्वि
कः ॥ ११ ॥ जीवोवैश्यश्वरोवृत्तोमारुताशोविधुःसुहृक् ॥ ग्रीष्मः
क्षत्रतमोरक्तोयाम्यःसेनाग्रणीश्वरः ॥ १२ ॥ युवाधातुश्वपिंगाक्षःक्रू
रःपित्तंशिखीकुजः ॥ शरदीशोहरिर्दीर्घःषंढोमूलंकुमारकः ॥ १३ ॥
लिपिज्ञउत्तरेशश्वशूद्रःसौम्यस्त्रिधातुकः ॥ सत्वंपित्तोहिमःश्लेष्मादी
र्घोमंत्रीद्विजोनरः ॥१४॥ मध्वैशानीकफोजीवोमधुपिंगलदृक्तथा ॥
शुक्रःशांतोद्विजोनारीवैश्योमंत्रीचरःसितः ॥ १५ ॥ आग्नेयीदिक्कफ
श्वाम्लःकुटिलासितमूर्धजः ॥ कृष्णस्तमःकृशोवृद्धःषंढोमूलांत्यजो
ऽलसः॥ १६ ॥ शिशिरःपवनःक्रूरःपश्चिमोवातुलःशनिः॥ राहुर्धातुः
शिखीमूलंशेषमन्यच्चमंदवत् ॥ चिंतनीयंविलग्नेज्ञात्वकेंद्रगाद्वाबला
धिकात् ॥ १७ ॥ ॥ अथप्रश्नजातंकस्माल्लग्नादिभावाद्विचारणीयमित्याह–
सौख्यमायुर्वयोजातिरारोग्यंलक्षणंगुणम् ॥ क्लेशाकृतीरूपवर्णास्तनो
श्चित्यंविचक्षणैः ॥ १८ ॥ मुक्ताफलंचमाणिक्यंरत्नधातुधनांबरम् ॥
हयकार्याध्वविज्ञानंवित्तस्थानाद्विलोकयेत् ॥ १९ ॥ भुवनदीपके–
भगिनीभ्रातृभृत्यानांदासकर्मकृतामपि ॥ कुर्वीतवीक्षणंविद्वान्सम्य
ग्दुश्चिक्यवेश्मतः ॥ २० ॥ वाटिकाखलकक्षेत्रमहौषधिनिधीनपि ॥
विवरादिप्रवेशंचपश्येत्पातालतोबुधः ॥ २१ ॥ गर्भापत्यविनेयानां
मंत्रसंधानयोरपि ॥ विद्याबुद्धिप्रबंधानांसुतस्थानेविनिर्णयः ॥२२॥
चौरभीरिपुसंग्रामखरोष्ट्रक्रूरकर्मणाम् ॥ मातुलातंकभृत्यानांरिपुस्था
नाद्विनिर्णयः ॥ २३ ॥ वाणिज्यंव्यवहारंचविवादंचसमंपरैः ॥ ग
मागमकलत्राणिपश्येत्प्राज्ञःकलत्रतः ॥ २४ ॥ नद्युत्तारेध्ववैषम्येदु
र्गेशात्रवसंकटे ॥ नष्टेदुष्टेरणेव्याधौछिद्रेछिद्रंनिरीक्षयेत् ॥२५॥ वापी
कूपतडागादिप्रपादेवगृहाणिच ॥ दीक्षांयात्रांमठंधर्मंधर्मान्निश्चित्यकी
र्तयेत् ॥ २६ ॥ राज्यंमुद्रांपरंपुण्यंस्थानंतातंप्रयोजनम् ॥ वृष्ट्यादि
व्योमवृत्तांतंव्योमस्थानान्निरीक्षयेत् ॥ २७ ॥ गजाश्वयानवस्त्राणिस

Indira Gandhi National Centre for the Arts

स्यकांचनकन्यकाः॥ विद्वान्विद्यार्थयोर्लाभंलक्षयेल्लाभलग्नतः ॥२८॥ त्यागभोगविवादेषुदानेष्टकृषिकर्मसु ॥ व्यवस्थानेषुसर्वेषुविद्धिविद्व न्व्ययंव्ययात् ॥ २९ ॥ ॥अथप्रथमस्थानपृच्छा॥ षट्पंचाशिकायाम्- ॥ योयोभावःस्वामिदृष्टोयुतोवासौम्यैर्वास्यात्तस्यतस्यास्तिवृद्धिः ॥ पापैरेवंतस्यभावस्यहानिर्निर्देष्टव्यापृच्छताजन्मतोवा ॥ १ ॥ सौम्येविलग्नेयदिवास्ववर्गेशीर्षोदयेसिद्धिमुपैतिकार्यम् ॥ अतोविपर्यस्तमसिद्धिहेतुकृच्छ्रेणसंसिद्धिकरंविमिश्रम् ॥ २ ॥ भुवनप्रदीपे-लग्नपतिर्यदि लग्नंकार्याधिपतिश्चवीक्षतेकार्यम् ॥ लग्नाधीशःकार्यंकार्येशःपश्यति विलग्नम् ॥ ३ ॥ लग्नेशःकार्येशंविलोकयेल्लग्नपंतुकार्येशः ॥ शीतगुदृष्टौसत्यांपरिपूर्णाकार्यसंसिद्धिः ॥ ४ ॥ कथयंतिपादयोगंपश्यति सौम्योनलग्नपोलग्नम् ॥ लग्नाधिपंचपश्यतिशुभग्रहश्चार्धयोगोऽत्र ॥ ५ ॥ एकःशुभोग्रहोयदिपश्यतिलग्नाधिपंविलोकयति ॥ लग्नंपादोनयोगमाहुस्तदाबुधाःकार्यसंसिद्धौ ॥ ६ ॥ लग्नपतौदर्शनेसतिशुभग्रहौद्वौत्रयोऽथवालग्नम् ॥ पश्यंतियदितदानीमाहुर्योगंत्रिभागोनम् ॥ ७ ॥ क्रूरावेक्षणवर्ज्यश्चंद्रःसौम्याश्चखेचरालग्नम् ॥ लग्नेशदर्शनेसतिपश्यंतःपूर्णयोगकराः ॥ ८ ॥ क्रूराक्रांतःक्रूरयुतःक्रूरदृष्टश्चयोग्रहः॥ विरश्मितांप्रपन्नश्चसोऽनिष्टफलदायकः ॥९ ॥ समरसिंहे-असुकंगदेति कार्यंकदाभविष्यत्यमुत्रपृच्छायाम् ॥ लग्नेलग्नाधिपतिःकार्यंकार्याधिपःपश्येत् ॥ १० ॥ लग्नस्थःकार्येशःपश्यतिचेल्लग्नपंतदेवभवेत् ॥ तत्कार्यंयद्यन्यस्थितंतदासत्वरंनस्यात् ॥ ११ ॥ पश्यतियदाचलग्नंद्रक्ष्यतिचंद्रंविलग्नपंचयदा ॥ लग्नेकार्येचयदाद्वयोश्चयोगेतदासिद्धिः ॥ १२ ॥ यदिलग्नपंचपश्यतिकार्याधीशोविलग्नमथतस्य ॥ कार्यस्यहानिरुक्तालग्नमृतेकिमपिनोवाच्यम् ॥ १३ ॥ इतिसामान्यतोभावनिरूणम् ॥ ॥अथप्रत्येकंभावप्रश्ननिरूपणम्॥ ॥ ताजिकशास्त्रोक्तप्रश्नतंत्रे- भूतंभवद्भविष्यन्ममकिंकथयेतिजातपृच्छायाम् ॥ लग्नपतेःशशिनो

वामलमन्वेष्यंबलाभावे ॥ १ ॥ दृष्ट्वानवांशकबलंशुभदृग्योगंचसर्वका
लेषु ॥ प्रष्टुःशुभमादेश्यंविपरीतंव्यत्ययादेषा ॥ १ ॥ लग्नेशोमूसरि
फोयस्मात्तस्मादतीतमाख्येयम् ॥ येनयुतस्तस्माद्भवदेष्यंयोयोक्ष्यते
तस्मात् ॥ २ ॥ यदिलग्नेलग्नपतिःसौम्ययुतोवाविलोकितःसौम्यैः ॥
तत्प्रष्टुर्व्याकुलताशरीरदोषाविनश्यंति ॥ ३ ॥ पापोयदिलग्नपतिस्त
दाकलिव्याधिधननाशाः ॥ सौम्येनिर्वृतिबुद्धिर्द्रव्याप्तिःसौख्यमतुलं
च ॥ ४ ॥ ॥ अथद्वितीयस्थानपृच्छातत्रैव–धनलाभस्यप्रश्नेलग्नेशेनें
दुनाऽथधननाथः ॥ कुरुतेयदीत्थशालंशुभयुतिदृष्ट्यांभवेल्लाभः ॥५॥
क्रूरग्रहैर्धनस्थैर्दूरेलाभोऽन्यदप्यशुभम् ॥ क्रूरमुथशिलेधनेशेप्रष्टाम्रिय
तेऽथवाविलग्नेशे ॥ ६ ॥ धनधनपेत्थशालेमंदगतिर्यत्रभावानाम् ॥
तनुधनसहजादीनांप्रष्टुस्तद्वारतोलाभः ॥ ७ ॥ प्रश्नदीपके–लग्नस्थंचं
द्रजंचंद्रःक्रूरोवायदिपश्यति ॥ धनलाभोभवत्याशुकिंत्वनर्थोपिपृच्छ
तः ॥ ८ ॥ चंद्रलग्नधनाधीशाद्दृष्टायुक्ताःपरस्परम् ॥ धनकेंद्रत्रिको
णस्थाःसद्योलाभकराःस्मृताः ॥ ९ ॥ शुभदस्वामिषड्वर्गेलग्नेसौम्य
युतेक्षिते ॥ प्रष्टुस्तात्कालिकीलब्धिरलब्धिस्तुविपर्यये ॥ १० ॥
चतुर्थेसप्तमेचंद्रेखेरवौलग्नगेशुभे ॥ प्रष्टुःसद्योऽर्थलाभःस्याल्लग्नेवासुर
मंत्रिणि॥११॥ ॥ अथतृतीयभावपृच्छाप्रश्नतंत्रे–सहजपतिर्यदिसहजंपश्य
तिचेत्तद्वयंशुभैर्दृष्टम्॥तद्भ्रातरोगतरुजःस्वस्थाःक्रूरेक्षणेवामम् ॥ १२॥
यदिसहजपतिःपृष्ठेतत्पतिनामुथशिलेऽथतन्मांद्यम्॥ षष्ठेशेसहजस्थेस
हजपतौक्रूरितेवापि॥१३॥सूर्यस्यरश्मिसंस्थेभयावहंप्रष्टुरादेश्यम् षष्ठइ
त्युपलक्षणंअष्टमस्थेपि ॥ षष्ठाष्टमभावेशौयद्भावेशेनेत्थशालिनौस्याताम्
॥ १४ ॥ पीडांतस्यप्रवदेत्षष्ठाष्टमसंस्थगेवापि ॥ १५ ॥ एवंसर्वेय
थापित्रोस्तुर्येसुतानांच ॥ भृत्यचतुष्पदवर्गस्यास्तेस्त्रियाःसुहृदोये
॥ १६ ॥ ॥ अथचतुर्थस्थानपृच्छा ॥लग्नपतींदुचतुर्थेयदिमुथशिलम
थवाग्रहेगमनम् ॥ प्रष्टुःपृथ्वीलाभदमसौख्यदृग्योगतोनैव ॥ १७ ॥

Indira Gandhi National Centre for the Arts

यदिपृच्छतिकृषिकोमेक्षेत्राल्लाभोभेवन्नवा ॥ लग्नंकृषिकस्तुर्यंभूमिद्यू
नंचकृषिस्तरुर्दशमम् ॥ १८ ॥ लग्नेक्रूरोपगतेस्याच्चौरोपद्रवस्तुकृ
षिकर्तुः ॥ वक्रातिचारवर्ज्येक्रूरेचौरस्यकृषिलाभः ॥ १९ ॥ लग्न
स्थेशुभखेटेसाफल्यंकर्षकस्यकृषितःस्यात् ॥ तुर्येचक्रूरगतेत्यक्त्वा
भूमिंप्रयात्येषः ॥ २० ॥ द्यूनेचशुभोपगतेशुभंकृषेस्त्वन्यथातुवि
परीतम् ॥ दशमेदशमपतौवाशुभयुतदृष्टेशुभावृक्षाः ॥ २१ ॥
भूमाटकपृच्छायांलग्नंप्रष्टाचभाटकंद्यूने ॥ तस्योत्पत्तिर्दशमेतथाऽवसा
नंचतुर्थेस्यात् ॥२२॥ लग्नस्यलग्नपस्यचशुभयोगेशुभमशोभनंवामे ॥
द्यूनेक्रूरोपगतेयस्मादपिभाटकस्ततोऽनर्थः ॥ २३ ॥ दशमेक्रूरोपगते
नोत्पत्तिर्बहुतराभवेत्प्रष्टुः॥क्रूरार्दितेतुतुर्येस्यादवसानेशुभंनास्य॥२४॥
॥ अथपंचमस्थानपृच्छा—यदिपृच्छत्येतस्याःस्त्रियोभवेन्मेप्रजानवाकश्चि
त् ॥ लग्नेशेंद्वोःसुतपतिनामुथशिलभावेप्रसूतिःस्यात् ॥ २५ ॥ सुत
भावपतिर्लग्नेलग्नपचंद्रौसुतेऽथवास्याताम् ॥ सत्वरितमेववाच्यासवि
लंबंनक्तयोगेन ॥ २६ ॥ द्विशरीरेचविलग्नेशुभयुतपुत्रेद्व्यपत्ययोगोऽ
स्ति ॥ यदिलग्नपुत्रपतिपुंराशौचेत्स्यात्तदासुतोगर्भे ॥२७॥ अथचंद्रः—
पुंराशौपुंग्रहकृतमुथशिलयुक्तस्तदापिसुतदः ॥ अथवाविधुरपराह्ने
सूर्यात्पृष्टेतदास्त्रीस्यात् ॥ २८ ॥ होरास्वामीपुरुषःपुंराशौचेत्तथापि
सुतगर्भः ॥ २९ ॥ चंद्रयुक्तेक्षितेगर्भेसौम्ययुक्तेक्षितेपिवा ॥ उच्चस्थे
भ्युदितेतत्रपुण्यापत्यंप्रजायते ॥ पुण्यापत्यंआयुष्मदपत्यम् ॥ ३० ॥
एषागर्भवतीकिलनवाप्रमाणंप्रयातिगर्भोऽयम् ॥ प्रश्नेलग्नपशशिनो
सुतस्थयोर्गर्भवत्येव ॥ ३१ ॥ यद्येतयोर्मुथशिलंकेंद्रेसुतपेनगार्भिणीतद
पि ॥ आपोक्लिमेत्थशालादनीक्षणाल्लग्नपुत्रयोर्नैवम् ॥ ३२ ॥ चरल
ग्नेक्रूरेंद्वोर्मुथशिलभावेविनश्यतिहिगर्भः ॥ लग्नपशशिनोस्तत्पतिस्थ
वक्रिमुथशिलेपितथा ॥ ३३ ॥ जीवितमरणप्रश्नेबालानामंत्यपेशुभे
दृष्टे ॥ केंद्रस्थेसितपक्षेशुभयुक्तेऽत्येविधौजीवेत् ॥ ३४ ॥ क्रूरश्चेदंत्य

पतिर्दग्धश्चापोक्लिमेऽयुतः ॥ क्रूरैस्तुजातमात्रोम्रियतेबालोऽथवागर्भे ॥ ३५ ॥ प्रसवज्ञानप्रश्नेभुक्ताँल्लग्नांशकान्परित्यज्य ॥ भोग्याद्वि चिंत्यशेषाननुमित्येवंवदेद्दिवसान् ॥ ३६ ॥ यावंतोनवमांशागतास्ता वंतोगर्भस्यमासागताः ॥ ३७ ॥ यावंतोभोग्यास्तावाञ्जिरग्रतःप्रसवइसिंग्या ख्या ॥ अपरेतुमासज्ञानंशुक्रावस्थानादाहुः ॥ मासज्ञानपृच्छायांगर्भि ण्याभृगुनंदनः ॥ लग्नात्स्याद्यावतिस्थानेमासानाख्यातितावतः ॥ ३८॥ सुतात्संख्यातदावाच्यायदाधर्मात्परंगतः ॥ इतिभुवनप्रदी पकोक्तेः ॥ लग्नांतर्दिनराशिर्दिवाग्रहोलग्नपश्चदिनराशौ ॥ तद्दिवसेज न्मवाच्यंविपरीतेव्यत्ययश्चैषाम् ॥ ३९ ॥ अथरात्रिलग्नमह्नाहूतद धिपतिश्चेत्तुतस्यराशिपतेः ॥ बलमूह्यंदिनहोरापुंराशिस्त्रीग्रहेप्येवम् ॥ ४० ॥ अस्मिन्वर्षेऽपत्यंभविताविलग्नपंचमाधीशौ ॥ भजतोयदी त्थशालंतत्रैवाब्देभवतिनूनम् ॥ ४१ ॥ यदिवामिथोग्रहगतौस्याता मेतौचसंततिस्तदापि ॥ वाच्यातस्मिन्वर्षेशुभयोगादन्यथानपुनः ॥ ४२ ॥ सूताप्रसूतयुवतिज्ञानेसुतपोऽथषष्ठपःसूर्यात् ॥ निर्गत्योद यमायात्ततःप्रसूतेचनारीयम् ॥ ४३ ॥ अथजीवसौम्यशुक्राआकाशे उदयिनस्तथाप्येवम् ॥ ४४ ॥ ॥ अथषष्ठस्थानपृच्छा ॥ रोगादयमु त्थास्यतिनवेतिलग्नंभिषक्द्यूनम् ॥ व्याधिर्दशमंरोगीहिबुकंभेषजमि हाहुराचार्याः ॥ ४५ ॥ क्रूरार्दितेविलग्नेवैद्यान्नगुणस्तदौषधाद्रोगः ॥ वृद्धिमुपयातिदशमेक्रूरैर्निजबुद्धितोप्यगुणः ॥ ४६ ॥ अस्तेचक्रूरयुते मांद्यान्मांद्यंतथौषधाद्बंधौ ॥ सौम्योपगतैरेतैररोगतारोगिणोभवति ॥ ४७.॥ लग्नेशेंद्वोःसौम्येत्थशालतोरोगनाशनंवाच्यम् ॥ वक्रेतुतत्र खेटेभूयोपिगदःसमुपयाति ॥ ४८ ॥ भूमिस्थलग्नस्थद्यूनस्थशशी मुथशिलेभवेन्मृत्युः॥ लग्नस्थेरंध्रपतौलग्नपशशिनोर्विनाशेवा॥४९॥ लग्नाधिपेचसूर्येचंद्रःसप्तेशमुथशिलविधायी ॥ सप्तेशेषष्ठस्थेतन्मरणं रोगिणोवाच्यम् ॥ ५० ॥ रंध्रेशेनविनष्टेनास्तमितेनापिकेंद्रस्थे॥

Indira Gandhi National Centre for the Arts

लग्नेशस्थमुथशिलेमृत्युःस्याद्रोगपृच्छायाम् ॥ ५१ ॥ अथवातयोश्च
केंद्रेमुथशिलतःक्रूरपीडितेमरणम् ॥ यदिकेंद्रेक्रूरग्रहस्तदापीडा अष्टमेशल
ग्नेशौचमुथशिलिनौतदामृत्युःस्यादितिवाच्यमित्यर्थः ॥ सूर्यद्वादशभागंप्रवि
ष्टेलग्नेश्वरेप्येवम् ॥ ५२ ॥ लग्नेचरेचरोगीक्षणेक्षणेस्यादरुक्सरु
क्चापि ॥ द्विशरीरेपररोगःस्थिरेगदस्यैवरोगत्वम् ॥ ५३ ॥
शशिनोवक्रमुथशिलेस्थिररोगोमंदमुथशिलेपूर्वम् ॥ मूत्रनिरोधाद्रोगो
त्पत्तिर्ज्ञेयाकृतप्रश्ने ॥ ५४ ॥ अथपृच्छायाःपूर्वंसप्ताहानिचविलोक्य
चत्वारि ॥ यदितेषुशशांकरवीशुभयुतदृष्टौतदाशस्तम् ॥ ५५ ॥ अ
थमंदोऽयमथनवेतिप्रश्नेलग्नेश्वरोऽथचंद्रोवा ॥ षष्ठेशमुथशिलीस्याद
स्तमितोवातदामंदः ॥ ५६ ॥रोगवानित्यर्थः ॥ ॥ अथस्वामिभृत्यच
तुष्पादप्रकरणम् ॥ ॥ ईशोऽन्योममभवितानवेतिलग्नेश्वरस्ययदिकें
द्रे ॥ नोभवतिमुथशिलंषष्ठांत्यपतिभ्यांतदानान्यः ॥ ५७ ॥ वक्रीवा
न्येनसमंलग्नपतिःसहजनवमसंस्थेन ॥ कुरुतेयदीत्थशालंतदाऽन्यना
थोभवेत्प्रष्टुः ॥ ५८ ॥ लग्नपतौकेंद्रस्थेरिपुदृष्ट्याक्रूरवीक्षितेपुण्ये ॥ र
विरश्मिगतेऽथभवेद्यावज्जीवंचनान्यपतिः ॥ ५९ ॥ अयमीशोभद्रोमे
पृच्छायांलग्नपस्यकंबूले ॥ स्वामीसएवभाव्योद्यूनेशस्यचशुभोनेशः
॥ ६० ॥ ग्रहभूमिस्थानानांलग्नप्रश्नेपुरोक्तएवविधिः ॥ सम्यग्विचा
र्यवाच्यंशुभमशुभंपृच्छतःस्वधिया ॥ ६१ ॥ भृत्यचतुष्पदलाभंप्रश्ने
लग्नेशशीतगूषष्ठे ॥ षष्ठेशमुथशिलेवालग्नेषष्ठेश्वरोऽथतल्लाभः ॥ ६२॥
भृत्यस्यवाहनस्यचयद्वाप्रश्नेचलग्नलग्नपती ॥ अर्थीदातासप्तमसप्तम
पौतद्बलात्प्राप्तिः ॥ ६३ ॥ लग्नस्यचसप्तमेशेनमुथशिलेसप्तमस्यवालग्नेशे
नमुथशिलेलग्नेशसप्तमेशयोर्वापरस्परंमुथशिलेभृत्यादिकस्यपृच्छकाभिलाषविष
यस्यलाभइत्यर्थः ॥ ॥ अथसप्तमस्थानपृच्छा ॥ ॥ स्त्रीलाभस्यप्रश्नेस्म
राधिपेलग्नपेनशशिनावा ॥ कृतमुथशिलेयुवत्याअयाचितायाभवेल्ला
भः ॥ ६४ ॥ यदिलग्नपोविधुर्वाद्यूनेतदयाचितांस्त्रियंलभते ॥ लग्ने

शान्मूसरिफेचंद्रेऽस्तपमुथशिलेस्वयंलाभः ॥ ६५ ॥ येनसमंतुमुथशिलस्तत्रविनष्टेचपापयुतदृष्टे ॥ निकटीभूयतदाकिलविनश्यतिस्त्रीगतं कार्यम् ॥ ६६ ॥ पापेऽत्ररंध्रनाथेस्त्रीजातेरेवविघटतेकार्यम् ॥ सहजपतौभ्रातृभ्यस्तुर्येशेपितृव्यएवनान्येभ्यः ॥ ६७ ॥ सौम्यकृतयुक्तिदृग्भ्यांपूर्वोक्तस्थानतःशुभंवाच्यम् ॥६८॥ ॥ अथस्त्रीस्नेहः ॥ प्रीतिस्थानप्रश्नेस्मरपतिलग्नेशमुथशिलेस्नेहः ॥ झकटकदृशाझकटकःशशिकंबूलेतुसापिशुभा ॥ ६९ ॥ यदिमंदोलग्नेशःकेंद्रेचस्यात्तदाबलीप्रष्टा ॥ अस्तेश्वरेचमंदेकेंद्रेप्रतिवादिनोऽस्तिबलम् ॥ ७० ॥ उभयोरेकस्थितयोर्ज्ञातव्याझकटकंतयोःप्रीतिः ॥ सूर्येनशुभंविबलेनरस्यशुक्रेस्त्रियोद्वयोर्द्धितयौ ॥ ७१ ॥ ॥ अथरुष्टागमनम् ॥ ममगृहिणीरुष्टापुनरेष्यतिनोवाथभूम्यधःस्थरवौ॥भूपरिगतेचशुक्रेनैतिपुनर्वक्रितेऽभ्येति ॥७२॥ सूर्यान्निर्गतशुक्रेवक्रेपिसमेतिचान्यथारुष्टा ॥ क्षीणेंदौबहुदिवसैःपूर्णविधौचद्रुतमुपैति ॥ ७३ ॥ भूमिशब्देनचतुर्थस्थानम् तस्मादधःपूर्वलग्नपर्यंतमितियावत् लग्नमारभ्यचतुर्थपर्यंतांहिस्त्रीणांहर्षस्थानं नपुंसाम् रविश्चपुरुषग्रहस्तेनरुष्टायानागमनम्।एवंभुवश्चतुर्थादुपरिसप्तमपर्यंतंनराणांहर्षस्थानं नस्त्रीणां शुक्रस्यस्त्रीग्रहत्वान्नहर्षस्थानम्॥ इतिनरुष्टागमनमित्याशयः ॥ ॥ अथकन्यापरीक्षा॥एषाकुमारिकाकिलनिर्दोषाकिन्नवेतिपृच्छायाम्॥ लग्नेस्थिरेस्थिरर्क्षेलग्नपशशिनोश्चनिर्दोषा॥७४॥ चरराशिगतैरेतैरियंकुमार्यपिचजातदोषास्यात् ॥ द्विशरीरस्थेचंद्रेचरलग्नेस्वल्पदोषास्यात् ॥७५ ॥ शशिभौमावेकर्क्षेस्थिरवर्जेतरपरेणगुप्तमियम् ॥ रमिताशनिचंद्रमसोर्लग्नगयोःप्रकटमुपभुक्ता ॥ ७६ ॥ यदिभौमशनीकेंद्रेविधुदृष्टोवृश्चिकेऽथशुक्रःस्यात् ॥ तद्रेष्काणेऽथतदानिभ्रांतंजातदोषैषा ॥ ७७ ॥ अथस्वपरप्रसूतिपरीक्षा ॥ एषाकिलप्रसूतासितेघटेज्ञेहरौचनोसूता ॥ अनयोरलिवृषगतयोःसूतानारीपरिज्ञेया ॥ ७८ ॥ सिंहस्थेबुधेशुक्रस्यकुंभगतत्वमसंभावितंतेनयोगद्वयमेतद्वैकल्पिकम् ॥ एवंवृषवृश्चिकगतत्वंव्याख्येयं

म् ॥ भौमबुधशुक्रचंद्राद्धिशरीरेचापवर्जितेचेत्स्युः ॥ अग्रेऽस्तितत्प्रसूतिश्चापेनाग्रेनपृष्ठतःसूता ॥ ७९ ॥ क्रूरश्चेच्चरराशौपरतःसूतास्थिरेतु निजपत्युः ॥ मिश्रेतुमिश्रमूह्यंजातकसंदेहपृच्छायाम् ॥ ८० ॥ पंचमेशलग्नेशयोरन्यःक्रूरस्ताभ्यांसहजमुथशिलीवाक्रूरस्ततइदंफलमादेश्यंतदेवाग्रेऽभिव्यनक्ति ॥ गुर्विण्येषास्वपत्युःपरपुरुषाद्वेतिलग्नसुतपत्योः ॥ शुभयुतिदृग्भ्यांस्वपतेःशनिभौमदृशाऽन्यतोगुर्वी ॥ ८१ ॥ अथपातिव्रत्यपरीक्षा ॥ कुलटासतीयमथवेतिलग्नपतिश्चंद्रमाश्चभौमेन ॥ एकांशेमुथशिलकृत्तदैवभवनेभजत्यन्यम् ॥ ८२ ॥ यदिगृहनिजगोभौमस्तदान्यदेशंप्रयातिजारकृते ॥ रविणेतिमुथशिलेसत्युपभुक्तासातुराजपुरुषेण ॥ ८३ ॥ सौम्येनलेखकवणिक्द्विजभेशुक्रेणयोषयैवस्त्री ॥ एतैर्योगैरसतीविपरीतेसुचरितेतिविज्ञेयम् ॥ ८४ ॥ लग्नपतिनाऽथशशिनामूसरिफेभूसुतेभवेज्जारः ॥ युक्तःपुनर्गुरुदृशापुत्रभयाद्रविदृशाच राजभयात् ॥८५॥ सितदृष्ट्यापरनारीभयात्सितज्ञैकराशिगतदृष्ट्या॥ जारस्यस्थविरत्वाल्लज्जितात्पततिजारंसा ॥ ८६ ॥ ॥ अथाष्टमस्थानपृच्छा ॥ ॥ नृपसंग्रामप्रश्नेविलग्नलग्नेशसंस्थितात्खेटात् ॥ शशिमूसरिफात्प्रष्टास्तास्तपसंस्थेन्दुमुथशिलाच्छत्रुः ॥ ८७ ॥ तेषांचबलात्तयोर्बलमित्यर्थः ॥ अथवाशनिकुजजीवाःशीघ्रेभ्योबलयुताउपरिचराः ॥ बुधसितचंद्रास्तेभ्यश्चदुर्बलाधश्चराश्चसंचिंत्याः ॥८८॥ मंदात्प्रष्टुर्ग्रहाःशन्यादयोयदिशीघ्रेभ्यःसितादिभ्योऽग्रेसराभवंति तदासितादिभ्यः शत्रुगेहेभ्यस्तेजोलब्ध्वरजयभाजोभवंतिप्रष्टारः ॥ यदातुप्रश्नकालेशन्यादयोनाग्रेसरास्तदाशीघ्रेभ्यस्तेजोलब्धुमशक्ताः पराभूताभवंतीत्यर्थतःसिद्धम् ॥ लग्नपतावस्तपतेःषट्त्रिदशाथमुथशिलेद्वयोःस्नेहः ॥ वर्गद्वयमध्याधःपतितःसोऽन्येनबध्यःस्यात् ॥ ८९ ॥ वर्गद्वयाधिपानांमूसरिफेऽस्तंगतेनरणदैर्घ्यं ॥ लग्नस्वामिनिमंदेकंबूलेउपरिगेजयःप्रष्टुः ॥ ॥ ९० ॥ एवंगुणेतुतस्मिन्विप्रविनष्टेस्तपतिनीचस्थे ॥ केंद्रेऽस्ते

वास्तपतौप्रष्टुर्हानिःप्रवक्तव्या ॥ ९१ ॥ लग्नादधःशुभेसतिउपरिचमं
देशुभःसहायःस्यात् ॥ लग्नपतौरंध्रस्थेरंध्रपतिमुथशिलेमतिःप्रष्टुः ॥
॥ ९२ ॥ सप्तेशेधनसंस्थेधनेशकृतमुथशिलेरिपोर्नाशः ॥ लग्नेशदश
मपत्योर्मुथशिलतःपृच्छकस्यजयवीर्ये ॥ ९३ ॥ तुर्यास्तपयोरेवंश
त्रोर्योगेजयोज्ञेयः ॥ उभयवर्गेपिकेंद्रेतत्पतिकृतमुथशिलेबलंज्ञेयम्
॥९४॥ बलवान्मुथशिलंयत्रवर्गेतस्यवर्गस्यजयइत्यर्थः ॥ चरराशौसबलत्वं
जित्वाप्रांतेविनाशस्तु ॥ लग्नपतावंत्यस्थेप्रष्टानश्यतिपरोऽस्तपेषष्ठे
॥ ९५॥ खपतौलग्नेप्रष्टुस्तुर्येशेऽस्तेरिपोःसहायबलम् ॥ यन्मुथशिलौ
रवींदूतस्यबलंमुसरिफेहानिः॥९६ ॥ ॥ अथनवमस्थानपृच्छा ॥ ॥ मम
गमनंभविताकिंनवेतिलग्नेश्वरेनवाकेंद्रे ॥ नवमेशमुथशिलेसतिनवमेशे
वाभवेद्गमनम् ॥ ९७ ॥ लग्नस्थेनवमपतौलग्नाधिपमुथशिलेचसंचारा
त् ॥ रहितोयातिपुनर्नानवमदृशावर्जितेयोगे ॥ ९८ ॥ लग्नपतौकें
द्रस्थेसहजग्रहमुथशिलेचविक्रूरे ॥ गमनंस्यादस्मिन्वाकेंद्रेक्रूरेशनास्ति
गतिः ॥ ९९ ॥ अस्तेक्रूरेपिचयत्कार्येनिर्यातिविघ्नमतएव ॥ आकाश
स्थेपापेराजकुलाज्ज्येष्ठतोनिजाद्वापि॥१००॥नवमेशेमुथशिलगेलग्ना
धीशेनपापरिपुदृष्टे ॥ गमनेवसानतःस्यात्प्रष्टुःकष्टंक्षयोऽर्थस्य॥१०१॥
लग्नेशेनवमेशेमुथशिलकृतिरंध्रसप्तमेकष्टम् ॥ उदयेयस्मिन्यायाद्विनि
वृतिःस्यात्सुखकरःपंथाः॥१०२॥लग्नान्मार्गानुभवोव्योम्नःकार्यस्मरा
द्गतिस्थानन् ॥ भूमेःकार्यपरिणतिरेवंलग्नेशरीरसुखम् ॥१०३॥दशमे
शुभेचसिद्धिःकार्यस्यास्तेप्रयातियत्स्थाने ॥ तत्रशुभंचचतुर्थेपरिणामः
सुंदरःकार्ये ॥१०४ ॥ लग्नेशंशशिनंवायःक्रूरस्तुदतितत्रमनुजर्क्षे ॥ म
नुजत्रिराशिकेवातदाभयंद्विपदतोगंतुः ॥ १०५ ॥ जलराशौवारिभयं
चतुष्पदर्क्षेतथाश्वादेः ॥ घटचापेद्रुमकंटकभयंहरौव्याघ्रसिंहादेः१०६
नगरप्रवेशतोऽस्मान्फलमस्तिनवाप्रवेशलग्नमिह ॥ तस्मिन्धनपेव
क्रेनोहरणंकार्यसिद्धिर्वा ॥ १०७ ॥ हरणंस्थितिरित्यर्थः ॥ अतिचरिते

बहुदिवसंहरणंनोकार्यसिद्धिरीषदपि ॥ नवमतृतीयगतेस्मिन्कार्यंकृत्वाशुनिजपुरंयाति ॥१०८॥ लग्नेकर्मण्यायेधनपयुतेशोभनंज्ञेयम् ॥ सक्रूरसप्तमस्थेपथिविघ्नाज्झकटकश्चतुर्थस्थे॥१०९॥ ॥अथदशमस्थानपृच्छा ॥ राज्याप्तिप्रश्नलग्नेलग्नेशेशशिनिवानभःपतिना ॥ कृतमुथशिलेंबरदृशाराज्यंरूपक्रमाद्भवति ॥ ११० ॥ स्वकुलोचितंराज्यंभवतीत्यर्थः ॥ अन्योन्यभवनगमनाक्रूराभावेऽथचिंतितप्राप्तिः ॥ लग्नस्थेनान्येनचसौम्येनांबरस्यमुथशिलेप्येवम् ॥ १११ ॥ पापार्दितेतुमंदेनिकटीभूयोत्तरत्यधोराज्यम् ॥ मंदगामीयोग्रहोत्राधिकारीतस्मिन्पापयुतेराज्यनाशइतितात्पर्यम् ॥ भूमिस्थेक्रूरदृशात्वपवादःशुभदृशाकीर्तिः ॥ ॥ ११२ ॥ मंदग्रहेबलवतिक्रूरवियुक्तेयदाशशीविबलः ॥ मंदेबलेनभ्रमणात्राज्यप्राप्तिर्भवेत्प्रष्टुः ॥ ११३ ॥ लग्नाधिपतौस्वगृहेलाभोराज्यस्यतुंगगेभौमे ॥ लग्नांबराधिपौयदिकंबूलौकेंद्रगेंदुमुथशिलतः ॥ ॥ ११४ ॥ उत्तमराज्यावाप्तिःस्वर्क्षस्थेचेंदुतोविपुला ॥ यत्रर्क्षेलग्नेशस्तत्पतिरशुभेगृहेतदाकार्यम् ॥ ११५ ॥ नस्यादस्तेकष्टाद्दशमदृशाकटुकताकार्ये ॥ राज्यप्राप्तौसत्यांयदिपृच्छतिकोपिपरिणतिंचतदा ॥ ॥ ११६ ॥ लग्नंशरीरकार्यंगृहकर्मास्तंनभश्चराज्यार्थम् ॥ लाभोमित्रस्यार्थेचतुर्थकंकर्मणोवसितयेच ॥ ११७ ॥ द्रव्यंधनायसहजंभ्रातृभ्योरिपुश्चवैरिभ्यः ॥ एतैःशुभैःशुभंस्यादशुभेवामंचसर्वकार्याणाम् ॥ ॥ ११८ ॥ वित्तस्वामिनिभौमेनौचित्येपारदारिकेव्ययकृत् ॥ जीवेधर्मायरिपौगुरुपूजायैसितेविलासाय ॥ ११९ ॥ वाणिज्यायज्ञेपुनरिंदौमुथशिलिनिचान्यथान्यार्थम् ॥ लग्नपतौपतितस्थेविबलेराज्यात्ययस्तुकंबूले ॥ १२० ॥ कोपिगुणःस्यात्पापाक्रांतैरशुभंच्युतोभवति ॥ नरपतिसचिवस्नेहप्रश्नेकंबूललग्नसप्तमयोः ॥ १२१ ॥ मुथशिलयोःशुभदृष्ट्याशुभताराज्येमिथःस्नेहः ॥ राज्यंचरंस्थिरंवालग्नपगगनेशयोःसहयोः ॥ १२२ ॥ यद्येकोमंदःस्यात्केंद्रेतत्स्थितमतो

न्यथावाच्यम् ॥ यदिवासवाममार्गेभूमौवाप्रच्युतिर्भवेत्पूर्वम्॥१२३॥ कंबूलेसतिलभतेशीघ्रंत्वथमुसरिफेनपुनः ॥ १२४॥ अथैकादशस्थानपृच्छा ॥ ॥ नृपतेर्गौरवलाभाशादिममस्यान्नवेतिचप्रश्ने ॥ आयेशलग्नपत्योःस्नेहदृशामुथशिलेद्रुतंभवति ॥ १२५ ॥ रिपुदृष्ट्याबहुदिवसैःकेंद्रेचायेशचंद्रकंबूले ॥ वाच्यापूर्णेवाशाचरस्थिरद्विभावगेस्वनामफलम् ॥ १२६ ॥ मंदेक्रूरोपहतेभूत्वाशाशुप्रणाशमुपयाति ॥ क्रूरायुक्तेचशुभयुज्यधिकारवशेनलब्ध्याशा ॥ १२७ ॥ मित्रेणसहप्रीतिर्भवितालग्नेश्वरायपत्योश्च ॥ प्रियदृष्ट्यामुथशिलतःप्रीतिर्वान्योन्यगृहयानात् ॥ १२८ ॥ केंद्रेस्थितयोरनयोर्मैत्रीकिलपूर्वजातैव ॥ पणफरगतौपुरस्तादापोक्लिमतोमहाप्रीतिः ॥ १२९ ॥ गुप्तंकार्यमिदंमेसिध्यतिलग्नेश्वरेऽथचंद्रमसि ॥ शुभमुथशिलगेकेंद्रेतन्निकटेवाथसिद्धिःस्यात् ॥१३० ॥ ॥ अथद्वादशस्थानपृच्छा ॥ ॥ रिपुविग्रहपृच्छायांबलवतिषष्ठेरिपुःसबलः ॥ द्वादशपेशुभदृष्टेबलवतिवाच्यंबलप्रष्टुः ॥ ॥ १३१ ॥ रिपुविग्रहपृच्छायांनामोच्चारेरिपोर्बलिन्यस्ते ॥ गुप्तेचद्वादशपेबलवतिवाच्यंबलंप्रष्टुः ॥ १३२ ॥ शुभयुतदृष्टेसद्व्ययमशुभेक्षणयोगतोव्ययमनर्थात् ॥ एवंभावेष्वखिलेषूह्यंसदसत्फलंसुधिया ॥ १३३ ॥ इतिसंक्षेपतोद्वादशभावप्रश्ननिरूपणम् ॥ ॥ अथकेचिद्विशेषतःप्रश्नाः ॥ तत्रादौपथिकागमनम् ॥ ताजिकेसमरसिंहे—आगमनेपृच्छायांलग्नेशेलग्नमध्यसंस्थेन ॥ कृतमुथशिलेसमेतिहिसुखमस्ततुरीयगेकष्टात् ॥ १३४ ॥ स्थानाच्चलितःप्रश्नेलग्नपतौसहजनवमगृहसंस्थे ॥ लग्नस्थेनमुथशिलेपंथानंवहतिपथिकोऽयम् ॥१३५ ॥ रंध्रेऽथधनेतस्मिन्नाकाशस्थेनमुथशिलेप्येवम् ॥ केंद्रस्थितेत्थशालेलग्नेक्षणवर्ज्यमेतिनकदापि ॥ १३६ ॥ लग्नाधिपतौवक्रेलग्नंपश्यत्यमुत्रचंद्रेवा ॥ वक्रगमुथशिलेसतिसमेतिपथिकःसुखंशीघ्रम् ॥ १३७ ॥ अंत्यस्थितलग्नपतौशशिनाकृतमुथशिलेद्रुतमुपैति ॥ लग्नाद्वापिचतुर्थाद्

भाद्वितीयतृतीयगावापि ॥ १३८ ॥ कथयंतिनष्टलाभंप्रवासिनश्चा
गमंत्वरितम् ॥ १३९ ॥ चिंतामणौ- ग्रहःषष्ठेऽथजामित्रेवाक्पतिः
कंटकेस्थितः ॥ पथिकागमनंब्रूतेसितेज्ञेवात्रिकोणगे ॥ १४० ॥
षष्ठोदयेपापदृष्टेशुभदृग्वर्जितेबुधः ॥ लग्नात्षष्ठेयदापापायातुश्चनिधनं
वदेत् ॥ १४१ ॥ यदाक्रूरास्तृतीयस्थादेशादेशांतरंगतः ॥ चौरेणैव
हृतस्वश्चपथिकःकेंद्रगायदि ॥ १४२ ॥ पापैःषष्ठत्रिलाभस्थैःकंटक
स्थैःशुभग्रहैः ॥ प्रवासीसुखमायातिदूरस्थोपिसुनिश्चितम् ॥१४३॥
चतुरस्रेत्रिकोणेवापापगेहस्थितःशनिः ॥ पापदृष्टश्चनियतंबंधनंयातु
रादिशेत् ॥ १४४ ॥ शुभयुक्तेस्थिरेलग्नेस्थिरोबंधश्चरेऽन्यथा ॥ द्वि
तनौसौम्यसंयुक्तेबंधमोक्षौक्रमेणतु ॥ १४५ ॥ पापास्त्रिकोणजामि
त्रेविलग्नेषष्ठकोदये ॥ शत्रुभिर्वीक्ष्यमाणाश्चयातुःकष्टंवदेत्सुधीः ॥
॥ १४६ ॥ मार्गस्थानगतैःसौम्यैर्मार्गेतस्यशुभंवदेत् ॥ क्रूरैर्दुःखंवि
लग्नस्थैःपापैःक्लेशमवाप्नुयात् ॥ १४७ ॥ चरलग्नेचरांशेवाचतुर्थेचंद्र
माःस्थितः ॥ प्रवासीसुखमायातिकृतकार्यश्चवेश्मनि ॥ १४८ ॥
कंटकैःसौम्यसंयुक्तैःपापग्रहविवर्जितैः ॥ प्रवासीसुखमायातिनिधन
स्थेसुधाकरे ॥ १४९ ॥ गमागमौतुनस्यातांयोगेदुरुधराकृते ॥
शुभैःशुभकृतोरोधःपापैस्तस्करतोभयम् ॥ १५० ॥ गमागमौहिन
स्यातांस्थिरराशौविलग्नगे ॥ नरोगोपशमोनाशोद्रव्याणांनपराभवः
॥ १५१ ॥ विपरीतंचरेवाच्यंफलंमिश्रंद्विमूर्तिषु ॥ स्थिरवत्प्रथमे
खंडेपरार्धेचरराशिवत् ॥ १५२ ॥ प्रवासीशीघ्रमायातिगुरुशुक्रौत्रि
वित्तगौ ॥ चतुर्थस्थानगावेतौशीघ्रमायातिकार्यकृत् ॥ १५३ ॥
इंदुःसप्तमगोलग्नात्पथिकंवक्तिमार्गगम् ॥ मार्गाधिपश्चराश्यर्धात्पर
भागेव्यवस्थितः ॥ १५४ ॥ शुक्रार्कजीवसौम्यानामेकोपिस्याद्धरा
यगः ॥ तदाशुगमनंब्रूयात्सष्ठेर्नगमनंव्यये ॥ १५५ ॥ लग्नाद्यावति
थेस्थानेबलीखेटोव्यवस्थितः ॥ ब्रूयात्तावतिथेमासेपथिकस्यनिवर्त

नम् ॥ १५६ ॥ एवंकालंचरांशस्थेद्विगुणंचस्थिरांशके ॥ द्विस्वभावांशगेखेटेत्रिगुणंचिंतयेत्सुधीः ॥ १५७ ॥ यातुर्विलग्नाज्जामित्रभवनाधिपतिर्यदा ॥ करोतिवक्रमावृत्तेःकालंतुब्रुवतेपरे ॥ १५८ ॥ चतुर्थेदशमेवापियदिसौम्यग्रहोभवेत् ॥ तदानगमनंक्रूरैस्तत्रस्थैर्गमनंभवेत् ॥ १५९ ॥ लग्नाद्वालग्ननाथाद्वायत्संख्याःक्रूरखेचराः ॥ नवनेद्वादशेवापितत्संख्याःस्युरुपद्रवाः ॥ १६० ॥ लग्नाद्वालग्ननाथाद्वायावंतःसौम्यखेचराः ॥ मार्गेतत्रोदयावाच्याःस्थानेस्थानेविचक्षणैः ॥ १६१ ॥ क्रूरयुक्तेक्षितोमंदःशुभदृग्योगवर्जितः ॥ धर्मस्थस्तनुतेव्याधिंप्रोषितस्याष्टगोमृतिम् ॥ १६२ ॥ जामित्रस्यशुभोत्थेयातानायातिदुरुधरायोगे ॥ मित्रस्वामिनिषेधात्पापोत्थेशत्रुरुक्चौरात्॥१६३॥ चंद्रार्कयोश्छिद्रगयोर्यमेनसंदृष्टयोःस्यात्परशस्त्रभीतिः ॥ रंध्रेसितेज्ञेचसुखाप्तिरारेमंदेभयंपापयुगीक्षितेऽध्वनि ॥ १६४ ॥ अथदूरस्थोजीवतिमृतोथवेत्थंयदाप्रश्नः ॥ १६५ ॥ लग्नेश्वरेशीतकरेऽथषष्ठेतुर्येऽष्टमेवाप्यतिनीचगेवा ॥ अस्तंगतेछिद्रपतीत्थशालयुक्तेशुभेदूरगतोमृतःस्यात् ॥ १६६ ॥ भूमेरधःस्थेनवचक्रगेणयदीत्थशालंकुरुतेशशांकः ॥ सौम्यैरदृष्टेमरणंप्रकुर्याद्दूरस्थितस्यापिविदेशगस्य ॥ १६७ ॥ सौम्यैःषष्ठांत्यरंध्रस्थैर्विबलैश्चशुभेक्षितैः ॥ पापयुक्तौशशांकार्कौतदादूरस्थितोमृतः॥ १६८ ॥ पृष्ठोदयेपापयुतेत्रिकोणकेंद्राष्टषष्ठोपगतैश्चपापैः ॥ सौम्यैरदृष्टैःपरदेशसंस्थोमृतोगदार्तोनवमेचसूर्ये ॥ १६९ ॥ तुर्योपरिस्थेनखगेनचंद्रमायदीत्थशालंकुरुतेशुभेक्षितः॥ सौम्यैर्युतोवापरदेशसंस्थितःसुखीचजीवेत्पथिसौख्यमेति ॥ १७० ॥ ॥ अथपरचक्रागमनपृच्छा ॥ षट्पंचाशिकायाम्—मार्गान्निवर्ततेशत्रुःपापैःशत्रुग्रहाश्रितैः ॥ चतुर्थगैरपिप्राप्तःशत्रुर्भग्नोनिवर्तते ॥ ॥ १७१ ॥ झषालिकुंभकर्कटारसातलेयदास्थिताः ॥ रिपोःपराजयस्तदाचतुष्पदैःपलायनम् ॥१७२॥ मेषधनुःसिंहवृषायद्युदयस्थाभवं

तिहिबुकेवा ॥ शत्रुर्निवर्ततेतदाग्रहसहितावावियुक्तावा ॥ १७३ ॥ नागच्छतिपरचक्रंयदार्कचंद्रौचतुर्थभवनस्थौ ॥ गुरुबुधशुक्राहिबुकेय दातदाशीघ्रमायाति ॥ १७४ ॥ स्थिरोदयेजीवशनैश्चरेस्थितेगमाग मोनैववदेत्तुपृच्छतः ॥ त्रिपंचषष्ठारिपुसंगमायपापाश्चतुर्थाविनिवर्त नाय ॥१७५॥दशमोदयसप्तमगाःसौम्यानगराधिपस्यविजयकराः ॥ आरार्किज्ञगुरुसिताःप्रभंगदौविजयदानवमे॥१७६॥ नवमेभौमशनीभं गदौबुधगुरुशुक्राविजयदाइत्यर्थः ॥ उदयर्क्षाच्चंद्रर्क्षंभवतिचयावद्भिनैश्च तावद्भिः ॥ आगमनंस्याच्छत्रोर्यदिनहिमध्येग्रहःकश्चित् ॥ १७७ ॥ अन्यत्रापिप्रश्नप्रदीपे ॥ दैत्येज्यवाचस्पतिसोमपुत्रैरेकर्क्षगैर्लग्नगतैर्बला ढ्यैः ॥ द्वाभ्यामथेज्येभृगुजेऽथलग्नेहन्याद्रणेयायिनृपंपुरेशः ॥ ॥ १७८ ॥ सूर्येंदुभौमार्कजसैंहिकेयैःसर्वैश्चतुर्भिस्त्रिभिरेवलग्नगैः ॥ हन्यात्तदास्थायिनमाशुयायीद्यूनस्थितैर्यायिनृपंपुरेशः ॥ १७९ ॥ शुक्रेज्यशीतांशुबुधाःसुरेज्यैःसर्वैस्त्रिभिर्द्यूनगतैर्बलाढ्यैः॥हन्याद्रणेस्था यिनमाशुयायीसुखास्पदस्थैश्चशुभैःसुसंधिः ॥ १८० ॥ कुजेत्थशा लेहिमगौविलग्नेबंधोऽथमृत्युर्युधिनागरस्य ॥ भौमेत्थशालेचविधौक लत्रेबंधंमृतिंवालभतेऽत्रयायी ॥ १८१ ॥ लग्नेशजामित्रपयोश्चमध्ये भवेद्ग्रहोयःस्वगृहोच्चसंस्थः ॥ तद्वर्गमर्त्योनृपयोश्चसंधिर्ज्ञेयोबुधेलेख कपंडिताभ्याम् ॥ १८२ ॥

राजानौरविशीतगूइत्यादिवर्गः ।

सू. चं.	मं.	बु.	गु. शु.	श.
राजानौ	सेनापतिः	युवराजः	मंत्रिणौ	दासः

क्रूरेकलत्रेप्युदयेशुभग्रहोयच्छेद्धनंयायिनृपायनागरः ॥ विपर्ययाद्या यिनृपःपुरेश्वरंदुर्गाद्विनिष्काश्यददातिवास्पदम् ॥ १८३॥ रवीत्थशा लेशशिजेसुगुप्ताश्चराभवेयुश्चकुजेसराफात् ॥ ग्रहाच्छशांकेनयुतश्चत स्मिन्येयेन्यवेषाश्चभवंतिचाराः ॥ १८४ ॥

चिंतामणौदुर्गप्रश्नः ।

प्रश्नेविलग्नेक्रूरेवादुर्गभंगोनजायते॥ विशेषतोभूमिपुत्रेराहौवामूर्तिगेसति॥ ८५॥ सप्तमेसिंहिकासूनौदुर्गंशीघ्रेणलभ्यते ॥ जामित्रोदयगेक्रूरेरिःफगेलग्ननायके ॥ १८६ ॥ द्वितीयेवाष्टमेषष्ठेतदादुर्गंनलभ्यते ॥ सक्रूरोलग्नपोवक्रीयुद्धदःकेंद्रसंस्थितः ॥ १८७ ॥ षष्ठाधिपेद्यूनगतेपापेवायुद्धमादिशेत् ॥ पृच्छायांकेंद्रगैःक्रूरैःकोटेदुर्गवधोनृणाम् ॥ १८८ ॥ भौमाष्टमेशावेकत्रतदातिनिधनंनृणाम् ॥ स्वायपुत्रस्थितेजीवेकोटमध्येभयंनहि ॥ शनौभौमेचकेंद्रस्थेबहूनांवधबधनम् ॥ ॥ १८९ ॥ लग्नगतोयदिपापःपापेनयुतेक्षितोवास्यात् ॥ लग्नात्पूर्वापरगौपापोयुद्धंतदाघोरम् ॥ १९० ॥ अथरोगिणःशुभाशुभम् ॥ विलग्नेषष्ठपःपापोजन्मराशिनिरीक्षिते॥ रोगिणस्तस्यमरणंनिश्चयेनवदेद्बुधः ॥ १९१ ॥ चतुर्थाष्टमगेचंद्रेपापमध्यगतेपिवा ॥ मृतिःस्याद्बलसंयुक्तसौम्यदृष्ट्याचिरात्सुखम् ॥ १९२ ॥ विधौलग्नेस्मरेभानौरोगीयातियमालयम् ॥ प्रश्नेक्रूरग्रहेलग्नेरोगवृद्धिश्चिकित्सकात् ॥ १९३ ॥ तथालग्नगतेसौम्येवैद्योक्तममृतंवचः ॥ लग्नेवैद्योद्युनंव्याधिःखंरोगीतुर्यमौषधम् ॥ १९४ ॥ रोगिणोभिषजोमैत्रीमैत्रीभेषजरोगयोः ॥ व्याधेरुपशमोवाच्यःप्रकोपःशात्रवेत्रयोः ॥ १९५ ॥ लग्ननाथेचसबलेकेंद्रसंस्थेशुभग्रहे ॥ उच्चगेवात्रिकोणेवारोगीजीवतिनिश्चयम् ॥ १९६ ॥ एकःशुभोबलीलग्नेत्रायतेरोगपीडितम् ॥ सौम्याधर्मारिलाभस्थास्तृतीयस्थागदापहाः ॥ १९७ ॥ ॥ अथदेवदोषज्ञानम् ॥ वह्निचंकद्वादशेषष्ठेलग्नात्पापग्रहोयदि ॥ हतोगदैर्जलैश्शस्त्रैस्तस्यदोषःकुलोद्भवः ॥ १९८ ॥ प्रेताश्चराहौपितरःसुरेज्येचंद्रेबुदेव्यस्तपनेपिदेव्यः ॥ स्वगोत्रदेव्यश्चशनौबुधेचभूतानिविंद्याद्बचयरंध्रसंस्थे ॥ १९९॥ शाकिन्यआरेभृगुजेंबुदेव्योगृह्णंतिमर्त्येविमुखंसुकुं

दात्॥स्वर्क्षोच्चगेवीर्ययुतेचसाध्याश्चंद्रेचनीचेविबलेनसाध्याः॥ २००॥ केंद्रस्थैर्बलिभिःपापैरसाध्यादेवतागणाः॥ सौम्यग्रहैश्चकेंद्रस्थैःसाध्या मंत्रस्तवार्चनैः ॥ २०१ ॥ कंटकाष्टत्रिकोणस्थाःशुभाउपचयेशशी ॥ लग्नेचशुभसंदृष्टेरोगीरोगाद्विमुच्यते ॥ २०२ ॥ रोगग्रहणमुपलक्षणम्॥ संतानप्रतिबंधादावप्येवंदोषनिरूपणम् ॥ कथस्वामिभृत्यप्रश्ने त्रैलोक्यप्रकाशे-शीर्षोदयेसौम्ययुतेक्षितोवासौम्यैर्द्वितीयाष्टमसप्तमस्थैः ॥ तृतीयलाभारिगतैश्चपापैःसौख्यार्थलाभोनृपसेवकस्य ॥२०३॥ लग्नाद्वितीयेमदनाष्टमेर्क्षेवित्तक्षयंसंभ्रममार्तिमृत्युम्॥ कुर्वंतिपापाःक्रमशोनरेंद्रात्भृत्यस्यतस्मात्परिवर्जयेत्तम् ॥ २०४ ॥ लग्नाद्वितीयाष्टमसप्तमर्क्षाःपापाःप्रणाशंनृपभृत्ययोर्द्वयोः ॥कुर्वंतितेष्वेवगताश्चसौम्याःकुर्युर्धनारोग्यसुखानिचोभयोः ॥२०५॥ शशांकसौम्यैरुदयास्तभावौदृष्टौयुतौवासबलैर्नपापैः ॥ प्रष्टुस्तदास्याद्धृदिपार्थिवस्यस्नेहप्रसादावकृपाप्रतीपात् ॥ २०६ ॥ अथान्यईशोममभविष्यतिनवाइतिप्रश्ने ॥ षष्ठेश्वरेणव्ययपेनकेंद्रेयदीत्थशालंकुरुतेविलग्नपः॥ प्रष्टुस्तदान्यःप्रभुरर्थदःस्यादतःप्रतीपान्नभवेत्परःप्रभुः ॥ २०७ ॥ लग्नेश्वरेस्वर्क्षगतेस्वतुंगकेंद्रस्थितेशीतकरेत्थशाले ॥ शुभग्रहैर्दृष्टयुतेबलान्वितेप्रष्टुर्निजस्वाम्यमितार्थलाभः ॥ २०८ ॥ जायेश्वरेस्वोच्चनिजर्क्षसंस्थेकेंद्रस्थितेशीतकरेत्थशालगे ॥ शुभग्रहैर्दृष्टयुतेबलोत्कटैःप्रष्टुस्तदान्यःप्रभुरर्थदोभवेत्२०९ इदंगृहंवाशुभमन्यदालयंस्थानंत्विदंवाशुभमन्यदालयम् ॥ ममात्रभद्रंगमनात्तुतत्रवाष्टष्टोदयेत्थंविधिनाविमृश्य ॥२१०॥ अथनष्टद्रव्यलाभप्रश्नः॥तत्रधनप्राप्तौप्रश्नचिंतामणौ-प्रश्नेचतुर्थाधिपतिस्तत्रस्थेवावलोकिते॥ अवश्यंवर्ततेतत्रधनंचंद्रेऽथवावदेत् ॥ २११ ॥ वित्तपेधनगेबंधौवास्तितत्रधनंबहु ॥ पापेतुर्यगतेद्रव्यंस्थितंतूर्णंनलभ्यते ॥ २१२ ॥ भौमेसप्ताष्टराशिस्थेधनमन्यत्रनाप्यते ॥ लग्नेतमोरविश्छिद्रेतदाद्रव्यं

नलभ्यते॥सप्ताष्टदशपातालेशोविधुर्धनदोगुरुः ॥२१३॥लग्नेश्वरेद्यूनगतेविलग्नेजायेश्वरेनष्टधनस्यलाभः ॥ जायेशलग्नाधिपतीत्थशालेद्यूनेविनष्टंधनमेतिमर्त्यः॥२१४।लग्नेशजायाधिपतीत्थशालेलग्नेश्वरंयच्छतितस्करोर्थम् ॥ सूर्येविलग्नेऽस्तमितेशशांकेनलभ्यतेयद्द्रविणंविनष्टम् ॥ २१५ ॥ कर्मेशलग्नाधिपतीत्थशालेचौरःस्वमादायपुरात्पलायते॥ चंद्रेऽस्तपेचार्ककरप्रविष्टेतल्लभ्यतेनष्टधनंसतस्करम् ॥ २१६ ॥ अस्तेश्वरेकेंद्रगतेऽस्तिचौरस्तत्रैववाऽन्यत्रपुराद्विनिर्गतः ॥ धर्मेशदुश्चिक्यपतीत्थशालेजायेश्वरेऽन्यत्रगतःसचौरः ॥ २१७ ॥ कर्मेशलग्नाधिपतीत्थशालेतल्लभ्यतेराजकुलाच्चचौर्यम् ॥ त्रिधर्मपद्यूनपतीत्थशालेत्वन्यत्प्रदेशाद्गमनेतदाप्तिः ॥ २१८ ॥ शुभेत्थशालेहिमगौविलग्नेखस्थेथवानष्टधनस्यलाभः ॥ सुस्नेहदृष्ट्यारविणाशुभेनदृष्टेविलग्नेहिमगौचलाभः ॥ २१९ ॥ षट्पंचाशिकायाम्--स्थिरोदयेस्थिरांशेवावर्गोत्तमगतेपिवा ॥ स्थितंतत्रैवतद्द्रव्यंस्वकीयेनैवचोरितम् ॥ २२० ॥ आदिमध्यावसानेषुद्रेष्काणेषुविलग्नतः ॥ द्वारदेशेतथामध्येगृहांतेचवदेद्धनम् ॥ २२१॥ प्रश्नतंत्रे–पतितधनस्थप्रश्नेमिथोगृहस्थौविलग्नसप्तेशौ ॥ यदिमुथशिलंतयोःस्यात्तदाशुतत्रैववदतिधनम् ॥ २२२ ॥ नष्टंक्वदिशिप्राप्तंपृच्छायांलग्नगेविधौप्राच्याम् ॥ तत्स्थानेयाम्यायामस्तेवारुण्यांवाभुव्युदीच्याम् ॥ २२३ ॥ भुविचतुर्थे । यदिनेंदुःकेंद्रेतच्चत्वारिंशांशकैश्चपंचयुतैः ॥ भागेदिक्क्रमउक्तोवह्नयवनीवायुवारिराशौवा ॥ २२४ ॥ नष्टवीतवित्तलब्धेःपृच्छायांचौरसप्तमंततोलाभः ॥ हिबुकंद्रव्यस्थानंलग्नंचंद्रश्चधननाथः ॥ २२५ ॥ लग्नेशोऽस्तेस्तपतिनाचेन्मुथशिलीततोलाभः ॥ यद्यष्टेशोलग्नेतदास्वयंतस्करोऽर्पयति ॥ रविरश्मिगेधनेशेवास्तमितेतस्करस्यलाभःस्यात् ॥ २२६ ॥ लग्नेशदशमपत्योर्मुथशिलतःप्राप्यतेस्ववान्चौरः ॥ लग्नेशदृष्टचभावेचौरःसहमात्रयायाति ॥ २२७॥ अस्ताधिपतौदग्धेरविरश्मिगतेऽथलभ्य

तेचौरः ॥ लग्नन्नृपप्रकृतेरथशालेराजभयाद्धनमिदंस्वयंदत्ते ॥२२८॥
लग्नास्तपयोर्नस्याद्यदिदृष्टिर्लग्नपस्तथाविकलः ॥ तत्तस्करोस्यहस्ता
द्ददातिचौर्यैर्हिराजकुले ॥ २२९ ॥ लग्नपमध्यपयोगेराजकुलेंप्राप्यल
भ्यतेचौर्यम् ॥ रंध्रंचौरस्यधनंधनपेतत्राथसप्तमेनाप्तिः ॥२३०॥ रंध्र
पतौधग्नपस्यतुमुथशिलयोगेचप्राप्यतेवित्तम् ॥ रंध्रपतौदशमपतेर्मुथ
शिलगेचौरपक्षकृद्भूपः ॥ धनपेविलग्नपेसतिदृष्टिविहीनेश्चुतिर्भवतिना
प्तिः॥२३१॥चौरज्ञानप्रश्नेलग्नरविशशिदृशास्वगृहचौरः ॥ अनयोरेक
दृशागृहसमीपवर्तीवसत्येषः ॥ २३२ ॥ लग्नस्थेलग्नपतावस्तपयुक्ते
चगृहगतश्चौरः ॥अस्ताधिपतावंत्येसहजेवास्वीयभृत्योऽयम्॥२३३॥
अस्तेशेतुंगस्थेस्वगृहेवातस्करःप्रसिद्धःस्यात् ॥ लग्नदशमास्तभावः
क्रमेणवीक्ष्याःस्वतुंगभवनादौ ॥ २३४ ॥ यःखेटःस्याद्बलवान्स
ज्ञेयस्तस्करस्यबली ॥ लग्नादिषुयोग्रहःस्वोच्चादिबलीतिष्ठतिसयज्जातिःसत
स्यसहायकंकरोतीत्यर्थः ॥ एवंयोगंतुविनाद्यूनेसस्यैवबलमभिग्राह्यम्
॥२३५॥ इत्थंचौरज्ञानेचोरःसूर्येग्रहेश्वरस्यपिता॥ चंद्रेमाताशुक्रेभार्या
मंदेसुतोभवेन्नीचे ॥२३६॥ जीवेग्रहप्रधानंभौमेपुत्रोऽथवाभ्राता ॥ ज्ञे
स्वजनोमित्रंवाज्ञात्वेत्थंपुण्यसहममावेश्यम् ॥ २३७॥ तस्मिन्क्रूरादृ
ष्टेपुरानचौरोऽस्तपेपुरापिस्यात् ॥ अस्तेशान्मूसरिफेभौमेचौरःपुरा
पिनिगृहीतः ॥ २३८ ॥ सप्तेशेरविपुत्रेचंद्रदृशातस्करोहिपाखंडी ॥
जीवोविलोक्यलोकंभौमेखातेनपालकंभक्त्या ॥ २३९ ॥ प्रतिकुंचि
कयापहृतंसितेऽतिथिर्ज्ञेप्रपंचकरः॥ चौरस्यवयोज्ञानेसितेयुवाज्ञेशिशु
र्गुरौमध्यः ॥ २४० ॥ तरुणोभौमेमंदेवृद्धोर्केस्यादतिस्थविरः॥ रवि
नभयोःस्वमंदिरेस्मरभूमिलग्नयोर्मध्यम् ॥२४१॥ चरतिरवौनवमध्य
मवृद्धवयोऽतीतकाःक्रमशः॥नष्टस्थानेप्रश्नेतुर्येभूम्यग्निवायुजलमध्यात्
॥ २४२ ॥ योभवतिराशिरस्मात्स्थानंज्ञेयंगतधनस्य ॥ अथचतु
र्थगृहेतुर्येश्वरोऽथयःस्याद्ग्रहस्ततोज्ञेयम् ॥ २४३ ॥ मंदेमलिनस्थाने

चंद्रेंबुनिगीष्पतौसुराराभे ॥ भौमेवह्निसमीपेरवौगृहाधीश्वरासनस्था
ने॥२४४॥ तल्पेशुक्रेसौम्येपुस्तकवित्तान्नयानपार्श्वेच ॥ अंबुपदेनकूपा
दिसन्निधौहस्तपादप्रक्षालनस्थानेवेत्यर्थः ॥ चौरोयमथनवेतिक्रूरेंद्वोर्सुथशि
लेचचौरःस्यात्॥ २४५ ॥ सौम्यशशिसुथशिलेखलुनभवतिचौरःप्रव
क्तव्यम्॥ किमनेनतस्करत्वंकदापिविहितंनवेतिपृच्छायाम्॥२४६॥
लग्नपशशिनोरेकस्मादपिमूसरिफेऽस्तपेविहितम्॥ चौरःस्त्रीपुरुषोवा
पृच्छायामस्तपेस्त्रियोराशौ ॥ २४७ ॥ स्त्रीखेटेस्त्रीदृष्टेचौरःस्त्रीव्यत्य
यात्पुरुषः ॥ लग्नेशेनवमांशतोवयःप्रमाणजातयोज्ञेयाः ॥ चौरोयमि
हानंतंशास्त्रंकथितोऽयमुद्देशः॥ २४८ ॥ अथविशेषतःसंतानप्रश्नः ॥ ल
ग्नेश्वरेणाथनिशाकरेणयदीत्थशालंकुरुतेसुतेशः ॥ पंचमेशइत्यर्थः॥शुभः
शुभैःसंयुतईक्षितःस्यात्ससंततिंप्रष्टुरसौविदध्यात् ॥ २४९ ॥ पुंस्त्री
ग्रहाःपुत्रगृहंविलग्नात्पश्यंतियावंतिइहातिवीर्याः ॥ तत्संख्यकाःस्यु
स्तनयाश्चकन्याःशुभेशयोगात्सुतभांशतुल्याः ॥ २५० ॥ लग्नेशपु
त्राधिपतीपरस्परंनपश्यतश्चेदुदयंचपंचमम्॥ पापेत्थशालौसुतलग्न
पौचंप्रष्टुस्तदासंततिनास्तितांवदेत्॥ २५१ ॥ पुत्रालयेसिंहवृषालि
कन्याःप्रश्नोदयाज्जन्मभतस्तथेंदोः ॥ अल्पप्रजःसंततिपृच्छकःस्या
त्पापैःयुतर्क्षेसहितेक्षितेवा ॥ २५२ ॥ स्वर्क्षस्थितौरंध्रगतौयमार्कौप्र
ष्टुःस्त्रियंसंदिशतश्चवंध्यां ॥ छिद्रस्थितौचंद्रबुधौसदोषांवाकाकवंध्या
तनयाप्रसूतिम् ॥ २५३ ॥ अत्रचंद्रेबलवतिकन्याप्रसूतिंपुंग्रहदृष्टेकाकवं
ध्येतिज्ञेयम् बुधेबलवतिवंध्या ॥ मृतप्रजाछिद्रगयोःसितेज्ययोर्गर्भस्रवा
भूमिसुतेष्टमर्क्षम्॥ छिद्रेश्वरेछिद्रगतेऽतिवीर्येपुष्पंनविंदत्यबलासुतप्र
दम्॥२५४॥ शुक्रार्कयोरष्टमसंस्थयोर्वाक्रूरैर्धनांत्याष्टमराशिसंस्थैः॥
जाताःपुरस्तान्म्रियतेप्रजावैप्रष्टुर्नचाग्रेशुभसंततिःस्यात्॥२५५॥ रिः
फेश्वरेकेंद्रगतेचसौम्यैर्युतेक्षितेजीवतिबालकश्च ॥ आपूर्यमाणेशुभयु
क्तइंदौकेंद्रेशिशुर्जीवतिदीर्घकालम्॥ २५६ ॥ चिंतामणौ—पंचमेशोऽ

Indira Gandhi National Centre for the Arts

थलग्नेशोविषमर्क्षगतौयदा ॥ पुत्रजन्मप्रदौज्ञेयौकन्यानांसमराशिगौ ॥ २५७ ॥ सुताधिपंन्नृराशिस्थंपुंराशिस्थोपिलग्नपः ॥ वीक्ष्यतेपुत्रदःप्रोक्तोयुग्मराशौचदारिका ॥ २५८ ॥ युग्मराशिगतेलग्नेयदातत्रशुभग्रहाः ॥ गर्भेपत्यद्धयंवाच्यंदैवज्ञेनविपश्चिता ॥ २५९ ॥ विषमोपगतोलग्नाच्छनिःपुत्रसुखप्रदः ॥ समभेयोषितांजन्मविशेषोजातकोक्तिवत्॥२६०॥अथभोजनचिंताचिंतामणौ–कटुकोलवणस्तिक्तोमिश्रितोमधुरोरसः ॥ अम्लःकषायःकथितारव्यादीनांरसाबुधैः ॥ २६१॥ लग्नंपश्यतियःखेटस्तस्ययःकथितोरसः ॥ भोजनेऽसौरसोवीर्यक्रमाद्वाच्याःपरेरसाः ॥ २६२ ॥ चंद्रोयस्यमुथशिलस्तस्यविशेषंवदेद्भुक्तौ ॥ लग्नेराहौमंदेरविदृष्टेभोजनाभावः ॥ २६३ ॥ प्रश्नतंत्रे–कीदृङ्मयाद्यभुक्तंपृच्छायांयदिभवेत्स्थिरंलग्नम् ॥ तद्भुक्तमेकवेलंद्व्यात्मनिवेलद्धयंचरेत्वसकृत ॥ २६४ ॥ चंद्रेलग्नगतेस्यात्क्षारंभौमेचकटुकमम्लंगुरौ ॥ मधुरंदिनकृतितिक्तंशुक्रेस्निग्धंबुधेचसर्वरसम् ॥ २६५ ॥ मंदेकषायमशुभान्मुसरिफेशशिनिमुथशिलेशुभेऽरिदृशा ॥ उद्वाहात्प्रियदृष्ट्याप्रायणिकत्वात्समागतंभोज्यम् ॥ २६६ ॥ अयमस्यार्थः–चंद्रःशुभेनमुथशिलीपापेसराफश्चेत्तदेतदुक्तम् ॥ पापेसराफेचशुभेत्थशालेचंद्रेतुभुक्तंशुभमन्नमीशम् ॥ २६७॥ शुभेसराफेत्वशुभेत्थशालेचंद्रेकदन्नंमघुआज्यवर्ज्यम्॥ पापेत्थशालेऽथखलेसराफेशक्यंनभोक्तंपरतोपिलब्धम् ॥ २६८ ॥ चंद्रस्वनाथदृष्टेसुखभोजनमन्यथाकष्टात् ॥ गुरुमुथशिलेसगौरवमर्केणमुथशिलेऽतिशुचितीक्ष्णम् ॥ २६९ ॥ शुक्रेसुस्वादुरसंसहास्यगीतंबुधेजनाकीर्णम् ॥ शस्त्रकथाढ्यंशनिनाकुस्थानगतंकुजेचोष्णम् ॥ २७० ॥ यदिवदतिभोजनार्थेनिमंत्रितोयामिशशिमहीसुतयोः ॥ एकस्थितयोःकेंद्रेमुथशिलयोर्वापिपूर्णताभवति ॥ २७१ ॥ विधिनाऽनेनशनेःस्यात्कुभोजनंज्ञसितयोरभीष्टान्नम् ॥ जीवस्यतुष्टिजनकंहोरेशेतनुखगेस्वयमुपैति ॥२७२॥ यश्चंद्रेणमुथशि

लीतस्मिन्नीशेतनोःस्वगृहभोज्यम् ॥ वित्तेशेऽत्यगृहेभ्रातृणांसहजपे
तथाऽन्यत्र ॥ २७३ ॥ यश्चंद्रेणमुथशिलीसयस्यभावस्येशस्तत्संबंधेनभोज
नमितिज्ञेयम् ॥ लग्नस्थितेसूर्यसुतेऽथराहौसूर्येक्षितेवैरिनिमंत्रितस्य ॥
स्याच्छस्त्रघातःशशिभौमयोश्चलग्नस्थयोःसौरिदृशास्तिघातः॥२७४॥
जीवेसितेचंद्रगतेबलाढ्येचंद्रेबुधेकेंद्रगतेशुभान्विते ॥ त्रिलाभषष्ठास्प
दगैश्चपापैःस्यात्प्रेमनिर्वैरकरंसुभोजनम् ॥ २७५ ॥ भोज्यंबुभुक्षा
भोक्ताचसुखाप्तांगबलक्रमात् ॥ लग्नपोभोज्यदस्तेषांबलेनफलमादि
शेत् ॥ २७६ ॥ तुर्येशलाभाधिपतीत्थशालेशुभग्रहेक्षायुतितत्सुभो
जनम् ॥ इत्थंखलग्नास्तपतीत्थशालेलाभेश्वरेतत्सुखलाभऊह्यः
॥ २७७ ॥ अथस्वप्नः ॥ लग्नेर्केनृपतिंवह्निंशस्त्रंपश्यतिलोहितम् ॥
श्वेतंपुष्पंसितंवस्त्रंगंधंनारींचशीतगौ ॥ २७८ ॥ रक्तमांसप्रवालंचसु
वर्णधरणीसुते ॥ बुधेखेगमनंजीवेधनंबंधुसमागमम् ॥ २७९ ॥ ज
लावगाहनंशुक्रेशनौतुंगावरोहणम् ॥ लग्नलग्नांशपवशात्स्वप्नोवा
च्योऽथवाबुधैः ॥ २८० ॥ सर्वोत्तमबलाद्वापिखेटान्बुद्ध्याविचिंत
येत् ॥ बलसाम्येफलंमिश्रंदुःस्वप्नोनिर्बलैःखगैः ॥ २८१ ॥ उत्पलः
रविलग्नेशशिदृष्टेरविशशिसमेतविलग्नाद्वा ॥ स्वप्नंदृष्टंप्रवदेत्प्रष्टुर्लग्नां
तरात्कालः ॥ २८२ ॥ अथाखेटकः—लग्नेशजामित्रपतीत्थशालेसुस्ने
हदृष्ट्यात्वनयोर्द्वयोश्च ॥ आखेटकःस्यात्सफलोऽरिदृष्ट्यास्यान्निष्फ
लोवाल्पफलोऽतिकष्टात् ॥ २८३ ॥ लग्नेश्वरेद्यूनगतेविलग्नजायेश्वरे
स्यान्मृगयाप्रभूता ॥ जामित्रनाथेहिबुकेनभःस्थेचाखेटकःस्वल्पतरो
ऽपिनस्यात् ॥ २८४ ॥ ज्ञभौमौसबलौसिद्धिरस्तांशेमृगयाच्युतिः॥
लग्नद्यूनेतरपतीचहेतुस्तैर्जलराशिगैः ॥ २८५ ॥ जलजंखेटकंब्रूया
द्वन्यर्क्षैर्वनसंभवः ॥ क्रूराक्रांतानियावंतिमध्येभानींदुलग्नयोः ॥
तावंतःप्राणिनोवाच्याद्वित्रिघ्नाःस्वांशकादिषु ॥ २८६ ॥ अथकलहः
भुवनदीपके—क्रूरःखचरोलग्नेविवादपृच्छासुजयतिविवादंतम् ॥ सर्वो

वस्थासुपरंनीचेऽस्तेजयतिनद्विषतः ॥ २८७ ॥ लग्नधूनेमुक्त्वाप रस्परंक्रूरयोर्झकटदृष्टौ ॥ विवदद्वादियुगंतच्छुरिकाभ्यांप्रहरतितदैव म् ॥ २८८ ॥ लग्नेसूनेचयदिक्रूरःखचरोविवादिनोर्नतदा ॥ कलह निवृत्तिःकालेजयतिहिबलवान्गतबलंतु ॥ २८९ ॥ लग्नेशसुतदः सौम्याःकेंद्रेसंधिर्नवान्यथा ॥ लग्नधूनेशषष्ठेशारित्वेप्यन्योन्यविग्रहः ॥ २९० ॥ गृहमागतोनयदसौकिंबद्धःकिमथवाहतइतिप्रश्ने ॥ मूर्तौक्रूरोयदितन्नहतोबद्धोऽथवापुरुषः ॥ २९१ ॥ त्रिकोणचतुरस्रास्त स्थितःपापग्रहोयदि ॥ ग्रहैर्निरीक्षितःपापैर्नूनंबंधनमादिशेत्॥२९२॥ सप्तमगोऽष्टमगोवाचेत्क्रूरस्तद्धतोपिवाबद्धः ॥ मूर्तौचसप्तमेवायद्वा लग्नेष्टमेपिभवेत्॥ क्रूरस्तदसौपुरुषोबद्धश्वहतश्वमुच्यतेचपरम्॥२९३॥ बद्धःसप्ताष्टगेक्रूरेमूर्त्यस्तेचाष्टलग्नगे ॥ बद्धोविमुच्यतेऽत्याशुक्रूरःश्रे यांस्तनौतदा ॥ २९४ ॥ अथबद्धमोक्षप्रश्नः प्रश्नदीपके—बद्धोऽस्तित त्किंभवितेतिप्रश्नेविमुच्यतेऽसौखलुमृत्युयोगे ॥ कदाविमुच्येदिति पृच्छमानेशुभंकदाभाविचतैर्मृतिःस्यात् ॥ २९५ ॥ मुक्तिप्रश्नेयदा केंद्रेकेंद्रेशाःस्युर्नमोक्षदाः ॥ तस्मिन्वर्षेऽथलग्नेशःपतितःकेंद्रगेनच ॥ २९६ ॥ संबंधेप्सुःसचेत्क्रूरोमृतीशःस्यात्तदामृतिः ॥ लग्नेशेस्त मितेऽबुस्थेकुजदृष्टेतदामृतिः ॥ २९७ ॥ चंद्रश्चांबुगपापेनमृत्युनाथे नयोगकृत् ॥ तदागुम्यांमृतिश्चंद्रकेंद्रेमंदयुगीक्षितः ॥२९८॥दीर्घपीडा चभौमेनयुग्दृष्टौबंधताडने ॥ दृश्यार्धेलग्नपश्चेत्स्याद्व्ययपेनेत्थशाल वान् ॥ २९९ ॥ पलायतेतदाबद्धोव्ययगेलग्नगेपिवा ॥ तृतीयनवम स्वामीव्ययगोलग्नपेनच॥३००॥ यदीत्थशालयोगेप्सुस्तदापिचपला यते ॥ दृश्यार्धेह्युपचारेणचंद्रोमुथशिलस्तदा ॥ ३०१ ॥ बंधमोक्ष स्त्रिधर्मेशःसंग्रहःशीघ्रमोक्षकृत् ॥ पतितेंदुस्त्रिधर्मस्थग्रहसंबंधकृत्तदा ॥ ३०२ ॥ केंद्रस्थत्रिभवेशेनयोगेप्सुश्चेत्तदाचिरात् ॥ यावच्छुक्रोब लीलग्नेतावत्कर्ताबलाधिकः ॥ ३०३ ॥ अस्तंगतेतनौशुक्रेबद्धमोक्षा

दिसंभवः ॥ म्रियतेयेनयोगेनतेनयोगेनमुच्यते॥३०४॥ मेषेतुलेचशी
घ्रंस्यात्कर्केनक्रेसकष्टता ॥ स्थिरेचिराद्विदेहस्थेमोक्षोमध्यमकालतः
॥३०५॥ ॥अथनौकाप्रश्नः ॥ क्षेमायातंवहित्रस्यमज्जनंवपनंजले॥ पण्य
व्यवहृतौलाभोनापिप्रश्नचतुष्टयम् ॥ ३०६ ॥ वहित्रमत्रनौका ॥ नौ
र्लभदास्यान्ममनेतिपृष्टेकेंद्रेशुभाश्चेदितरेषुपापाः ॥ बलोज्झिताःक्षेम
जयार्थदानौर्भावीतिवाच्यंविदुषाविमृश्य ॥ ३०७ ॥ लग्नाधिपेवक्रि
णिचास्यनाथेऽथावृत्यनौरेतिचमार्गतःसा ॥ चेत्सौम्यदृष्टःकुशलेनपा
पैर्दृष्टस्तदावस्तुविनेतिवाच्यम् ॥ ३०८ ॥ विलग्नरंध्राधिपतीस्वगेहे
प्रवेक्ष्यतश्चेद्व्यवहारलाभः॥ यदाष्टमेसौम्यखगाबलाढ्यास्तदातरीलाभ
सुखप्रसादास्यात् ॥ ३०९ ॥ कुशलायातिपृच्छायांमृत्युयोगेसमा
गते ॥ तदानौरेतिशीघ्रेणलाभाद्यंचान्ययोगतः ॥ ३१० ॥ लग्नेशंचं
द्रनाथंवाचंद्रंवामृत्युपोयदि ॥ पश्येत्क्रूरदृशानावासमंनश्यतिनौपतिः
॥ ३११ ॥ लग्नेशाष्टपतिःस्वस्यगेहंनालोकतेयदि ॥ तदायानेस्यव
क्तव्यंनिश्चितंमज्जनंबुधैः ॥ तावुभौसप्तमस्थौचेज्जलेवापनिकांवदेत्
॥ ३१२ ॥ पूर्वस्मिन्योगेवस्तुसहितनौकामज्जनेनचतत्रलाभः। द्वितीययोगो
नौकायातिवस्तुनोमज्जनमितिविशेषः । तदुक्तंयवनाचार्यैः ॥ द्यूनेवापनिकां
कृत्वायानमायातिमंदिरम् ॥ नौकायामारोप्यमाणंवस्तुवापनीयंसाजलेम
ज्जतीतिभावः ॥ लग्नचंद्रपतिक्रूरदृश्चाऽन्योन्यंयदीक्षितौ ॥ तदापोतज
नानांचमिथःकलहमादिशेत् ॥ ३१३ ॥ अथकिंवदंतीजनश्रुतिः । किंभ
वतीतिसत्याप्रश्ने ॥ लग्नंतुलग्नेश्वरशीतगूदयैःशुभान्वितैःकेंद्रगतैस्तुस
त्या ॥ ३१४ ॥ शुभदृग्योगतःसौम्यांवार्तांसत्यांविनिर्दिशेत् ॥ पा
तदृग्योगतोदुष्टवार्तासत्येतिकीर्त्यते ॥ ३१५ ॥ लग्नेश्वरेभाविवक्रेमि
थ्यावार्ताभविष्यति ॥ ३१६ ॥ अथक्रयिविक्रयिणौ ॥ क्रेतालग्नपति
र्ज्ञेयोविक्रेताग्रपतिःस्मृतः ॥ गृह्णाम्यहमिदंवस्तुप्रश्नएवंविधेसति ॥
॥ ३१७ ॥ बलशालिविलग्नंचेद्गृह्यतेतत्क्रयाणकम् ॥ तस्मात्क्रयणका

ल्लाभःप्रष्टुर्भवतिनिश्चितम् ॥ ३१८ ॥ विक्रीणाम्यमुकंवस्तुप्रश्नेएवंवि
धेसति ॥ आयस्थानेबलवतिविक्रेतव्यंक्रयाणकम् ॥ ३१९ ॥ अथस
स्यनिष्पत्तिः ॥ दिशिकस्यांभवेत्सस्यनिष्पत्तिःक्वचसानहि ॥ पूर्वदेश
स्यभंगोहिक्वदिशिक्वतनेनहि ॥ ३२० ॥ चतुर्णामपिकेंद्राणांमध्ये
यत्रशुभग्रहः ॥ तस्यांचसस्यनिष्पत्तिःस्वस्थंचैवभविष्यति ॥ ३२१॥
यस्यांदिशिशनिःपापैर्युतोवाप्यवलोकितः ॥ दिशितस्यांचतत्स्वास्थ्यं
दुर्भिक्षंचभविष्यति ॥ ३२२ ॥ दिशियस्यांरविस्तत्रधान्यनाशोनृपा
द्भवेत् ॥ यत्रापिमंगलस्तत्रधान्यनाशोऽग्निभिस्तथा ॥ ३२३ ॥ य
स्यांदिशिशुभाःखेटाःसमस्तबलशालिनः ॥ निष्पन्नासैवविज्ञेयासस्य
स्वास्थ्यंचतत्रहि ॥ ३२४ ॥ केंद्रेषुसर्वतःपापाःसमस्तबलसंयुताः ॥
देशस्तदाविनष्टोऽसौज्ञातव्यःशास्त्रकोविदैः ॥ ३२५ ॥ ॥ ॥

अथप्रकीर्णकाध्यायः ॥ भुवनदीपके—लग्नपोमृत्युपश्चापिमृत्यौ
स्यातासुभौयदि ॥ स्थितौद्रेष्काणएकस्मिन्प्रष्टुर्लाभस्तदाध्रुवम् ॥
॥ ३२६ ॥ एवंद्वादशभावेषुद्रेष्काणैरेवकेवलम् ॥ बुधेविनिश्च
यंब्रूयाद्योगेष्वन्येषुनिस्पृहः ॥ ३२७ ॥ प्रश्नकालेसौम्यवर्गेलग्ने
यदधिकोभवेत् ॥ ग्रहभावानपेक्षेणतदाख्येयंशुभंफलम् ॥ ३२८ ॥
लग्नाधिपश्चलाभस्याधीशश्चदायकोभवेत् ॥ लग्नाधिपस्ययोगोलाभा
धीशेनलाभकरः ॥३२९॥ भवतिपरलाभकरस्तदैवसयदिचंद्रदृग्लाभे ॥
योगाःसर्वेप्यफलाश्चंद्रमृतेव्यक्तमेतच्च ॥ ३३० ॥ कर्माधिशेननवमं
कर्माधीशेनचनिवृत्त्यधीशेन॥मृत्युपतिनाचयोगेलाभाधीशस्यवक्तव्य
म्॥३३१॥तत्तत्स्थानेक्षणतःपुण्यविवृद्धिश्चकर्मवृद्धिश्च॥ विबुधैस्तदा
निवृत्तिर्मृत्युर्भावापरेप्येवम् ॥ ३३२ ॥ लग्नेशोयदिषष्ठःस्वयमेत्यरि
पुर्भवत्यात्मा ॥ मृत्युकृद्दष्टगोसौऽथयगोऽसौसततंव्ययंकुरुते॥३३३॥
लग्नस्थचंद्रजंचंद्रःक्रूरोवायदिपश्यती ॥ धनलाभोभवत्याशुकिंत्वन
र्थोपिपृच्छतः ॥ ३३४ ॥ ॥ अथसामान्यतोभावविचारः ॥ इंदुःसर्वत्र

बीजाभोलग्नंचकुसुमप्रभम् ॥ फलेनसदृशोंशश्चभावःस्वादुसमप्रभः ॥ ३३५ ॥ लग्नपतिर्यदिलग्नंकार्याधीशश्चवीक्षतेकार्यम् ॥ लग्नाधीशःकार्यकार्येशःपश्यतिविलग्नम् ॥ ३३६ ॥ लग्नेशःकार्येशंविलोकयेल्लग्नपंचकार्येशः ॥ शीतगुदृष्टौसत्यांपरिपूर्णाकार्यसंसिद्धिः॥३३७॥ कथयंतिपादयोगंपश्यतिसौम्योनयल्लग्नम् ॥ लग्नाधिपंचपश्यतिशुभग्रहश्चार्धयोगोऽत्र ॥ ३३८ ॥ एकःशुभोग्रहोयदिपश्यतिलग्नाधिपेविलोकयति ॥ पादोनंयोगमाहुस्तदाबुधाःकार्यसंसिद्धिः ॥३३९ ॥ अथलाभादौकालावधिनिर्णयः। उत्पलः—उदयोपगतंराशिंतत्कलीकृत्यलिप्तिकागुणयेत् ॥ छायांगुलेश्चकुर्यात्हृत्वामुनिभिस्ततःशेषः॥३४०॥ ग्रहगुणकारोज्ञेयोदैवविदापंचविंशतिःसैका ॥ मनवोऽक्राष्टौत्रितयंभवाश्च ५।२१।१४।९।८।३।११ सूर्यादितोज्ञेयाः ॥ ३४१ ॥ गणयित्वैवंप्राग्वत्हृत्वासौम्यस्यभवेदुदयः ॥ कार्यप्राप्तिःप्रष्टुर्वक्तव्यानेतरैर्ग्रहैर्भवति ॥ ३४२ ॥ गुणकारैक्यविभक्तःकार्यःसूर्यादिगुणकसंशुद्धः ॥ यस्यनशुध्यतिवर्गोविज्ञेयस्तद्वशात्कालः ॥ ३४३ ॥ आरदिवाकरशेषेदिवाकरपक्षाश्चभृगुशशिनोः ॥ गुर्ववशेमासऋतवःसौम्येशनैश्चरेऽब्दाःस्युः ॥ ३४४ ॥ आधानेथप्राप्तौगमनागमनेपराजयेविजये ॥ रिपुनाशेवाकालेपृच्छायांनिश्चितंब्रूयात् ॥ ३४५ ॥ अकचटतपयशवर्गारविकुजसितसौम्यजीवसौराणाम् ॥ चंद्रस्यचनिर्दिष्टास्तैःस्युःप्रथमोद्भवैर्वर्णैः ॥ ३४६ ॥ ज्ञात्वातस्माल्लग्नंविज्ञायशुभाशुभंचवदेत् ॥ वर्गादिमध्यमांत्यैर्वर्णैःप्रश्नोद्भवैर्विषमराशिः ॥ ३४७ ॥ रात्रौलग्नंप्रवदेत्पृच्छायुग्मंकुजज्ञजीवानाम् ॥ सितरविजयोश्चनैवंरविशशिनोरेकराशित्वात् ॥ ३४८ ॥ तस्मात्प्राग्वत्प्रवदेत्पृच्छासमयेशुभाशुभंसर्वम् ॥ कालस्यचविज्ञानादेतच्चिंत्यंबहुप्रश्ने ॥ ३४९ ॥ अथमासचिंता ॥ पृथुयशाः—स्वांशेविलग्नेयदिवात्रिकोणेस्वांशेस्थितःपश्यतिधातुचिंताम् ॥ परांशकस्थश्चकरोतिजीवंमूलंप

रांशोपगतःपरांशम् ॥ ३५० ॥ धातुंमूलंजीवमित्योजराशौयुग्मेविं द्यादेतदेवप्रतीपम् ॥ लग्नेयोंशस्तत्क्रमाद्गण्यमेवंसंक्षेपोयंविस्तरात्त त्प्रभेदः ॥ ३५१ ॥ उत्पलः-बलिनौकेंद्रोपगतौरविभौमौधातुकरौ प्रश्ने ॥ बुधसौरीमूलकरौशशिगुरुशुक्राःस्मृताजीवाः ॥ ३५२ ॥ मेषालिसिंहलग्नेकुजार्कयुक्तेनिरीक्ष्यतेप्यथवा ॥ धातोश्चिंतांप्रवदेद्युग घटकन्यागतैर्लग्नैः ॥ ३५३ ॥ बुधरविजयुतैर्मूलंवृषतुलहरिमीनचा पकर्कटकैः ॥ चंद्रगुरुशुक्रयुक्तैर्दृष्टैर्जीवोविनिर्देश्यः ॥ ३५४ ॥ अत्रधा तुचिंतायांधातोर्बह्वतिस्वरूपविशेषनिर्णयोग्रहलग्नराशिवशाद्वा ज्ञेयः राशिस्वरूपं ग्रहस्वरूपंचजातकेप्रश्नेउपोद्धातप्रसंगेनिरूपितम् । एवंजीवचिंतायांब्राह्मणा दिजातिगौरादिज्ञानंचोह्यम् । अथकस्यभावस्यसंबंधेनायंप्रश्नइतिजिज्ञासायां वाज्ञानप्रकाशे-लग्नलाभपयोःप्राणितयोर्यद्भावगःशशी ॥ तस्यभाव स्ययाचिंताप्रष्टुःसाहृदिवर्तते ॥ ३५५ ॥ भावचिंतारूपलक्षणवर्णनामि त्यादिनानिरूपिता ॥ एवंबलाधिकाच्चंद्राल्लग्ननाथोयतःस्थितः ॥ दैवज्ञे नविनिर्णेयःप्रश्नसद्भावसंभवः ॥ ३५६ ॥ पृथुयशाः-आत्मसमंलग्न गतैस्तृतीयगैर्भ्रातरःसुतंसुतगैः ॥ मातावाभगिनीवाशत्रुगैःशत्रुभा र्यास्यात् ॥ ३५७ ॥ सप्तमसंस्थैर्नवमैर्धर्माश्रितागुरुर्दशमैः ॥ स्वांश पतिमित्रशत्रुषुतथैववाच्यंबलयुतेषु ॥ ३५८ ॥ चरलग्नेचरभागेम ध्याद्भ्रष्टेप्रवासचिंतास्यात् ॥ भ्रष्टःसप्तमभवनात्पुनर्निवृत्तोयदिनवक्री ॥ ३५९ ॥ मयाकास्त्रीउपभुक्तामनसिचिंतितावाकीदृशीवेतिप्रश्ने-अस्तेरवि सितवक्रैःपरजायांस्वांगुरौबुधेवेश्याम् ॥ चंद्रेचवयःशशिवत्प्रवदेत्सौ रेऽन्त्यजादीनाम् ॥ ३६० ॥ कुमारिकांबालशशीबुधश्चवृद्धांश निःसूर्यगुरुप्रसूताम् ॥ स्त्रींकर्कशांभौमसितौचधत्तेएवंवयःस्यात्पुरुषे षुचैवम् ॥ ३६१ ॥ अथसुरतप्रश्नः-शुभेत्थशालेहिमगौचतुष्टयेसौख्या तिरेकःसविलासहासः ॥ क्रूरेत्थशालेहिमगौसरोषेक्रूरान्वितेभूत्कल होन्नवध्वोः ॥ ३६२ ॥ पीडाथवासीत्सुरतेयुवत्यारजोयथास्तक्षसुपै

॥ ३७४ ॥ तृतीयैकादशयोर्दृष्टौयोवीक्षतेतृतीयदृशा ॥ तद्दृष्टिस्त्र्यंशोनानान्यत्रतुषड्भागदृष्टिःश्च ॥ ३७५ ॥ अनयोर्दृष्टिर्गुप्तस्नेहादृष्टिःसर्वत्रकार्यसिद्धिकरी ॥ दशमचतुर्थदृष्टिपादोनादुर्जनाख्यातु ॥ ३७६ ॥ यत्रोभयसप्तमकेसासकलाप्रत्यक्षदुर्जनादृष्टिः एकर्क्षस्थितदृष्टिर्मतासकलातिस्रोद्दशःक्षुताख्याःस्युः ॥ सर्वाश्चैताहिदृशोद्वादशभागांतरेभवेयुश्चेत् ॥ तत्सर्वविशेषःप्रोक्तोदृष्ट्यनुसारात्फलंचिंत्यम् ॥ ३७७ ॥ सूर्यःपंचदशांशैरिंदुर्द्वादशभिरवनिजोऽष्टाभिः ॥ सप्तांशैर्बुधशुक्रौगुरुमंदौनवभिरीक्षेते ॥ ३७८ ॥ एतेदीप्तांशकाःपूर्वतःपरतश्चज्ञेयाः ॥ ॥ यदिशीघ्रस्वरूपांशैःपश्चान्मंदंधनांशमुपगम्य ॥ स्वदीप्तभागमस्तैर्दत्तेध्रुवमित्थशालयोगोऽयम् ॥ ३७९ ॥ लिप्तार्धविलिप्तिकाभ्यांयदिहीनोमंदतोप्यतुल्यःस्यात् ॥ तत्पूर्णमित्थशालमुथशिलमपिकथ्यतेतज्ज्ञैः ॥ ३८० ॥ अथशीघ्रोमंदगतेरपिभागैकंसमुत्तरत्यग्रे ॥ तदेसराफसंज्ञोमूसरिफःकथ्यतेत्वशुभः ॥ ३८१ ॥ यद्युभयदृष्टिरहितोयद्यन्यःशीघ्रगोऽतरेभूत्वा ॥ पश्चात्तदन्यस्मैददातितेजःसनक्तसंज्ञःस्यात् ॥ ३८२ ॥ उभयोर्लग्नेशकार्येशयोरितिज्ञेयम् उदाहरणम्-स्त्रीलाभस्यप्रश्नेकन्यालग्नेबुधःपतिःसिंहे ॥ मीनेचतत्पतिर्गुरुस्तत्रानयोर्नत्वस्तिदृष्टिस्तु ॥ ३८३ ॥ शीघ्रश्चंद्रोद्वाभ्यांदृष्टोबुधात्तन्महोनीत्वा ॥ जीवायददौतद्वत्परहस्ताद्योषितःप्राप्तिः ॥ ३८४ ॥ अथयदिमंदोऽतस्थोद्वावप्यपश्यतिनिजोक्तदीप्तदृशा ॥ तेजोनीत्वाशीघ्राद्ददातिमंदायतद्यमया ॥ ३८५ ॥ मंदायमंदगतये ॥ उभयेत्थशालयोगेयदिचंद्रोऽप्यत्रमुथशिलविधायी ॥ तत्कंबूलंहिभवेदुत्तममध्याधमैर्भेदैः ॥ ३८६ ॥ अयमर्थः-यदिलग्नेशकार्येशयोरित्थशालयोगः तौचेत्स्वगृहेस्वोच्चेवाचंद्रोपिस्वक्षोंच्चगतस्तदोत्तमंकंबूलम् । यदाचंद्रःस्वक्षादौनतदोत्तममेव यदित्रैराशिकहद्दामुसल्लहाद्यधिकारवांस्तदामध्यमम् पंचाधिकाररहितत्वमुभयोश्चतदाऽधमम् । उभयोर्नीचारिराशिगतत्वेधमाधममितिविकल्पना । एतेचेत्थशालादयोदृष्टिस्था

तितद्वत् ॥लग्नेसुरेज्येभृगुजेकलत्रेतुर्येहिमांशौसविलासहासौ॥३६३॥
शुभग्रहोत्थेचकबूलयोगेयुतोरजःपुष्पसुगंधयुक्तम् ॥ स्वर्क्षोच्चगेहर्म्ये
रतंनिगद्यंस्थितेद्विदेहेवनितास्वकीया ॥ ३६४ ॥ चरोदयेसारमिते
परस्त्रीकेंद्रेशनौसासुरजोदिवारतिम् ॥ निशोदयेशत्रिखगेचरात्रौदि
वानिशंतद्वलिनोर्द्विखेटयोः ॥ ३६५ ॥ अथमहर्घचिंता ॥ मेषेवृषेच
मिथुनेशुभयुक्तदृष्टेनग्रैष्मिकंतुसुलभंभवतिपृथिव्याम् ॥ सूर्येधनुर्मृग
घटेषुचसारधान्यंकुर्यात्समर्घमशुभैःसहितोऽसमर्घम् ॥ ३६६ ॥
लग्नेबलाढ्येनिजनाथसौम्यैर्युक्तेक्षितेकेंद्रगतैःशुभैश्च ॥ सर्वैःसमर्घंवि
बलैर्विलग्नेकेंद्रेषुपापैःसकलंसमर्घम् ॥ ३६७ ॥ राकाकुहूशशिपभा
स्वदजप्रवेशेलग्नेश्वराशुभखगैर्युतवीक्षिताश्चेत् ॥ तद्वत्सरेजगतिसौ
ख्यमलंप्रकुर्युःपापार्दितेगदनरेंद्रभयंप्रजानाम् ॥ ३६८ ॥ मेषप्रवेशोद
यतःस्वरांशःकेंद्रेषुपापोडुपतीत्थशाले ॥ पापग्रहैर्दृष्टयुतेऽथतस्मिन्व
र्षेगदार्तिःप्रियमन्नमुर्व्याम् ॥ ३६९ ॥ भानोर्मेषःप्रवेशोदयभवनपतिः
सद्ग्रहःस्वोच्चसंस्थःस्वर्क्षस्थोवापिकेंद्रेशुभगगनचरैर्दृष्टयुक्तोबलाढ्यः ॥
तस्मिन्वर्षेविदध्याज्जगतिशुभसुखंभूरिसस्यंसुवृद्धिः क्रूरःक्रूरार्दितोवा
दिशतिनृपभयंकष्टमन्नंमहर्घम् ॥ ३७० ॥ अथमनुष्याणांजन्मलग्नात्प्र
तिवर्षेशुभाशुभज्ञानम् ॥ जन्मोदयाद्भास्वदजप्रवेशलग्नंहियद्भावगतंशु
भान्वितम् ॥ तद्भाववृद्धिंविदधातितस्मिन्वर्षेनृणांपापयुतंतदन्यथा
॥ ३७१ ॥ जन्मोदयेदेहसुखंधनेऽर्थलाभस्तृतीयेचकुटुंबवृद्धिः ॥
तुर्येसुहृत्सौख्यमथात्मजाप्तिःपुत्रेऽथषष्ठेऽरिपराजयःस्यात् ॥ ३७२ ॥
स्त्रीसौख्याप्तिर्भवतिमदनेमृत्युरुग्भीश्चरंध्रेधर्मार्थाप्तिस्तपसिदशमेवित्त
सौख्यास्पदाप्तिः ॥ लाभेलाभःसुखधनचयोदुःखदारिद्र्यमंत्येपुंसोमे
षंप्रविशतिरवौजन्मलग्नाद्विलग्ने ॥ ३७३ ॥ अथताजिकमतानुसारेणप्र
श्नाद्युपयोगिनइत्थशालादयोयोगाःकतिपयानिरूप्यंते ॥ नवपंचमयोर्दृष्टिः
पादोनासर्वदृष्टितःसबला ॥ मेलापकदृष्टिरियंप्रत्यक्षस्नेहदृष्टिरिति

नदीप्तांशकांतरेद्वादशांतरेवाज्ञेयाः मकेवलमेकराश्यंशस्थानएवेतिज्ञेयम् । एत
च्चास्मत्कृतेताजिकरत्नेस्पष्टतरंप्रपंचितमेवावधारणीयम् स्वगृहोच्चनवांशानिरूपणं
जातकावसरेनिरूपितम् नवांशकएवमुसल्लहावाच्यः । त्रैराशिकपदेनद्रेष्काणे
शाः यथामेषादेःषट्त्रिंशद्द्रेष्काणानामधीश्वराज्ञेयाः । प्रथमोभौमस्तस्मात्षष्ठश्च
भौमांतम् । हद्दापदेनत्रिंशांशाउच्यंते यथामेषेषडंगवसुशरबाणाः।६।६।८।५।५
गुरुसितज्ञकुजमंदाः ॥ वृषभेवसुरसवसुशरशिखिनः ८।६।८।५।३। शुक्रज्ञजी
वमंदाराः ॥ मिथुनेषडंगशरनगषण्णां ६।६।५।७।६ बुधशुक्रजीवकुजसौराः॥
कर्केऽद्रिरसषडद्रिश्रुतिषुच ७।६।६।७।४। कुजशुक्रसौम्यगुरुमंदाः ॥ सिंहेंग
बाणशैलांगांगाः ६।५।७।६।६। देवेज्यशुक्रार्किबुधाराणाम् ॥ युवतौशै
लाशाब्धयद्व्यक्षि ७।१०।४।७।२। ज्ञसितजीवकुजशनीनाम् ॥ रसाष्टाद्रिनगा
क्षिभागाः ६।८।७।७।२। कोणबुधगुरुसिताराश्च ॥ अलिन्यद्र्यंबुधिगजबा
णांगाः ७।४।८।५।६। भूसुतशुक्रसौम्यगुरुमंदाः ॥ चापेरविबाणाब्धिशर
वेदाः १२।५।४।५।४। देवगुरुसितज्ञकुजसूर्यजाः ॥ मकरेऽद्र्यद्रिनागाब्धि
वेदाः ७।७।८।४।४। बुधेज्यदैत्यगुरुशनिभौमाः ॥ कुंभेऽद्यंगाद्रिबाण
बाणाः ७।६।७।५।५। बुधसितेज्यकुजमंदाः ॥ मीनेर्काब्ध्यग्निनंदद्विः १२।
४।३।९।२। सितगुरुज्ञकुजसौराः ॥ **इतिश्रीदैवज्ञानंतसुतश्रीदैवज्ञनीलकं
ठविरचितायांश्रीनीलकंठ्यांप्रश्नतंत्रंतृतीयंसमाप्तम्** ॥ ३ ॥ ॥

॥ समाप्तोऽयंग्रंथः ॥

इदं पुस्तकं श्रीयुतभगीरथात्मजेन हरिप्रसादशर्मणा मुंबय्यां जगदीश्वराख्यमुद्र-
णालये मुद्रयित्वा प्रकाशितम् । शकः १८२८ संवत् १९६२ सन १९०६.

Indira Gandhi National Centre for the Arts

पं॰ रघुनन्दन प्रसाद शुक्ल बुक्सेलर.

कचौरि गली--बनारस सिटी.

पुस्तक मिलनेका ठिकाना.

पं॰ हरिप्रसाद भगीरथजीका पुस्तकालय.

कालकादेवीरोड, रामवाडी.

मुंबई.

133.5
DA1

DATA ENTERED
Date 24/06/08

IGNCA RAR
ACC. No. R-232

Indira Gandhi National Centre for the Arts